3677	S. S. 76	Do.	$10\frac{1}{2} \times 5$	32
3678	Not noticed by Dr. Burnell.	Do.	14×6	10

No. of Lines per Page or Sheet.	Script		Complete or otherwise.
13	Devanāgarī	Sarga	5 (wants verses 1-5).
10	do.	„	5 (wants beginning and end).
12-13	do.	„	6 (wants end).
12	do.	„	6 (verses 1 to 19).
12	do.	„	7
7	do.	„	8 (verses 23-106).
10	do.	„	9
14	do.	„	9 (wants end).
11	do.	„	10 do.
8-9	do.	„	11 (verses 1-130).
14	do.	„	11 (verses 1-57).
10	do.	„	11 do. 1-11 & 24-51.
13	do.	„	14 do. 1-50.
12	do.	„	20 do. 1-67.
9	do.	„	4
8-13	do.	„	6
8-9	do.	„	8 (wants beginning)
9	do.	„	15 (The end of 14 is found & end of 15 is wanting).
9-10	do.	„	18 (wants beginning)
9	do.	„	18 (incomplete).
9	do.	„	19
10	do.	„	17
8-10	do.	„	4

॥ नैषधव्याख्या ॥

3679. NAIṢADHAVYĀKHYĀ.

J. L. Collection No. 525. Substance—Paper. Size—13 × 6½ inches. Sheets—40. Lines—15 to a Page. Script—Devanāgarī. No. of Granthas—1900. Author—Nārāyaṇa. Complete. 1st Sarga only.

Beginning:

श्रीगणेशाय नमः ॥

निपीय यस्य + महसां महोज्वलः ॥ १ ॥

वैदेही यस्य वामे जयति जयजनिर्दक्षिणे लक्ष्मणोऽपि
श्रीमानग्रे हनूमानतुलबलचयो हस्तविन्यस्ततत्त्वः ।
कोदण्डं काण्डमेकं दधदहितकुलध्वंसकारासमन्ता-
द्व्याद्व्याजभव्याकृतिसलिलनिधिर्जानकीजानिरस्मान् ॥ १ ॥

दशकन्धरकरिसिंहः
सीताचेतस्सरोजरोलम्बः ।
रघुकुलकैरवचन्द्रः
पायादायासतो रामः ॥ २ ॥

भद्राय भूयाद्भवतां श्रीरामो भक्तिभावितः ।
स्मृतेरुज्जृम्भते यस्य पदवी सुरदुर्लभा ॥ ३ ॥

नत्वा श्रीनरसिंहपण्डितपितुः पादारविन्दद्वयं
मातुश्चापि महालसेत्यभिधया विख्यातकीर्तेः क्षितौ ।
श्रीरामेश्वरसीतयोः सुमनसोर्गुर्वोरगर्वो यथा
बुद्धिः श्रीनिषधेन्द्रकाव्यविवृतिं निर्माति नारायणः ॥ ४ ॥

चिकीर्षितस्य निर्विघ्नसमाप्त्यर्थं शिष्टाचरितप्राप्तं

"आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इति मङ्ग-लाचरणं कर्तव्यमिति ग्रन्थकृच्छ्रीहर्षनामा कविः गूढस्वकी (गूढं सखी)जरघुनाथाभीष्टदेवतानमस्काररूपं मङ्गलमाचर-ति। अन्ये तु विशिष्टवस्तुनिर्देशलक्षणं मङ्गलमित्याहुः ॥ निपीयेति ॥ अत्र पुण्यश्लोकनलरूपविशिष्टवस्तुनिर्शेन निर्विघ्नग्रन्थपरिसमाप्तिरित्यभिप्रायेणाह स नल आसी-दिति। * * *

नायकश्चात्र धीरललितः। "निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः" इति। रसश्चात्र शृङ्गारः। स द्वि-विधः संभोगो विप्रलम्भश्च। तस्यापरे रसा अङ्गभूताः। एवं सर्वत्र। अस्मिन्सर्गे "इत्थममुम्" इति यावत्। वंशस्थं वृत्तम् ॥ १ ॥

End:

श्रीहर्ष + सर्गोऽयमादिर्गतः ॥ १४६ ॥

श्रीहर्षमिति ॥ श्रीहीरनामा पिता मामल्लदेवी माता च यं श्रीहर्षनामानं पुत्रं सुषुवे। किंभूतः श्रीहीरः? कवि-राजानां राजिः पङ्क्तिः तस्या मुकुटानामलंकाररूपो हीरः हीराख्यं रत्नम्। किंभूतम्? जित इन्द्रियसमूहो येन तस्य श्री-हर्षस्य चिन्तामणिमन्त्रस्य चिन्तनमनुध्यानं जपादि। तस्य फले शृङ्गारभङ्ग्या शृङ्गाररचनाविशेषेण चारुणि रमणीये शृङ्गाररसप्रधाने नैषधीयं नलसंबन्धि चरितं चित्रं यस्मिन्। एवंविधे महाकाव्येऽयमादिः प्रथमः सर्गः समाप्तः ॥ (१४६) ॥

Colophon: Nil. (See No. 526)

(श्रीवेदरकरोपनामश्रीमन्नरसिंहपण्डितात्मज नारायण-

विरचिते नैषधीयप्रकाशे प्रथमस्सर्गस्समाप्तः ॥)

Subject: Naiṣadhavyākhyā called Prakāśa with the text, 1st sarga only.

Descriptive No.	Collection No.	Substance	Size Inches	No. of Sheets or leaves
3680	B. L. 4632	Paper.	$12\frac{4}{5}\times 5\frac{1}{5}$	32
3681	„ 4633	do.	$10\times 5\frac{1}{10}$	19
3682	„ 4634	do.	$12\frac{4}{5}\times 5\frac{1}{5}$	33
3683	J. L. 526	do.	10×4	83
3684	„ 527	do.	12×6	18
3685	„ 528	do.	$12\frac{1}{2}\times 4\frac{1}{2}$	30
3686	„ 529	do.	$9\frac{1}{2}\times 4\frac{1}{2}$	28
3687	„ 530	do.	$10\times 5\frac{1}{4}$	30
3688	„ 531	do.	13×6	34
3689	„ 532	do.	$11\frac{1}{2}\times 5$	81

Remarks :—The Ms. is in good condition.

Other copies of Nārāyaṇa's commentary are tabulated as before.

No. of Lines per Page or Sheet.	Script	Complete or otherwise	
13-15	Devanāgarī.	Sarga	7 (wants beginning).
13	Do.	„	8
12-13	Do.	„	9
8	Do.	„	1
14	Do.	„	2
11	Do.	„	2
11	Do.	„	8
14	Do.	„	12
13	Do.	„	12
13	Do.	Sargas	16, 17

॥ नैषधव्याख्या ॥

3690. NAIṢADHAVYĀKHYĀ.

Burnell's Catalogue No. 4617. Page 156. Left column. Substance—Paper. Size—10 × 4¼ inches. Sheets—93. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Śeṣarāmacandra. (First Sarga only.)

Beginning:

श्रीगणाधिपतये नमः ॥

श्री अपीतकुचनायकीसमेतश्रीदक्षिणामूर्तिगुरवे नमः ॥

सायं गोपवधूविलोकनपथेनायतमग्रे गवां
गायन्तं मृदुवेणुना निगदितस्सायं सहायाग्रतः ।
ध्येयं योगिजनस्य चोपनिषदां मेयं विधेयं श्रियो-
ऽमायं माधवमिन्द्रनीलशकलश्यामं श्रयामो वयम् ॥ १ ॥

भजमानभावितार्थाम्रृषोद्यतायै स्फुटीभूतम् ।
भूयो भूयो भक्त्या मायामानवमृगाधिपं वन्दे ॥ २ ॥

वामा वामवपुर्विभागविलसत्सौन्दर्यवीक्षाविधि-
व्यत्यासव्यवसायिवीक्षणयुगव्यामिश्रितामाश्रितम् ।
भक्तानुग्रहसुक्तविग्रहसुखं व्यक्तानुकम्पं मयि
त्यक्ताकारगतित्रयं विभुं विरूपाक्षाभिधं तं नुमः ॥ ३ ॥

यः साहित्यरसामृताब्धिलहरीजालेषु खेलाचलो
यश्चात्यर्थगभीरतर्कजलधेर्माथे समव्याचलः ।
मीमांसायुगसिन्धुतारणविधौ यः कर्णधारः परः
केषामेष मनो विनोदयति नः श्रीहर्षनामा कविः ॥ ४ ॥

यः शिष्यानशिशेषदात्ममहती भक्तीन् सदा जूगुर-
ष्यो यश्चाचुकुमारिलद्बहुतरानाचक्षपादद्वयः ।
यः किश्वाचगणादथत्रिभुवने यश्चावनात्वस्यतः
सोऽयं केननन्नूयतेति मतिमान् श्रीशेषनारायणः ॥ ५ ॥

सकलपदार्थविचारणकारणमतुलं स्वतःप्रकाशं यत् ।
महयामि महो भक्त्या नारायणनामकं कमपि ॥ ६ ॥

नारायणगुरुचरणप्रसादसंप्राप्तवाग्विलासेन ।
क्रियते नैषधटीका सुधिया शेषेण रामचन्द्रेण ॥ ७ ॥

अविचारितरमणीयं टीकान्तरमपि नैषधस्य सुखम् ।
हृदयङ्गमा भविष्यति गुणगृह्याणामियं टीका ॥ ८ ॥

ग्रन्थारम्भे निर्विघ्नेन परिसमाप्त्यर्थं शिष्टाचारपरम्पराप्राप्ताभिमतदेवतानमस्काराशीर्वचनविशिष्टवस्तुनिर्देशादिमंगलाचरणं ग्रन्थकृदाचरति ॥ निपीयेत्यादिना श्लोकेन ॥ नमस्कारादिना हि निर्विघ्नेन ग्रन्थसमाप्त्यादि क्रियते । तत्सर्वमपि पुण्यश्लोकनलक्षणविशिष्टवस्तुनिर्देशादपि सेत्स्यतीत्याशयवानाह— स नलस्तेजसां राशिरासीदिति । पृथुनलभरतसहस्रार्जुनप्रभृतीनां स्मरणमपि सकलाभिलाषपूरणकारणम् । किम्पुनः कीर्तनमित्यर्थः । अन्यच्च स नलो महसां राशिरित्यनेन नलस्य सूर्यतुल्यत्वमप्युक्तम् । तेन चेष्टदेवताकीर्तनमपि कृतमेव । एतेन च स एव तेजस्व्यभून्नान्य इति ध्वन्यते । यस्य महीपालनसम्बन्धिनीःकथाः चरितगोष्ठीः प्रबन्धात् वा सादरमाकर्ण्य सुधियो यागादिभिः प्रयास-

साध्यं सुतरां पेयं पीयूषमपि नाद्रियन्ते । यथा नायास-साध्यरूपायां नलकथायामादृता तथा न सुधायामिति । नलकथाश्रवणात्पूर्वं सुधायां यथा आदर आसीत् तथा नानन्तरमिति वा। अपिरौचित्ये । दुग्धादिमधुद्रव्यान्तर-परित्यागेन सुधायां सर्वादरणीयत्वमपि शब्दार्थः । अनेन कथायाः सरसत्वं विद्यते । तेन चेन्द्रादिपरित्यागेन नल-भैम्यनुरागस्यौचिती सूच्यते । यत्कथाः सादरमाकर्ण्य बुधास्तथाद्रियन्ते यथा सुधामपि नेति कैश्चिद्व्याख्या तम् , निपीयेत्यनेनैव कथायामादरस्योक्तत्वात् आद्रियन्त इत्यस्य वैयर्थ्यापादाद्दुर्योजत्वाच्चोपेक्ष्यम् । बुध्यन्त इति बुधाः । बुधा अपि सुधां सोपि(?)नाद्रियन्त इति वा । वृष्ट्या-दिना क्षितिरक्षिणो देवा यत्कथामाकर्ण्य शोभनमाह्लादकं धाम तेजः पाति रक्षति शोभनधामाश्रयो यश्चन्द्रस्तस्मिंश्च-न्द्रे विषये तथा कथा कथावत्पूर्वद्वा(?)नाद्रियन्ते । चन्द्रकला अपि देवाः पिबन्तीति क्षितिपालनशीला अन्ये परिज्ञाता-रः । राजान इति वा यदीयाः प्रजापालवीर्यौदार्यादिकथाः सादरमाकर्ण्य । सुष्ठु दधातीति सुधा क्षितिस्तामपि राजानो नाद्रियन्ते । यतो विज्ञाः क्षितिरेव तेषां स्वं यद्यपि तथापि तत्कथाश्रवणानन्तरं तस्मिन्नप्यादरो नाभूदिति केचिद्व्याचक्षते तद्गौरवाभावादुपेक्ष्यम् । फणामण्डलधा-रणद्वारेण क्षितिरक्षिणः शेषस्य क्षितिरक्षित्वसहवासित्वा-त्सर्वेषूपचर्योच्यते । शेषप्रभृतयः क्षितिरक्षिणो नागाः । "सुधाभुजगभोजनम्" इत्यभिधानात् । निजभोजनममृत-

मपि नाद्रियन्ते। यतो विज्ञास्तारतम्यस्य ज्ञातार इति वा। क्षितिरक्षिणो दिग्गजा वा। सुधां पृथ्वीम्। क्षितिरक्षिणो गवादय इति वा। उक्तञ्च। "गोभिः विप्रैश्च वेदैश्च सतीभिः सत्यवादिभिः। अलुब्धैर्दानशीलैश्च सप्तभिर्धार्यतेमही"॥ सुधायां स्वस्वकर्मानुष्ठानमपि। अनेन कीर्तेर्लोकत्रयव्याप्तित्वं व्यज्यते॥

* * *

नलस्य लोके प्रसिद्धतरत्वेन परोक्षत्वोपचारादासिरित्यत्रलिङभावः। एवं सर्वत्र ज्ञेयम्। महनम्। महः पूजेति पक्षे चौरादिकान्महयतेरीयङ्। अदन्तत्वाद्वृद्ध्यभावः। ज्वल इत्यत्र ज्वलतीति विहितस्य णस्य पाक्षिकत्वात्पचाद्यच्। अस्मिन् सर्गे "इत्थममुम्" इति यावद्वंशस्थं वृत्तम्॥ १॥

End:

॥ आनन्दजाश्रुभिरिति॥.... क्रमणव्याजेन नीराजनं...ततां स्वीयबन्धूनां प्राक् स्वधारणसमये शोकेन निःसारितप्रवाहान् स्वमुक्तिसमये आनन्दजबाष्पैरनुगम्यमानमार्गश्चक्रे। हंसे धृते ते रुरुदुः, मुक्ते ते जहृषुरिति भावः। बद्धमुक्तं एवं पक्षिणं वेष्टयित्वा पक्षिणोऽपत्रपन्ति रुदन्ति चेति पक्षिजातिः। अन्यस्यापि कारागारादिनिबद्धस्य मुक्तस्यानन्दाश्रुसहितैर्बान्धवैर्नीराजनाक्रियत इति समासोक्तिरनुप्रासश्च। चङ्क्रमणमिति "क्रम गतिकौटिल्ये" यङन्ताद्भावे ल्युट्। वलयाकारापि गतिः कुटिलस्यैरा(?)य"ङोचिच" इत्यन्यत्रापि यङो लुक्। सर्पः। सर्गसमा-

त्रिश्लोकेष्वानन्दपदप्रयोगादानन्दाङ्कमिदं ज्ञेयम् । वसन्ततिलका ॥ १४४ ॥

॥ श्रीहर्षमिति ॥ श्रेष्ठकविमण्डलीमुकुटभूषणीभूतहीरः श्रीहीरः प्रशस्तो हीरनामा मामल्लदेवी च यं जितेन्द्रियसमूहं श्रीहर्षनामानं सुषुवाते, यस्य श्रीहर्षस्य चिन्तामणिमन्त्रध्यानफले शृङ्गाररचनाविशेषेण रमणीये शृङ्गारप्रधाने नैषधीयं चरितं यत्रैवंविधेऽस्मिन् महाकाव्येऽयमादिमः सर्गः समाप्तः ॥ चिन्तामणिमन्त्रसामर्थ्यादेवंविधं काव्यं कृतमिति भावः । रूपकानुप्रासौ । शार्दूलविक्रीडितम् । महाकाव्यत्वञ्चास्य सर्गबं... ॥

Colophon: Nil.

Subject: Naiṣadhīyavyākhyā. First Sarga.

Remarks:—The Ms. is in very good condition. Alternate sheetc are sulpherated. On the title page is given :—

हप्यत्प्रत्यर्थिपृथ्वीपरिबृढमुकुटीरत्ननूत्नांशुमाला
बालार्कश्रीस्फुरत्संभ्रालिनशरभजीभूमिभर्तुर्निमित्तम् ।
शेषप्रख्येन शषाभिधवुधपटलीभूषणेन प्रक्लृप्तं
व्याख्यां व्याख्यातभैमीनलनृपचरितां विश्वनाथो लिलेख ॥

On the last sheet is given :—

विसर्गेषु वर्णेषु मात्रासुपङ्क्ता-
वनुस्वारसंयोगवैद्येषु यद्यत् ।
प्रणष्टं प्रमादेन हस्तस्य दोषा-
त्तमालोक्य सर्वं महन्तां महान्तः ॥

॥ नैषधव्याख्या ॥

3691. NAIṢADHAVYĀKHYĀ.

Burnell's Catalogue No. 4624. Page 156. Left column. Substance—Paper. Size—9¼ × 4⅛ inches. Sheets—72 (3-74). Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—1120. Author—Śeṣarāmacandra. First Sarga only.

Beginning:

॥ रसैरिति ॥ स नलो भूर्जाया यस्यैवंविधोऽभूत् स एव भूपतिर्नान्य इत्यर्थः। यस्य कथा शृङ्गारादिभिर्नवरसैः षड्रसां सुधामपृतमवधीरयन्ती तिरस्करोति। सुधायाः षड्रसत्वं व्याख्यातृप्रसिद्ध्या प्रसिद्धम्। मधुररसैर्वा। यद्वा यस्य कथा रसैः कृत्वा सुधायां अवधिमुत्कृष्टां सुधामिति यावत्। तामीरयति क्षिपतीत्येवं शीलेति वा। सुधा सुधावधीरणीत्यपि पाठः। तत्रापि सर्वार्थः। यद्वा यस्य कथा रसैर्हेतुभिः सुधाया अवधिः एतत्परममृतं नास्तीत्यर्थः। एतेनेन्द्रादिपरित्यागेन नले भैम्यनुरागस्यौचिती सूचिता। रणी सङ्ग्रामवान्।

End:

महाकाव्यत्वञ्चास्य सर्गबन्धनादिलक्षणयोगात्। तथा हि। प्रथमश्लोके वस्तुनिर्देशः कृतः। सर्गबन्धोऽपि विद्यते। प्रथमसर्गे स्फुरद्धनुरित्यादिना सङ्ग्रामवर्णनम्। फलानि पुष्पाणीत्यादिनोद्यानवर्णनं सूचितम्। सर्वर्तुवने वनेत्यनेन ऋतुवर्णनम्। अथ स्वमादायेत्यादिना तडागवर्णनं सूचितम्। द्वितीयसर्गे नगरवर्णनं दूतप्रयाणश्च

कथितम् ॥ षष्ठचतुर्थनवमसर्गेषु विप्रलम्भवर्णनम् । षोडशे विहारः । अष्टादशेनैकवर्णमणीत्यादिना शैलवर्णनं सूचितम् । मधुपानरतोत्सववर्णनञ्च कृतम् । एकोनविंशे सूर्योदयवर्णनम् । विंशे नवकेलौ स्मराश्वत्थदलमित्यनेन वनक्रीडा सूचिता । एकविंशे देवतास्तुतिः । द्वाविंशे चन्द्रोदयवर्णनम् । नायकोदयस्तु समस्तेनापि । (उद्यान) सलिलक्रीडावर्णने ये न महाकाव्यत्वभङ्गप्रसङ्गः । "न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति" इत्युक्तत्वात् । निषधसम्बन्धि नैषधम् । वृद्धाच्छः ॥

Colophon:

इति श्रीशेषरामचन्द्रविरचितायां नैषधचरिते भावद्योतनिकायां सर्वानवद्यकरण्यां प्रथमः सर्गः समाप्तः ॥ पुरुषोत्तमः ॥ श्रीकृष्णार्पणमस्तु ॥

Subject: Naiṣadhavyākhyā otherwise known as Bhāvadyotanikā or Sarvānavadyakaraṇi. First Sarga only.

Remarks:—The Ms. is in good condition. This Ms. abruptly begins with the second śloka of the first sarga.

॥ नैषधटीका ॥

3692. NAIṢADHAṬĪKĀ.

J. L. Collection No. 533. Substance—Paper. Size—9¾×6 inches. Sheets—16. Lines—12 to Page. Script—Devanāgarī. No. of Granthas—420. Author—Viśveśvarabhaṭṭasūri. Ninteenth Sarga only.

Beginning:

श्रीगणेशाय नमः ॥

॥ निशीति ॥ निशि रात्रौ। दशमितां दशमोऽवस्था-विशेषोऽस्त्यस्या इति दशमिनी।"वयसि पुरणात्"इतीनिः। तस्य भावस्तत्ता। "त्वतलोर्गुणवचनस्य" इति पुंवद्भावः। "वर्षीयान् दशमीज्यायान्" इत्यमरः। तामालिङ्गन्त्याः प्राप्नुवत्याः प्रियाया अङ्कमुत्सङ्गमुपेयुषः प्राप्तवतः निषधवसुधायां निषधभुवि। मीनाङ्कस्य मीनकेतो नलस्य विबोधं विधित्सुभिर्विधातुमिच्छुभिः वैतानिकैर्मागधैः। श्रुतीनां श्रोत्राणां कर्णमधूनां स्वादूनां पदानां स्रजो मालायाः। वैदग्धी चातुर्यम्। ब्राह्मणादिपाठात् ष्यञ्। तया विभावितेनानुसंहितेन भाविकेनाभिप्रायवता स्फुटेन व्यक्तेन रसेन शृङ्गारादिना भृशमत्यर्थं अभ्यक्ताः आक्षिप्ताः तादृशो गिरः वचनानि जगिरे। "कै गै शब्दे"। वक्ष्यमाणप्रकारेण गदिताः ॥ १ ॥

End:

॥ आगच्छन्निति ॥ अथ भूपतिर्नलः स्वर्गङ्गायां मन्दाकिन्यामम्बुनि कृतदिनारम्भे प्रभाते आप्लुतिः स्नानं येन तादृशः सन्, प्रियाया यौतकत्वेन प्राप्तमतिपुष्पकं पुष्पकमतीत्यवर्तमानं रथमधिष्ठायानन्दादागच्छन्। उषःक्षणं प्रातःकालं भणतां वन्दिनां दृशोरातिथ्यमानशे प्राप्य अपरं पश्चादागतैर्वन्दिभिरविदितः। प्रासादतो निर्गमो यस्य सोऽविदितप्रासादनिर्गमः। तेषां वन्दिनामिति सम्बन्धः ॥ ६६ ॥

श्रीहर्षमिति ॥ नलीयचरिते एकां मुख्यां नवस्य नूतनस्यार्थस्य घटनां न त्यजतः। नशब्देन समासः।

तस्य श्रीहर्षस्य कृतावस्मिन्काव्येऽयमेकोनविंशः सर्गो-ऽगच्छत्समाप्तः॥ विंशतेः पूरणो विंशः। "तस्य पूरणे डट्" इतिति विंशतेर्डितीति शब्दस्य लोपः। एकोनविंशः एक-श्चैकस्यादुगिति नञ् प्रकृत्या एकस्य शब्दस्यादुगागमः।

.... ॥ ६७ ॥

Colophon:

जायन्ते कति जज्ञिरे कति जनिष्यन्ते कतीह क्षितौ
स्रष्टारो निगिरामिदं तु कविभिनिर्मत्सरैः कथ्यताम्।
आपूर्वापरदक्षिणोत्तरहरित्साहित्यसिंहासन-
स्वैरारोहपराक्रमं भजतु कः श्रीहर्षसूरेः परः॥

इत्याचार्यविश्वेश्वर(भट्ट)सूरिविरचितायां नैषधटीकायां पदवाक्यार्थप-ञ्चिकायामेकोनविंशः सर्गः॥

Subject: Naiṣadhaṭīkā—otherwise known as Padavākyārtha-pañcikā 19th Sarga.

Remarks:—The Ms. is in a decaying condition. After the colophon is given the comn entary of the first śloka of the next Sarga.

॥ नैषधटीका ॥

3693. NAIṢADHAṬĪKĀ.

J. L. Collection No. 534. Substance—Paper. Size—10×4 inches. Sheets—30 (41-70). Lines—7 to 10 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Viśveśvarabhaṭṭasūri. Nineteenth Sarga only. (wants beginning)

Beginning:

(रजनीरिति रजनेयीमिन्यावमथवः करशीकसः षमयु-

शब्दसन्निधानादत्र रजतेः करिणीत्वमुन्नेयम् । + सप्तम्या अलु) क् उच्चैस्थूलैरुः बिन्दुभिः कर्तृभिः । "मन्दोदन" इत्यादिना विकल्पादुदकस्योदादेशः । सुषिरकुशलेनकेनाचिन्मणिवेधनिपुणेनान्तर्मध्ये किमपि किञ्चिदधःसूचिना शिखाङ्कुरसंकरमग्रभागसङ्क्रामितानि मुक्ताफलान्यनुमेनिरे अनुचक्रिर इति सादृश्यलक्षणादत्र दर्भाग्रबिन्दूनां वेधसूच्यग्रलग्नमुक्ताफलैरुपमा । तदाम्भःकणेषु मधुत्वरूपणाद्गजने करिणीत्वरूपणासिद्धिरित्येकदेशविवर्तिरूपकमित्यनयोरपेक्षत्वात् संसृष्टिः ॥

End, colophon and subject—Same as No. 3692.

Remarks:—The Ms. is in good condition. The readings of the Ms. slightly differ from that given in No. 3692.

DETAILED REMARKS
ON THE
NAIṢADHA MANUSCRIPTS.

No. 3454

The name of the scribe is given as Viśvanātha.

No. 3469

The name of the scribe is given as Govinda. The Ms. was copied in the pratipat day of the Śuklapakṣa in the Caitra month of the cyclic year Bahudhānya.

No. 3471

The son of Nārāyaṇa copied the manuscript in the cyclic year Bahudhānya, Mārgaśīrṣa month.

No. 3503

The copyist was Tāra Gopāla, and the work was copied in the cyclic year Ānanda, month Mārgaśīrṣa, Śuklapakṣa Daśamī.

No. 3507

This Ms. is said to have been copied by Veṇkāji Paṇḍita in the month of Bhādrapada of the year Śārvarī.

No. 3511

This Ms. is said to have been copied by Gopāla on Sunday in the month of Māgha in the cyclic year Ānanda.

No. 3516

This Ms. is said to have been copied by Govinda the son of Nārāyaṇa Vyāsa and the brother of Viśveśvara Vyāsa on Friday, the second day of the bright fortnight, in the month of Magha—Uttarāyaṇa, Viṣu year(cyclic).

No. 3518

The Ms. is said to belong to Sāmāji Bālāji.

No. 3539

This Ms. belonged to Raṇgabhaṭṭa Gosvāmi.

No. 3540

This was stolen by Śivabhaṭṭa Lāṇḍage and when the owner found it, it was sold to the person who stole it. We find after the colophon.

इदं पुस्तकं शिवभट्टलाण्डगेन मुषितम् । अत एव विक्रीतं मम ।

The Ms. belonged to Śivabhaṭṭa.

No. 3550

One Raṅganāthasvāmin wrote this in the cyclic year Akṣaya, Kārtika month, Dvādaśi of the bright fortnight.

No. 3555

The colophon is noteworthy.

इति श्रीमहाकाव्ये कालिदासकृतौ नैषधे अष्टमः सर्गः समाप्तः

No. 3559

After the colophon we find

सुभानुसंवत्सर माघशुद्ध तृतीया सौम्यवासर

No. 3562

The Ms belonged to Viśvanāthabhaṭṭa Gosāvi.

No. 3565

Nārāyaṇa, son of Lingaka Nāyambhaṭṭa wrote this copy.

No. 3568

The copying was finished on Tuesday, 9th day of the bright fortnight of the Kārtika month, in the cyclic year Svabhānu.

No. 3570

The copying was finished on Sunday, the 8th day of the bright fortnight in the Āṣāḍha month, in the cyclic year Tāraṇa.

The owner of the Ms. was Rājimbhaṭṭa Lingekāri.

No. 3579

It was copied by Āṇṇāvaiyangār.

No. 3591

This was copied in Śaka 1746 or A. D, 1824.

No. 3600

This was copied in the cyclic year Rākṣasa.

No. 3603

The owner of the Ms. was one Bāla.

No. 3608

The tag gives the name as

पेद्दभट्टीयव्याख्यानम्

No. 3615

The commentary on the last verse is by Nārāyaṇa.

No 3625

This was copied by Śrīdāsa.

No. 3651

This was copied by Viśvanāthabhaṭṭa. The copying was finished in the cyclic year Naḷa, Bhādrapada month, Śuklapakṣa, dvitīyā, Friday.

Nos. 3664 ; 3666 ; 3668 ; 3669.

These Mss. belong to Manyambhaṭṭa alias Vṛka.

No. 3672

The Ms. was copied by Viśvanāthabhaṭṭa on Saturday New moon, Caitra month, in the cyclic year Sarvadhāri —śaka.

Nos. 3688 ; 3689.

These belonged to Annambhaṭṭa.

॥ इतरमहाकाव्यानि ॥

OTHER MAHĀKĀVYAS

॥ पार्वतीपरिणयः ॥

3694. PĀRVATĪPARIṆAYAḤ..

Burnell's Catalogue No. 10247. Page 159. Right column. Substance—Palm leaf. Size—15 × 1½ inches. Leaves—33. Lines—5 to 7 to a Page. Script—Grantha. No. of Granthas—575. Author—Īśvarasumati. Incomplete.

Beginning:

श्रियं विधत्तां शिवयोरपत्यं
कण्ठोपरिष्टात्कलभायमानम् ।
यत्पादपङ्केरुहभक्तिभाजः
साम्राज्यलक्ष्मीं सहसा लभन्ते । १ ॥

आसीदशेषाचलराजराजो
निवासभूमिर्निखिलेश्वराणाम् ।
हिमालयो नाम हिमांशुमौलि-
स्तनोमि यस्मिंस्तपसां प्रवृद्धिम् ॥ २ ॥

यदीयशृङ्गाग्रहरिन्मणीनां
प्रभाप्ररोहं प्रचुरं समीक्ष्य ।
दूर्वाभ्रमेणोदयशैलशृङ्गा-
द्द्रुतं प्रयान्ति द्युमणेस्तुरङ्गाः ॥ ३ ॥

तदङ्गभङ्गान्तररङ्गरिङ्ग-
द्विहङ्गशृङ्ग............ ।
...............लावदाता
यदुत्तरीयश्रियमातनोति ॥ ४ ॥

मतङ्गजा यत्र म.................

..........................।

दृष्ट्वा प्रतिस्पर्धिगजप्रतीत्या

बद्धादरा युद्ध........भवन्ति ॥ ५ ॥

तटे यदीये तरलं पयोदे

सौदामनीदामसमीक्षमाणाः ।

किरातबालास्तदवाप्तुकामा

मातुर्मुखं वीक्ष्य मुहू रुदन्ति ॥ ६ ॥

पयोमुचः पादपमूलसक्तान्

तटिद्वितानैस्तरुभिर्निबध्य ।

यस्मिन्नमीषामुदरोदकेषु

क्रीडां वितन्वन्ति किरातकन्याः ॥ ७ ॥

शरप्रसूनप्रतिमप्रकाशं

शरत्पयोदं सुतशोऽवलोक्य ।

मदावला यत्र मदावलेपं

मुञ्चन्ति पञ्चाननविभ्रमेण ॥ ८ ॥

अस्तं यदम्भोरुहबान्धवोद्य-

त्कुमुद्वतीनायकयोर्दिनान्ते ।

बिम्बद्वयी यस्य नितान्तगौरी-

गण्डस्फुरत्कुण्डलतां विधत्ते ॥ ९ ॥

समुल्लसन्तीः स्फटिकप्रसाली-

रवेक्ष्य यत्राभ्रनदीभ्रमेण ।

विहर्तुमागत्य विमुच्य वासो
 विलज्जिता यान्ति विलासवत्यः ॥ १० ॥

गुहोपकण्ठेषु रतौ विशीर्णै-
 र्मुक्ताफलैर्यत्र विमिश्रितानि ।
आदाय ताराण्यबलाः किरन्ति
 छत्रेषु कर्तुं सुषिराण्यदृष्ट्वा ॥ ११ ॥

तारावली पुष्पवने यदीये
 विहारवीरुद्वलयावसक्ता ।
अकालपुष्पोद्गमशङ्किनीनां
 मुदं विधत्ते मुहुरङ्गनानाम् ॥ १२ ॥

मधुस्रुतां यत्र महीरुहाणां
 प्रवालबालप्रसवावृतानाम् ।
पुष्पापचाये पुरुहूतपौरा
 निन्दन्ति तन्नन्दनमप्यजस्रम् ॥ १३ ॥

यः सन्ततं गह्वरगर्भरक्त-
 समुच्छ्वसद्गन्धवहच्छलेन ।
सुदुर्वहश्रोणिभरावभग्नो
 निश्वासवातं प्रतिमुञ्चतीव ॥ १४ ॥

यो वंशवानप्यकुलीनमूर्धा
 यश्चापि पाण्डुर्धृतराष्ट्र एवं ।
वृतः प्रसिद्धैरपि विप्रसिद्धै-
 र्यस्सन् गिरीशोऽपि विभाति विष्णुः ॥ १५ ॥

पराजितैर्यः खलु पार्थिवेन्द्रैः
सदा समासेवितपादमूलः ।
विक्रान्तलोकत्रितयो महीया-
न्विभाति सम्राडिव विश्ववीरः ॥ १६ ॥

मुनीन्द्रबृन्दोपहितोपकण्ठो
महेशसान्निध्यपवित्ततोयः ।
तुषारभस्मस्नपिताखिलाङ्गो
महातपस्वीव मृगैः परीतः ॥ १७ ॥

यस्मिन् रजन्यां रजनीकरान्तः
कुरङ्गमालोक्य कुतूहलेन ।
किरातवाला मृगया विहार-
कोलाहलं बिभ्रति मेखलासु ॥ १८ ॥

दोषासु दोषारमणाननानां
भूषाविशेषाधिकसुन्दराणाम् ।
गुहासु यस्मिन्पुरुषा लभन्ते
योषाजनानां पुरुषायितानि ॥ १९ ॥

माकन्दवाटीषु मनोहरासु
मरन्दधारावहमञ्जरीषु ।
मन्दश्चरन्गन्धवहः किराती
रतिश्रमं यत्र नुदत्यजस्रम् ॥ २० ॥

यस्मिन् द्विजाः काञ्चनकान्तिजालै-
रबुध्यमाने दिवसावसाने ।

रथाङ्गनाम्नां रमणीवियोगं
समीक्ष्य सान्ध्यं विधिमाचरन्ति ॥ २१ ॥

यदीयशृङ्गाग्रशिलातलानां
मुक्तामया दर्शनिदर्शनानाम् ।
अन्तस्फुरत्स्वप्रतिबिम्बितानि
दृष्ट्वा निहन्तुं हरयो यतन्ते ॥ २२ ॥

योद्धेव यः खड्गशरासनाढ्यः
कामीव शृङ्गारविशेषकान्तः ।
नाकी वनैकाप्सरसाश्च भर्ता
स्वयं पिनाकीव गुहाभिरामम् ॥ २३ ॥

End:

उपगूढधनञ्जये निकामं
कमलामोदकरे हरौ सरागम् ।
करचक्रमुदश्चयत्युदग्रं
मदनो भीष्म इवाजहत्स्वचापम् ॥ ५० ॥

रविरप्यरविस्मृतांशुभा-
गहरीशोऽपि हरीशरूपधृक् ।
उदजृम्भत सप्तवाहनो-
ऽप्यधिराजः शतपत्रसम्पदाम् ॥ ५१ ॥

घनपरिमलश्लेषैः कौङ्कुमैरङ्गलग्नै-
रतिरभसजनिद्राघूर्णितैरक्षिकोणैः ।
नरपतिभवनेभ्यो निर्गतावाररस्व-
.... ॥ ५२ ॥

जपयज्ञपरैरपि द्विजै-
रजपाराधनसाधनैर्मुहुः ।
अपि मज्जनकामिभिश्चिरा-
त्सरितो भूषितमानमज्जनैः ॥ ५३ ॥

मुखे तदाह्नो मुखजा जपन्तो
मुहुः षडङ्गप्रविलोलहासाः ।
पुरो नटन्त्या इव मोक्षलक्ष्म्याः
कामं प्रचक्रुः करताललीलाम् ॥ ५४ ॥

अत्युच्चसंयाज्यममन्दयाज्यं
प्राज्याज्यमिज्या धनिनां गृहेषु ।
विभज्य हव्यानि समज्य चाज्यै-
रिज्यासमारम्भि यथा विधानम् ॥ ५५ ॥

Colophon: (Leaf No. 27)

इति ईश्वरसुमतिकृतौ पार्वतीपरिणये षष्ठः सर्गः ॥ शुभमस्तु ॥

Subject: Pārvatīpariṇaya. 1-8 Sargas. I. 42. II. 65. III. 65 IV. 58. V. 61. VI. 53. VII. 18. VIII 53.

Remarks:—The Ms. is in a decaying condition. The Ms. abruptly breaks of within the 18th śloka of the 7th Sarga and 53 śloka of the 8th Sarga.

After the 18th śloka of the 7th Sarga, two Subhāṣitas are given:—

अक्ष्णोः प्रीतिमनक्ति चित्तमसकृन्नोक्ति लुम्पत्ययं
सम्पत्तिं महतीं व्यनक्ति विपदं छिन्ते विभिन्ते व्यथाम् ।
वैशिष्ट्यं विशिनष्टि मार्ष्टि जडतां प्रद्वेष्टि दुश्चेष्टितं
सर्वामिष्टमपि प्रयच्छति सतां प्रायेण सन्दर्शनम् ॥ १ ॥

(सदा) रसमयी शीता परमानन्ददायिनी ।

नानन्दयति कं नाम सतां सङ्गमचन्द्रिका ॥

The very last leaf containes some passages related to mīmāmsā beginning with 'ननु वायव्यँ श्वेतमिति and ending with अनाहुतिर्वै जर्तिला इतिवत् ।

The author of this work is one Īśvarasumati. The Manuscript is a rare one and no other copy of the work seems to exist in any other library. The subject of the poem happens to be the marriage of Śiva with Pārvatī. A paper transcript of this Ms. is available in this Library T. V. No. 63.

॥ प्रद्युम्नोत्तरचरितम् ॥

3695. PRADYUMNOTTARACARITAM.

Burnell's Catalogue No. 10257. Page 159. Right column. Substnce—Palm leaf. Size—11½—10½ inches. Leaves—118 (83-91 are blank). Lines—4 to 6 to a Page. Script—Grantha. No. of Granthas—1250. Author—Mṛtyunjaya. Incomplete.

Beginning:

वेदानुदारध्वनिवादयन्ती

वीणामनुल्लङ्घितकर्णनादाम् ।

कदम्बमूलस्थितिरस्तु भूत्यै

कादम्बिनी सच्छविरम्बिका नः ॥ १ ॥

स्थाणोरपर्णोल्लसितापि मूर्तिः

कल्पेत सा काम्यफलाप्तये नः ।

बिभर्ति या कोरकसम्प्ररोहं

बालेन्दुना मौलिविभूषणेन ॥ २ ॥

वन्द्यः स वल्मीकभवो महर्षि-
विंशुद्धया यः स्वयमेव वाण्या ।
सुरस्रवन्त्येव पतिः पशूनां
भुवोऽवताराय कृतोऽ(ता)वलम्बः ॥ ३ ॥

अगम्यभावैः किमनुश्रवैर्न-
श्चकास्ति तेषां सदृशी गरिम्णा ।
विधौ निषेधे च यतः सुबोधा
सा भारती भारतसंप्रणेतुः ॥ ४ ॥

प्रायः प्रसादोपनतेन काल्याः
परार्ध्यताम्बूलरसेन गौर्या ।
सुगन्धयो यस्य गिरः स्वदन्ते
स कोऽपि धन्यः कविरर्चितो नः ॥ ५ ॥

दन्तिस्फुरद्दासरदीपिकाङ्कः
सरत्नखेटाध्वरिसार्वभौमः ।
प्रेम्णानुगृह्णातु परं परं मां
व्याख्याद्रिरं यद्ययैडमूकः ॥ ६ ॥

स राजचूडामणियायजूकः
प्रवागधीशः प्रथते गुरुर्नः ;
स्वच्छन्दतः सर्वपथीनयापि
न यस्य वाचा विजहे विशुद्धिः ॥ ७ ॥

अय्याध्वरीन्दोरनुकम्पनीये
द्वनौ मयि स्निह्यति दृष्टिपातः ।

तिष्ठेत यस्मिन् सुरदेशिकोऽपि
प्रायेण काव्याध्वनि संशयं नः ॥ ८ ॥

अभिख्यया कीर्तिषु सत्कवीना-
मस्मादृशैः सम्प्रयुयुक्षितानाम् ।
वाचां यदीयः शरणं प्रयोगः
तानेव पूर्वान् प्रति नः प्रणामः ॥ ९ ॥

आजानसिद्धप्रतिभातिरेकाः
संशीलितोच्चावचदर्शनास्ते ।
अन्वग्रहीष्यन्कवयस्त्रिलोकीं
न चेत्तदा किं व्युदपत्स्यतैषा ॥ १० ॥

आचार्यतिप्पाध्वरिणो जयन्ति
सरस्वती यद्वदनैकभूमिः ।
चिराय पत्युर्वदनेषु जात-
ञ्झड़ाति पर्यायनिवासखेदम् ॥ ११ ॥

विलिल्यिरे कीटविलायमुर्व्यां
कालेन पूर्वे कति किम्पचानाः ।
जीवन्ति धन्यास्त इमे यदीय-
मद्यापि जागर्ति यशः प्रबन्धैः ॥ १२ ॥

आनन्दमन्यादृशमावहन्ती
यशश्च दीर्घं दिशती परस्तात् ।
न सन्ततिर्यस्य न साहिती वा
किञ्जन्मना तस्य कृशोदयेन ॥ १३ ॥

नैवोपदेशान्न च वातिदेशा-
दन्येषु सङ्क्रामति यः कथञ्चित् ।
भाग्योदयैकप्रतिलभ्यजन्मा
स कोऽपि सारस्वतसम्प्रदायः ॥ १४ ॥

रसेन भावोदयपेशलेन
गुणैश्च सालङ्कृतिभिः सुजाता ।
शय्यानुषङ्गोचितरीतिचारुः
सम्भुज्यते सारविदैव सूक्तिः ॥ १५ ॥

प्राज्ञस्य मात्सर्यनियन्त्रितोऽपि
सूक्तौ स्वतः कम्पत एव मौलिः
नैसर्गिको ह्येष गुणः सुधाया-
श्चेतो यदाह्लादयति द्विषोऽपि ॥

चित्रेषु सन्नह्यतु सर्व एव
कश्चिद्रसज्ञः किमु नोपलभ्यः ।
स चेद्विधूनोति शिरः कदाचि-
च्चेनैव किं नः फलितो न कामः ॥ १७ ॥

वागेव पुम्सो रस इत्यमुष्मि-
न्नर्थे तदर्थश्रुतिरेव मानम् ।
मुखं कवेरेव स तु प्रविष्टो
रसान्प्रसूते नव नापरस्य ॥ १८ ॥

भावैर्गुणैर्व्यञ्जनया रसैरि-
त्यर्घाधिकैरुत्कचितापि रत्नैः ।

कान्तेव सूक्तिः कुसुमप्रवालैः
  शब्दार्थचित्रैरपि याति शोभाम् ॥ १९ ॥

स्थितिं पुराणीमनुसंप्रवृत्ता
  धिनोति धातुर्न हि कल्पना नः ।
परन्त्वदृष्टाश्रुतगोचरा सा
  रसप्रकर्षोन्मनसां कवीनाम् ॥ २० ॥

सुलक्षणामस्खलितप्रसादां
  वाचं निजां गामिव कामदोग्ध्रीम् ।
आस्कन्दति व्याघ्र इवानभिज्ञे
  न प्रत्यवेयुः कथमर्पयन्तः ॥ २१ ॥

अगाधसारस्वतसंप्लवान्त-
  रनाप्नुवन्नेव लघुः प्रवेशम् ।
कियच्चिरं नाम बत प्रसन्ने
  जिघृक्षते दूषणपङ्कमस्मिन् ॥ २२ ॥

दुर्मेधसां सूक्तिनिगुम्भनेषु
  प्रायो विपर्यासफलः प्रयासः ।
नेत्रातुराणां हि निरीक्षितव्ये-
  ष्वालोक एव प्रतिरोधहेतुः ॥ २३ ॥

असन्मुखीना सुभगादृतेषु
  गुणेषु विस्पष्टतरार्थभावा ।
क्षुद्रा न वेश्येव खलप्रणीति-
  र्मुदे रसप्रौढिमतो जनस्य ॥ २४ ॥

द्वित्राणि संयोज्य दुरक्षराणि
तेनैव वाचास्पतितां प्रपन्नः ।
वचोविपाकव्यसनश्रमेण
न क्लिश्यते यः स तु नाम धन्यः ॥ २५ ॥

नैवेह सन्दर्भगुणा न भावा
न वा रसानामपरिक्षितिश्च ।
तथापि सुश्लोकतयैव नेतु-
र्मनीषिणः कर्म ममाद्रियन्ताम् ॥ २६ ॥

भारस्य भूमेरवरोपणाय
प्राप्तो यदूनां हरिरन्ववायम् ।
शशास सम्राखिलशत्रुरुर्वी
क्रोडी कृतामम्बुधिभिश्चतुर्भिः ॥ २७ ॥

सनाथयन्द्वारवतीं प्ररूढा-
मुदन्वतः पाथसि पश्चिमस्य ।
न जातु शौरिः स्पृहयाम्बभूव
श्वेतान्तरीपान्तरविश्रमाय ॥ २८ ॥

End:

तप्तभूरितपसः समुन्नतां
प्राप्य भूतिमवधीरितद्विषः ।
भुक्तसर्वविषयस्य संयुगे
मृत्युरस्य न हि याति शोच्यताम् ॥ ६८ ॥

सा त्वमात्मवधपातकोद्यमा-
दारमप्रतिनिवर्तितुं पुरीम् ।

स्वानुरूपवरसम्प्रयुक्तया
विस्मरिष्यसि शुचं तनूजया ॥ ६९ ॥

त्यज्यतां पतिसमागमभ्रमः
प्रेत्य केन क इवानुषज्यते ।
स्वस्वपूर्वचरितोचितागति-
र्भिन्नभिन्नविषया हि देहिनाम् ॥ ७० ॥

तत्प्रदाय गुणिने गुणोज्वला-
मात्मना हरितनूभवे सुतां ।
आरचय्य च तपः सुदुष्करं
लप्स्यसे गतिमदुष्कृदाश्रिताम् ॥ ७१ ॥

इत्यसावुशनसः सहेतुभिः
स्तैर्वचोभिरुपरम्य साहसात् ।
प्राविशत्पतिशुचेव सर्वतः
शून्यगोपुरचतुष्पथां पुरीम् ॥ ७२ ॥

तावद्भयाकुलतया दनुजैः सदारैः
तामुज्झितां समरमूर्ध्नि हतावशेषैः ।
अध्यास्य वज्रनगरीं सहिता दुहित्रा
दैत्याङ्गना मुररिपोः स्तनयाय तस्थे ॥' ७३ ॥

Colophon : (See Leaf No. 15.)

इति दन्तिद्योतिदिवाप्रदीपाङ्कसत्यमङ्गलश्रीनिवासदीक्षितवंश्येन घटिकाशतकवेरय्यादीक्षितस्य पुत्रेण मृत्युञ्जयेन विरचिते प्रद्युम्नोत्तरचरिते प्रथमः सर्गः ॥

See Leaf No. last.

इत्यय्याध्वरिसूनोर्मृत्युञ्जयस्य कृतौ प्रद्युम्नोत्तरचरिते एकादशः सर्गः ॥

हरिः ॐम् ॥

Subject : Pradyumnottarcarita. 1-11 Sargas.

Sarga.	Ślokas.	Leaf.
1	89	1—15
2	82	28
3	76	39
4	92	49
5	89	61
6	65	70
7	97	82
8	?	83—91 blank leaves
9	82	100
10	94	108
11	73	118

Remarks: The Ms. is in good condition. The 8th Sarga is omitted herein.

Mṛtyuñjaya the author of the Pradyumnottaracarita is a descendent of the famous Ratnakheṭa Śrīnivāsadīkṣita, the father of Rājacūḍāmaṇi Dīkṣita. The author's father was one Ayyā Dīkṣita who could compose 100 verses in one hour.

The work has not been printed so far. A paper transcript of this work is available in this library. See T. V. No. 64.

॥ प्रह्लादविजयः ॥

3696. PRAHLĀDAVIJAYAḤ.

Burnell's Catalogue No. 10193. Page 159. Right column.

Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—113

(55-167). Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—2500. Author—Veṅkaṭanātha. Complete. (1-26 Adhyāyas.)

Beginning:

हरिः ॐ ॥ शुभमस्तु ॥

॥ प्रह्लादविजयम् (ः) ॥

श्रीभारते भागवते च विष्णु-
धर्मोत्तरे वैष्णव (मत्स्ययोश्च ।
श्रीनारसिंह्येऽप्यथ नारदीये
कौर्मे पुराणेषु तथापरेषु) ॥

प्रह्लादमुद्दिश्य कथाः प्रवृत्ता
यास्ताः समाहृत्य तदानुपू (र्व्या) ।
(श्लोकांश्च तानेत्र) सुसङ्गतार्थं
संयोज्य मोदं विदुषां करिष्ये ॥

जेष्यामीति प्रतिज्ञाय सवितावमितौजसम् ।
जितवानजितं विष्णुं यः परां भक्तिमुद्वहन् ॥

तस्य भागवताग्र्यस्य प्रह्लादस्य महात्मनः ।
प्रह्लादविजयं नाम वक्ष्ये चरितमद्भुतम् ॥

॥ श्रीगुरुभ्यो नमः ॥

ताम्रातनोति तिरुवेङ्कटनाथभक्तिः
प्रह्लादयोगिरचितं परमं चरित्रम् ।
सिन्धुं विगाह्य जनितानि विमुक्तिमुक्ता-
जालानि हस्तसुलभानि रसाश्रयाणाम् ॥

श्री सरस्वत्यै नमः । श्रीवेदव्यासाय नमः ॥

श्रीवासुदेवब्रह्मणे नमः ॥

प्रह्लादं नितरां निजाङ्घ्रिशरणं कुर्वन्यथार्थाभिधं
यस्तम्भा(द्दुदभूद्गभीर)नेनदैदैंत्यान्मुहुः स्तम्भयन् ।
तं(भक्तावनबद्धकङ्कणमहं लक्ष्मीमहीसे)वितं
श्रीगोपालमहर्निशं हृदि भजे सर्वार्थसंसिद्धये ॥

ॐ तत्सत् ॥ श्रीमन्नारदीये ॥

श्रीमत्पद्मजतार्क्ष्यफल्गुनशुकप्रह्लादभीष्मोद्धव-
व्यासाक्रूरपराशरध्रुवमुखान्वन्दे मुकुन्दप्रियान् ।
यैस्तीर्थैरिव पावितं त्रिभुवनं रत्नैरिवालङ्कृतं
सद्वैद्यैरिव रक्षितं सुखकरैश्चन्द्रैरिवाप्यायितम् ॥

अस्ति त्रैलोक्यविख्यातं वनं नैमिशसंज्ञितम् ।
पवित्रं गोमतीतीरे नित्यपुष्पफलार्धिमत् ॥

स्वलङ्कृता महात्मानः श्रीभागवतलक्षणैः ।
ऋषयो यत्र सत्रेण चिरं हरिमपूजयन् ॥

विबभुः शाखिनो यत्र प्रोत्फुल्लकुसुमोत्कराः ।
रत्नोज्वला इव सुरा यज्ञभागार्थमागताः ॥

तत्राश्रमे......सीद्ब्रह्मलोकनिभः शुभः ।
सपुत्रपशुदाराणां महर्षीणां सुखावहः ।
दत्तमिष्टं हुतं जप्तं भुक्तं पीतञ्च भाषितम् ॥
यत्किञ्चि................जनाः ।
तस्मिन्महाश्रमे(पुण्याः)शौनकाद्या महर्षयः ॥

अवसन्विष्णुपादाब्जद्वन्द्वध्यानपरायणाः ।
ते कदाचित्समासीनं सूतं पप्रच्छुरादरात् ॥

❀ ❀ ❀

पराशरः ॥ श्रीभागवते ॥

एवं वृतः शतधृतिर्हिरण्यकशिपोरथ ।
प्रादात्तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् ॥

ब्रह्मा ॥....मे दुर्लभाः पुंसो यान्वृणीषे वरान्मम ।
तथापि वितराम्यङ्ग वरान्यद्यपि दुर्लभान् ॥

ततो जगाम भगवानमोघानुग्रहो विभुः ।
पूजितो सुरवर्येण स्तूयमानः प्रजेश्वरैः ॥

हरिवंशे ॥

ततो देवाश्च नागाश्च गन्धर्वा ऋषिभिः सह ।
वरप्रदानं श्रुत्वैव पितामहमुपस्थिताः ॥

देवाः ॥

वरेणानेन भगवन् बाधयिष्यति नोऽसुरः ।
प्रसीद, नस्त्वं भगवन् वधोऽस्येह विचिन्त्यताम् ॥

सर्वलोकहितं वाक्यं श्रुत्वा देवः प्रजापतिः ।
आश्वासयामास सुरान् सुशीतैर्वचनाम्बुभिः ॥

ब्रह्मा ॥

अवश्यं त्रिदशास्तेन प्राप्तव्यं तपसः फलम् ।
तपसोऽन्ते च भगवान् वधं विष्णुः करिष्यति ॥

तच्छ्रुत्वा त्रिदशा वाक्यं ततः कमलजन्मनः ।

स्वानि स्थानानि दिव्यानि प्रतिजग्मुर्मुदान्विताः ॥

इति प्रह्लादविजये प्रथमोऽध्यायः ॥

End:

श्रीपराशरः ॥

एवंप्रभावो दैत्येन्द्रो मैत्रेयोऽभून्महामतिः ।
प्रह्लादो भगवद्भक्तो यं त्वं मामनुपृच्छसि ॥

यस्यैतच्चरितं तस्य प्रह्लादस्य महात्मनः ।
शृणोति तस्य पापानि सद्यो गच्छन्ति संक्षयम् ॥

अहोरात्रकृतं पापं प्रह्लादचरितं नरः ।
शृण्वन् पठंश्च........व्यपोहति न संशयः ॥

पौर्णमास्याममावास्यामष्टम्यामथवा पठन् ।
द्वादश्यां वा तदाप्नोति स प्रदानफलं नरः ॥

प्रह्लादं सकलापत्सु यथा रक्षितवान्हरिः ।
तथा रक्षति यस्तस्य शृणोति चरितं नरः ॥

ब्रह्माण्डोत्तरभागे ॥

य एनं शरणं यान्ति नरसिंहं भयागमे ।
नारसिंहस्त्वयं देवस्तं भयेभ्योऽपि रक्षति ॥

उग्रोऽप्यनुग्र एवायं स्वभक्तानां नृकेसरी ।
केसरीव स्वभक्तानामन्येषामुग्रविग्रहः ॥

श्रीभागवते ॥

एतद्य आदिपुरुषस्य मृगेन्द्रलीलां
दैत्येन्द्रयूथपवधं प्रयतः पठेत ।

दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं
श्रुत्वाऽनुभावमकुतोभयमेति लोकम् ॥

Colophon:

इति श्रीमद्वेङ्कटनाथस्य योजिते श्रीप्रह्लादविजये षड्विंशोऽध्यायः ॥

ॐ तत्सत् ॥ हरिः ॐम् ॥ शुभमस्तु ॥

श्रियःपतये नमः ॥ प्रह्लादविजयं(:)सम्पूर्णं(:) ।

Subject: Prahlāda Vijaya. 1-26 Adhyāyas.

Adhyāya	Leaf.	Adhyāya.	Leaf
I.	61	XIV.	107
II.	65	XV.	113
III.	68	XVI.	118
IV.	73	XVII.	121
V.	76	XVIII.	124
VI.	79	XIX.	132
VII.	83	XX.	135
VIII.	86	XXI.	144
IX.	88	XXII.	148
X.	91	XXIII.	151
XI.	93	XXIV.	154
XII.	97	XXV.	157
XIII.	103	XXVI.	167

Remarks:—The Ms. is in good condition. This is a compilation of Purāṇic passages and gives the information found in several purāṇas viz., Bhārata, Bhāgavata Viṣṇupurāṇa etc. regarding Prahlāda. The last Adhyāya comprises of

(1) प्रह्लादकृतनृसिंहशतकं, (2) नृसिंहसहस्रनाम (3) नृसिंहकवचम्

Is this Veṅkaṭanātha, the same as the teacher of Dharmarajādhvarīndra—the author of the Vedāntaparibhāṣā ?

॥ प्रासभारतम् ॥

3697. PRĀSABHĀRATAM.

Burnell's Catalogue No. 10129. Page 159. Right column. Substance—Palm leaf. Size—15 × 1½ inches. Leaves—48. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—1400. Author—Sūryanārāyaṇakavi. Complete.

Beginning:

....

....न्यग्रयायी ।
तुङ्गारम्भस्वानुजे दत्तराज्यो
भङ्गापन्नारातिभूपो बभूव ॥ १३ ॥

पाराशर्यास्सत्यवत्यास्तनूजो
दारान् स्वान्दा....भस्य ।
...राभौ द्वौ स्वरुछवृत्तेः कुमारौ
माराकारावन्धपाण्डू प्रशस्तौ ॥ १४ ॥

राजा पाण्डू राज्यभारं स दध्रे
स्वाजावुच्चैः स्व....वर्गः ।
पूजार्हा ये पूजितास्तेन तेऽलं
स्वोजाः कुन्तीमद्रजाश्चोपयेमे ॥ १५ ॥

साकं ताभ्यामङ्गनाभ्यां स पाण्डुः
कोकं सत्याप्रेम........वन् ।
भूकम्पश्चोत्पादयन् सैन्यभारा-
देकं प्रापाद्रीन्द्रमाखेटहेतोः ॥ १६ ॥

कान्तारे तत्प्रान्तसीमोपजातेऽ-
शान्तात्मानं हस्तिशार्दूल... ।
सान्तान् बाणैः सञ्चचारैष कुर्वन्
क्लान्त्यानार्यः साध्वचर्यश्चिरं सः ॥ १७ ॥

एणाकारं तापसद्वन्द्वमग्रे
क्षीणायुः सङ्क्रीडमानं स वीक्ष्य ।
पाणावा....बाणं तदीयान्
प्राणान् हर्तुं तत्र वेगान्मुमोच ॥ १८ ॥

प्रोतास्त्रेणाशापि तेनावनीशो
हा तादृक्त्वं यासि चेत् स्त्रीरिरंसुः ।
वीतासुः सन् यास्यसि क्षिप्र(मेव
प्रेताधी)शावासमित्यक्षमेण ॥ १९ ॥

शापाग्निं तं विभ्रदन्तः शमीव-
त्पापापेतः पाण्डुराजः स्वसैनाम् ।
चापासि श्रीसंयुतां सन्निवर्त्य
प्रापाद्रीन्द्रं............... ॥ २० ॥

आर्ये नारी लक्षणे नोत्तमेना-
वार्ये स्नेहादन्वयातां पतिं तम् ।
भार्ये भक्त्या श्रद्धयैवेषताभ्या-
....क्तिरास्तान्वितः सन् ॥ २१ ॥

तत्रावासं तन्वतो भूमिभर्तुः
सत्राशानां सन्मखैर्मोददस्य ।

पुत्राभावाङ्कूरिशोको जिजृम्भेऽ-
पु ......न ह्यस्तिलोको विदुर्यत् ॥ २२ ॥

आहाभीष्टाभङ्गनामाचतापः
स्वाहातुर्यां स्वश्रिया सोऽयमाद्याम् ।
नीहाराभो न्यक्कृताशेषभोगो
(मोहा)देतां वाचमाचारशुद्धाम् ॥ २३ ॥

कान्ते कुन्ति क्षत्रियाणि प्रवीणे
शान्ते शश्वन्मोदितश्रीमुकुन्दे ।
स्वान्ते मे शुग्वर्धतेऽपुत्रकत्वा-
न्मां(ते शक्त्या) कर्तुमर्हस्यशोकम् ॥ २४ ॥

अन्यानेत्यातिप्रशस्यनृहस्त्वं
धन्यस्तेभ्यः साधुपुत्राम् लभस्व ।
तन्यायः प्राक्क्षत्रनारीभिराचो
जन्यावन्या.... तेषु ॥ २५ ॥

इत्याख्यातर्यत्र भर्तर्यवन्ती
सत्याद्या सा शीलमाह स कुन्ती ।
मत्या नाहं मर्त्यमिच्छाम्यपत्य-
कृत्यायेदं कीर्तिरस्माद्विधाभिः ॥ २६ ॥

....पुरे मत्पितुर्वर्तमानः
सश्चार्युर्व्यां सन्मुनिः क्रोधशाली ।
स्वश्चारुश्रीदेवतावश्यमन्त्रं
पश्चाक्षर्याः पाठशीलोऽदिशन्माम् ॥ २७ ॥

End :

सलिलमथ निवापं शासनात्तत्रमातु-
स्तुलितसुरवराय स्वर्गतायार्कजाय ।
हलिसहजसहायोऽयं विषादेन दत्त्वा
मलिनजनदुरापां मर्त्यराड् कीर्तिमाप ॥ ७८ ॥

अजातारिस्पष्टं हरिसहजबन्धुप्रियसुहृ-
द्द्विजानन्द्यात्मालं द्रुपदतनयामावृसहितः ।
गजाश्वश्रीपत्तिप्रवररथयूथैः सममगात्
स जातानन्दः स्वांपुरमतनुवाद्यारवयुतः ॥ ७९ ॥

पितामहमुखादथो निखिलधर्मनीत्यागमाः
श्रुताः सुमतिशालिना सुखकृता सुराणां नृणाम् ।
सता सरसभाषिणा सकलदुःखसंहारिणा
कृता वसुमती सती चिरमनेन सैकप्रिया ॥ ८० ॥

भूभाराहरणाय भूतलकृतानेकावतारे
....
....
....
.... ॥ ८१ ॥

..मिवागमास्तदनुजाश्चत्वार आर्यं नृपं
सन्धा विहृतमानसाः समधियस्सेवन्त एव स ते ।
सिन्धावुद्भवमेयुषीव कमला विश्वम्भरे द्रौपदीं-
बन्धावत्र विशेषसक्तिसहिता विश्वेडिता तिष्ठत ॥८२॥

सुरनरसुखकारी सोमवंशावतंसो
विरचितहयमेधः पाण्डवः पापभीरुः ।

अरमत कुरुपुर्यामश्रितश्रीसमृद्धि-
श्चिरमनुजसहायः पालयन् प्राणभाजः ॥ ८३ ॥
पुत्रः काश्यपविश्वनाथसुमतेः श्रीसूर्यनारायण-
श्चित्रं प्राससमेतभारतमिदं काव्यं कविर्व्यातनोत् ।
अत्र प्रीतिमनुत्तमां सुमतयो यान्त्वेतदाहुः कवे-
रत्रत्यं फलमिन्दिरापतिरलं दद्यात् परोक्षं फलम् ॥ ८४ ॥

Colophon:

इति काश्यपकुलतिलकविश्वनाथोपाध्यायसूनुना सूर्यनारायणकविना रचिते प्रासभारते (एकादशः सर्गः)

Subject: Prāsabhārata. 1-11 Sargas.

Sarga.	Leaf.	Ślokas.	Sarga.	Leaf.	Ślokas.
I.	9.	105.	VI.	37.	92.
II.	17.	103.	VII.	42.	100.
III.	21.	69.	VIII.	49.	74.
IV.	27.	104.	IX.	56.	110.
V.	32.	95.	X.	62.	73.

XI. Sarga Leaf 68. 84 Slokas.

Remarks:—The Ms. is in a fairly good condition. The Ms. abruptly begins with 13th śloka of the first sarga. On the title page is given:—

'मेलक्कावेरि शेषाद्रिदीक्षितानां पुस्तकं विश्वनाथोपाध्यायसूनु सूर्यनारायणोपाध्याय विरचितं प्रासभारतम् ॥

The author of the work is one Sūryanārāyaṇa Sumati, son of Viśvanātha Sumati. It is not known whether this author is in any way connected with Īśvarasumati referred to previously. The work deals with the story of the Mahābhārata.

The author's descendants are still traceable in the Tinnevelly District.

॥ प्रासभारतम् ॥

3698. PRĀSABHĀRATAM.

Burnell's Catalogue No. 10128. Page 159. Right column. Substance—Palm Leaf. Size- 17¾×1½ inches. Leaves—40. Lines—8 to a Page. Script—Telugu. No. of Granthas—1400. Author—Sūryanārāyaṇakavi. Complete (1-11 Sargas).

Beginning, end, colophon and subject—Same as No. 3697.

Remarks :—The Ms. is in good condition. See Remarks under No. 3697. This is a copy of 3697.

॥ बालभारतम् ॥

3699. BĀLABHĀRATAM.

Burnell's Catalogue No. 10122. Page 159. Right column. Substance—Palm leaf. Size—16×1¼ inches. Leaves—109 (48-156). Lines—6 to a Page. Script—Telugu. No. of Granthas—1350. Author—Agastya Paṇḍita. Incomplete (1-11 Sargas.)

Beginning :

अस्त्यत्रिनेत्रप्रभवः कलात्मा
शशीति नक्षत्रगणस्य नाथः ।
यं वारिजश्रीहरमाप्तवाचो
वामं हरेर्लोचनमामनन्ति ॥ १ ॥

सेव्यः सुराणां हिमवर्षिपादः
सम्भावनीयः शिरसा शिवेन ।

महीध्रभर्त्रेव तमोऽपहन्त्रीं
यः कौमुदीं दिव्यनदीं प्रसूते ॥ २ ॥

न जाह्नवीयैश्च न यामुनैश्च
न चापरासां सरितां पयोभिः ।
यस्योदयेनैव सुजातधाम्नो
बंहीयसीमृद्धिमुपैति वार्धिः ॥ ३ ॥

बुधस्ततोभून्नव सुग्रहेषु
रत्नेषु मुक्ताफलवन्मनोज्ञः ।
यः कर्दमापत्यमिलाभिधानं
पर्यग्रहीत् पञ्चशरायुधार्तः ॥ ४ ॥

तस्यात्मजोऽभूत्पुरुहूतसारः
पुरूरवा भूवलयस्य गोप्ता ।
नारायणोरुप्रभवां स्त्रियं यो
जयश्रिया सार्धमलब्धदैत्यात् ॥ ५ ॥

तस्यायुरायुर्दमनो रिपूणा-
मासीदनूनः स्वगुणैस्तनूजः ।
हृष्यद्धरित्रीपुलकाङ्कुराभा
रराज यस्याध्वरयूपराजिः ॥ ६ ॥

पुत्रस्तदीयो नहुषोऽधिरूढ-
स्त्रिविष्टपं पुण्यपरम्पराभिः ।
कुत्रापि सुत्राम्णि चिरं प्रणष्टे
स्वाराज्यमिन्द्रः स्वयमेव चक्रे ॥ ७ ॥

अजायतास्मादनघो ययातिः
पेष्टुं द्विषामुच्चलितस्य यस्य ।
नभस्युदीर्णो बलरेणुरासी-
द्वनो यशः केतकजन्महेतुः ॥ ८ ॥

पुण्यैस्सुतस्तस्य बभूव पूरुः
शापोपचां भृगुजन्मनो (क्रोधोदितां दैत्यपुरोधसो यः) ।
पितुर्निदेशान्निजवंशलक्ष्म्या
प्रागेव जग्राह जरां प्रहृष्टः ॥ ९ ॥

तदन्वयोदन्वति जन्मभाजा-
मुदग्रतेजोभृतदिङ्मुखानाम् ।
मध्ये बहूनां भरतः प्रतीतो राज्ञां
मणीनामिव कौस्तुभोऽभूत् ॥ १० ॥

सेनासु येनासुरनायकानां
नीतासु शान्तिं निशितैः क्षुरप्रैः ।
शरासनं शातमखं नवाना-
मम्भोमुचामाभरणं बभूव ॥ ११ ॥

गोत्रे तदीये महति प्रशस्ते
बभूव हस्ती बहुमान्यसत्वः ।
यः शत्रुशुद्धान्तवधूमुखेषु
तमालपत्रापचयं वितेने ॥ १२ ॥

वस्वोकसाराममरावतीञ्च
श्रीचारुताभ्यामतिवर्तमानम् ।

यक्षामरेशाभ्यधिकेन येन
चक्रे पुरं हस्तिननामधेयम् ॥ १३ ॥

कुले कुरुस्तस्य पतिर्धरित्र्याः
कुलाद्रिसारः किल जन्म लेभे ।
असम्मितैश्वर्यवतो विचित्रं
यस्यातपत्रं सितमेकमेव ॥ १४ ॥

तत्सन्ततौ शन्तनुरूर्जितश्री-
रुच्छ्रायवत्यामुदपादि राजा ।
दातुर्यतः स्वास्थ्यमियाय नित्यं
प्रत्यर्थिनां संहतिरर्थिनाञ्च ॥ १५ ॥

स पौरवः पौरुषमोचितारि-
र्महारथो जातु रथाधिरूढः ।
मृगेन्द्रसत्त्वो मृगयां विधाय
त्रिस्रोतसस्तीरभुवं प्रपेदे ॥ १६ ॥

सा तत्र मूर्तासरिदुत्तरीय-
प्रकाशितैकस्तनमुद्वहन्ती ।
अतिष्ठत स्मेरमुखेन्दुरस्मै
धनुष्मते पुष्पशरोपमाय ॥ १७ ॥

अभीक्ष्णमाखेटविहारखिन्नो
नृपस्तदा निर्मलकान्तिपूरम् ।
पिबन्नदी विस्मयविस्तृतेन
जगाम नेत्राञ्जलिना न तृप्तिम् ॥ १८ ॥

तथा विधायां नृपतेरहेतु-
र्बभूव तस्यामभिलाषबन्धः ।
पुंसां मनः पूरुकुलोद्भवानां
जागर्ति वस्तुन्यभिजात एव ॥ १९ ॥

अथाब्रवीदभ्रनदीमदीना-
न चेत्परस्यासि परिग्रहस्त्वम् ।
राज्यं शरीरं मम जीवितञ्च
सुभ्रु त्वदायत्तमवेहि सर्वम् ॥ २० ॥

End:

इति वादिनमीषदुद्धतं
स्मितवाक्यात्स्यमवोचदर्जुनः ।
मरुतामपि विष्टराण्यमी
ध्रुवमर्हन्ति न तावकं पुनः ॥ ७४ ॥

यतिवेषभृता तव स्थितं
सविधेयेन स एष धर्मजः ।
चतुरम्बुधिमध्यवर्तिन-
श्चरणावस्य नृपाः सिषेविरे ॥ ७५ ॥

अनिलस्य सुतोऽयमूर्जितो
भवता सूदपतिर्व्यधायि यः ।
अवतंसति यस्य सुभ्रुवां
नवसौगन्धिकगन्धि यद्यशः ॥ ७६ ॥

अभिजातगुणाविमौ यमौ
सरवाचस्पतिसन्निभावुभौ ।

तव यौवनवर्यौवनोदयौ
तुरगाणाञ्च गवाञ्च शिक्षकौ ॥ ७७ ॥

द्रुपदस्य सुतोऽयमुज्ज्वला-
निहितायाः स्वगृहे सुदेष्णया ।
निहताः प्रबलेन यत्कृते
निशि भीमेन शतञ्च कीचकाः ॥ ७८ ॥

इति वादिनि बभ्रुवाजिनि
क्षितिपं व्याहरति स्म मारुतिः ।
अयमिन्द्रसुतो धनुष्मतां
वशिनाञ्च प्रथमो जगत्त्रये ॥ ७९ ॥

बहु यस्य परीक्ष्य विक्रमं
भजतः संयति कान्दिशीकताम् ।
सगणस्य हरेर्ध्रुवं यशो
मलिनं खाण्डववह्निधूम्यया ॥ ८० ॥

पुरवैरिणि यस्य सन्ततं
चरितश्लाघनकम्पमूर्धनि ।
स्मृतनिर्दयगाण्डवाहति·
शङ्कितेवाभ्रसरित्प्रकम्पते ॥ ८१ ॥

युधि नर्तयति स्म यो धनु-
र्ध्वनयन्नेव कबन्धसंहतिम् ।
तव वर्त्मनि नर्तयंस्त्रियः
स्थितवानेष मृदङ्गवादकः ॥ ८२ ॥

विरताविति मारुतेर्गिरां
पितरं व्याहरदुत्तरो वचः ।
युधि देवसुतः स एष मां
सुकृती मोचितवान्भयादिति ॥ ८३ ॥

स तु मात्स्यपतिर्यथोचितं
सदकार्षान्मुदितः पृथासुतान् ।
अदिशद्विजयाय चोत्तरां
वशिने सा जगृहे स्नुषामुना ॥ ८४ ॥

अथ दूतनिवेदितोदयांस्ता-
न्हरिरागत्य कृती स भागिनेयः ।
वसु वृष्टिभिराततान पूर्णां
स्वनयित्नुर्नभसि ह्रदानिवाद्भिः ॥ ८५ ॥

द्रुपदमागधकेकयाधिप-
प्रभृतिषु सम्मिलितेषु बन्धुषु ।
दुहितरमभिमन्यवे ददौ
महितगुणेऽहनि मात्स्यभूपतिः ॥ ८६ ॥

धौम्येन तस्य मिथुनस्य वनागतेन
निर्वर्तिते परिणये विधिवत्प्रहृष्टाः ।
साकं मुकुन्दमुखबन्धुजनेन पार्था
मात्स्यस्य सद्मनि सुखं न्यवसन्प्रतीताः ॥ ८७ ॥

Colophon :

इति श्रीगदगस्त्यपण्डितकृतौ बालभारते एकादशः सर्गः ॥

Subject: Bālabhārata. 1—11 Sargas.

Sargas	Ślokas.	Leaves.
I.	92	57
II.	117	69
III.	89	77
IV.	74	84
V.	107	94
VI.	105	105
VII.	101	117
VIII.	80	126
IX.	105	136
X.	120	147
XI.	87	156

Remarks:—The Ms. is in good condition. The Ms. abruptly breaks off in the first stanza of the 12th sarga.

Agastyapaṇḍita is the author of this work. Scholars may be aware of the fact that he belonged to the Āndhra country and that he was the famous author of the Pratāparudrīya. Vidyānātha seems to have been only a title conferred on him.

॥ बालभारतम् ॥

3700. BĀLABHĀRATAM.

Burnell's Catalogue No. 10121. Page 159. Right column. Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—62. Lines—5 to a Page. Script—Telugu. No. of Granthas—1250. Author—Agastya Paṇḍita. (1-9 sargas only). Incomplete.

Beginning—Same as No. 3699.

End:

स त्वं जगादार्य न वेत्सि कार्य-
द्विषद्धृतश्रीहरणप्रवणौ ।
भीमार्जुनौ ते सहजौ विहाय
कथं सपत्नीसुतमिच्छसीति ॥ १०१ ॥

कुन्त्यां यथा भद्र ममास्ति भक्ति-
स्तथैव माद्यामपि निर्विशेषा ।
जीवामि मे मातुरहं ततदस्यां
जीवत्ववशावित्यवदत्स यक्षम् ॥ १०२ ॥

धर्मोऽहमस्ति तव वेदितुमानृशंस्यं
यातो मृगत्वमरणिं हृतवान्द्विजातेः ।
सर्वेऽप्यमी त्वदनुजा मदनुग्रहेण
जीवन्त्विति प्रमदवानवदत्स दिव्यम् ॥ १०३ ॥

तीरान्तेषु समुत्थितेषु सहसा सुप्तप्रबुद्धेष्विव
प्रीतं विस्मयिनं च पुत्रमवदत् भूयोऽपि धर्मस्तदा ।
इष्टं रूपमयत्नमेव दधतो भूम्ना प्रसादस्य मे
भूमौ क्वचिदपि त्रयोदशमिमं वर्षं न जानातु वः ॥

इत्युक्तवत्यरणिमाशु वितीर्य तस्मि-
न्नन्तर्हिते सवितरीव दिनावसाने ।
वैतानहव्यवहधूममिलत्तमिस्रं
पार्थास्तपोवनमवापुरवाप्तहर्षाः ॥ १०५ ॥

Colophon:

इत्यगस्त्यकृतौ बालभारते नवमः सर्गः ॥

हरिः ॐ । श्रीसरस्वत्यै नमः । श्रीसाम्बसदाशिवार्पणमस्तु ॥

श्रीगुरुचरणारविन्दाभ्यां नमः ॥

Subject: Bālabhārata. 1-9 sargas only.

Sarga.	Ślokas.	Leaves.	Sarga.	Ślokas.	Leaves.
I.	92	6	V.	106	32
II.	117	14	VI.	105	40
III.	90	20	VII.	100	48
IV.	74	25	VIII.	80	55

Sarga IX. Ślokas 105 Leaves 62.

Remarks:—The Ms. is in good condition. This abruptly ends with the 9th sarga.

॥ बालभारतम् ॥

3701. BĀLABHĀRATAM.

Burnell's Catalogue No. 10123. Page 159. Right column. Substance—Palm leaf. Size—14 × 1 inches. Leaves—101 (77th missing). Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—1350. Author—Agastya Paṇḍita. (1-10 sargas only) Incomplete.

Beginning—Same as No. 3699.

End :

चत्वारः शरनिकरैः कुरुप्रवीरा-
स्त्वैकर्तीकमपि वरूथिनीममथ्नन् ।
दिक्पालद्विपपतयोरदभ्रकाण्डै-
र्गङ्गाया इव सरितस्तटीमुदग्राम् ॥ ११८ ॥

प्रसभं हृतं प्रकटयन् कृतज्ञता-
मनुजेन मात्स्यमहितादमोचयत् ।

अमुना गृहीतमथ तं च राक्षितात्
सुहृदस्ततः प्रिययशाः पृथासुतः ॥ ११९ ॥

हित्वा सुशर्मणि यशः सह गोधनेन
हीते गते निहतशेषबलानुयाते ।
चन्द्रातपक्षपितसैन्यसमीरखेदां
तां यामिनीमवसदध्वनि मात्स्यराजः ॥ १२० ॥

Colophon:

इत्यगस्त्यपण्डितकृतौ बालभारते दशमः सर्गः ॥

Subject: Bālabhārata, 1-10 sargas.

Remarks—The Ms. is in good condition. The Ms. abruptly ends with the 10th sarga and the first śloka of the 11th beginning with the 'अपरेद्युः' is given. Three stray leaves are placed before the 1st leaf, containing some passages from the Mahābhārata.

॥ बालभारतम् ॥

3702. BĀLABHĀRATAM.

Burnell's Catalogue No. 10124. Page 152. Right column. Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves —29. Lines—7 or 8 to Page. Script—Grantha. No. of Granthas—520. Author—Agastya Paṇḍita. (1-4 sargas only). Incomplete.

Beginning—Same as No. 3699.

End:

एतद्विधाय सहसा धनुराततज्य-
मेभिः शरैर्गगनलोलमिदं शरव्यम् ।

युष्मासु भूमिपतयः कृतहस्तमुख्या
यं पातयेत्स परिणेष्यति मत्स्वसारम् ॥ ७५ ॥

Colophon:

इत्यगस्त्यपण्डितकृतौ बालभारते चतुर्थः सर्गः ।

अथैवमाख्याय सखीरजर्य-
श्चिकीर्षितः कार्मुकमाततज्यम् ।
महीपतीन्मञ्चगतान् भगिन्यै
प्रदर्शयन् प्रारभताभिधातुम् ॥ १ ॥

दुर्योधनोऽसौ नृपतिः पुरस्ता-
द्दृष्ट्वा यदीयां श्रियमत्युदग्राम् ।
व्रीळेन गूढः किल दिश्युदीच्यां
कुत्रापि वासं कुरुते कुबेरः ॥ २ ॥

अस्यानुजा मौलिभिरूढरत्नै-
र्दुश्शासनाद्या वसुधाधुरीणाः ।
पुष्णन्त्यमी काञ्चन कान्तिमुद्रां
शेषस्य नागा इव पार्श्वभाजः ॥ ३ ॥

गान्धारनाथः शकुनिर्गरीया-
नसौ यमक्षेपु वदन्ति शौण्डम् ।
आचार्यपुत्रोऽयममुष्य शौर्ये
स एव देवः सदृशः पिनाकी ॥ ४ ॥

आलीभृदङ्गे सहजं तनुत्रं
बालार्कतुल्यद्युतिरेष कर्णः ।
जीमूतवाहस्य शिबेर्दधीचे-
रनन्तरं स्पर्शनतोयमाहुः ॥ ५ ॥

हलायुधोऽसौ हर भूधराभो
विभाति नीलाम्बरयोर्युगेन ।
द्विधाकृतेनैव हलेन रोषा-
त्पूरेण बद्धो यमुनापगायाम् ॥ ६ ॥

वंशे यदूनां विहितावतार-
श्रीवत्सलक्ष्मा पुरुषः स एषः ।
विच्छायतां येन हृते द्युवृक्षे
शचीमुखं नन्दनवत्प्रपेदे ॥ ७ ॥

Subject: Bālabhārata. 1-4 sargas only.

Remarks:—The Ms. is in a fairly good condition. The Ms. abruptly ends with the 7th śloka of the 5th sarga.

॥ बालभारतम् ॥

3703. BĀLABHĀRATAM.

Burnell's Catalogue No. 10125. Page 159. Right column. Substance—Palm leaf. Size—11¾×1 inches. Leaves—37. Lines—6 to 8 to a Page. Script—Grantha. No. of Granthas—530. Author—Agastya Paṇḍita. (5 to 8 sargas only) Incomplete.

Beginning:

अथैवमाख्याय सवीरवर्य-
श्चिकीर्षितः कार्मुकमाततज्यम् ।
महीपतीन्मञ्चगतान् भगिन्यै
प्रदर्शयत् प्रारभताभिधातुम् ॥ १ ॥

दुर्योधनोऽसौ नृपतिः पुरस्ता-
द्दृष्ट्वा यदीयां श्रियमत्युदाराम् ।

व्रीळेन गूढः किल दिश्युदीच्यां
कुत्रापि वासं कुरुते कुबेरः ॥ २ ॥

End:

प्रदर्शितो दूरत एव शम्भुना
तपश्चरन्तं सविपक्तकार्मुकः ।
कृशाकृतिः पाण्डुसुतः कृपाजुषां
मह्रीध्रपुत्र्या मनसान्वगृह्यत ॥ २३ ॥

अथापतन्तं धृतसूकराकृतिं
खुराहतग्रावविनिर्यदार्चिषम् ।
सखेणबाणादलितान्तिकद्रुमं
जिघांसुमालोकत मूकदानवः ॥ २४ ॥

स तं विदित्वा सुरमेव कश्चन
द्विषन्नियुक्तं स्वतपोविघातकम् ।
निहन्तुकामं पदमुच्छ्रितं निजं
क्षितौ विचिक्षेप शरं च कार्मुके ॥ २५ ॥

Colophon: Same as in the corresponding Sarga of No. 3699.

Subject: Bālabhārata 5 to 8 sargas only.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends with the 25th śloka of the 8th sarga.

॥ बालभारतम् ॥

3704. BĀLABHĀRATAM.

Burnell's Catalogue No. 10126. Page 159. Right column. Substance—Palm leaf. Size—17 × 1¼ inches. Leaves—19. Lines—5 to a Page. Script—Grantha. No. of Gran-

thas—290. Author—Agastya Paṇḍita (1st and 2nd sargas only) Incomplete.

Beginning—Same as No. 3699.

End:

प्रणम्य माद्री प्रयता तपोधना-
द्भिरस्तदीयाः प्रतिगृह्णती शुभाः ।
क्षमस्व शाठ्यं सखि कल्मषमीर्ष्यया
ममेति कुन्त्यै परिकल्पिताञ्जलिः ॥ ११३ ॥

सुतान् परिष्वज्य घृताश्रुशीकरे
प्रमृज्य नेत्रे दधती जयाशिषः ।
प्रदक्षिणीकृत्य चितागतं पतिं
शुचिस्मिता प्राविशदाशुशुक्षणिम् ॥ ११४ ॥

नृपस्य पत्नीसहितस्य पाण्डवैः
समापिते तत्र परेतकर्मणि ।
अनैषुरेभिः (सह दुःखितां पृथां
पुरं कुरूणां शतशृङ्गतापसः ॥ ११५ ॥

चिराय पाण्डोर्निधनेन तादृशा
विजृम्भमाणां शुचमम्बिकासुतः ।
तदात्मजातामुपलालनोत्सवै-
र्जहौ पितृव्यस्य य दर्शनेन से ॥ ११६ ॥

सततममितसत्त्वः पाण्डवेषु द्वितीयः
पथिपथि मृदुभांसौ क्रीडतो राजधान्याः ।
विहरत शतसङ्ख्यान् पीडयन्धार्तराष्ट्रान्
सुत इव विनतायाः शैशवे काद्रवेयान् ॥ ११७ ॥)

Colophon: Same as in the corresponding Sarga of No. 3699.

Subject: Bālabhārata. I and II sargas only.

Remarks:—The Ms. is in a fairly good condition. The Ms. abruptly ends with the 115th śloka of the 2nd sarga.

॥ बालभारतम् ॥

3705. BĀLABHĀRATAM.

Burnell's Catalogue No. 10121. Page 159. Right column. Substance—Palm leaf. Size—18½×1 inches. Leaves—55 (1-31 and 1-24). Lines—4 or 5 to Page. Script—Grantha. No. of Granthas—570. Author—Agastya Paṇḍita (2nd 7th 8th and 9th sargas only). Incomplete.

Beginning:

अथ क्षितीशस्य यथाविधि द्विजैः
समापिते कर्मणि पारलौकिके ।
सरित्सु (तं वीक्ष्य समीपवर्तिनं
समाददे योजनगन्धया वचः ॥ १ ॥)

गते तव भ्रातरि वत्स पञ्चतां
चिराय नश्चान्द्रमसं महत् कु(लम् ।
अदृष्टसन्तानतया न शोभते
वनं हरेः प्राङ्मथनादिवोदधेः) ॥ २ ॥

अवेहि विद्वन्नखिलेन वाङ्मयं
क्रियाः समस्ताः सम(योचिता अपि ।
विधीयतां देवरधर्मतस्त्वया
सुतोदयः काशि)पतेरपत्ययोः ॥ ३ ॥

End:

राजन्मृगः कोऽप्यरणिं मदीयां
हृत्वा विषाणेन तरौ विषक्ताम् ।
उतस्तरस्वी विपिनं विगाह्य
मूर्तो नभस्वानिव धावतीति ॥ ८२ ॥

तस्याग्निहोत्रस्य विशङ्क्य विघ्नं
प्रत्याजिहीर्षन्नरणिं महीशः ।
पदानुसारेण जिघांसुरेणं
सहानुजैर्धन्विभिरन्वधावत् ॥ ८३ ॥

क्षणं धरित्र्यां क्षणमन्तरिक्षे
शृङ्गाग्रलग्नारणिरीक्ष्यमाणः ।
तेषांमिषूणामिव लोचनाना-
मालक्ष्यभावं हरिणः प्रपेदे ॥ ८४ ॥

चिरं तमन्विष्य वने विषण्णाः
रवौ ललाटं तपतां प्रयाते ।
कामप्युदन्यातुरतां गतास्ते
वन्या इवेभा वटमूलमापुः ॥ ८५ ॥

Colophon: Same as in the corresponding Sarga of No. 3699.

Subject: Bālabhārata 2nd, 7th, 8th and 9th sargas.

Remarks:—The Ms. is in a much decaying condition. This Ms. abruptly ends with the 85th śloka of the 9th sarga. There are five stray leaves at the end, containing the declensional forms of सर्व, सखिन् etc.

॥ बालभारतव्याख्या ॥

3706. BĀLABHĀRATAVYĀKHYĀ.

Burnell's Catalogue No. 10127. Page 159. Right column.

Substance—Palm leaf. Size—$14\frac{3}{4} \times 1\frac{1}{2}$ inches. Leaves—178. Lines—6 to a Page. Script—Telugu. No. of Granthas—2650. Author—Sāḷuvatimmayadaṇḍanātha. (sargas 1-10) Incomplete.

Beginning:

....

......शिमित्रसत्प्रकाशम् ।
आश्चर्यं मधुसमये सुवर्णवृष्टिं
धारालां जनयति कृष्णरायमेघः ॥

तद्वंशप्रभवनृपाल............
..........................प्रवीणः ।
स्वायत्तीकृतनिखिलार्थनीतिविद्याः
कौण्डिन्यान्वयजलुषोऽभवन्नमात्याः ॥

विहासरेखा विजितेन्दिरा......
.... ।
...स हि नन्दिराजः
स तेषु रूढोऽजनि नन्दिराजः ॥

तस्य सूनुरभवन्महामति-
र्दानशौर्यकरुणानिवासभूः ।
याम.......................
.............त्रिकुञ्जरः ॥

वाक्यशेषवसुधा वसुन्धरं
राजनीतिकलनायुगन्धरम् ।
मान्त्रिशेखरमद्भुतराचरं
विप्रसात्कृतसमस्त.... ॥

........रुहो......
......दिवौकसमधिप........
...दाम्बिका भजत तच्चिन्तानुकूला सती ॥

तस्याः समभवन्पुत्राः सर्वशास्त्रविशारदाः ।
दानशूरास्त्रयश्चादिपूरुषा इव भासु(राः) ॥

.....................दागुण भूषणः ।
सूराभः सुरमन्त्रीश इति विश्रुतकीर्तयः ॥

अग्रजस्तेषु विख्यातः साल्वतिम्मचमूपतिः ।
त्रिषु धर्मार्थकाम.............. ॥

.........स्य निदानमाद्यकवितासारस्य घण्टापथः
सङ्गीतस्य निवासभूः कुलगृहं धर्मस्य मूलं श्रुतेः ।
हेतुर्नीतिफलस्य ....
.......पात्रिणां विजयते श्रीसाल्वतिम्मप्रभुः ॥

पद्मासौ पद्मपद्मेति सासूयेव सरस्वती ।
साल्वतिम्मेन्दुः......... ॥
साल्वातिम्मचमूनाथो वाधत्ते विदुषां मुदे ॥

स्यादेव मेऽलसतया मतिमान्द्यतो वा
..........................विशङ्का ।

दोषोत्करस्य सुगुणीकरणे प्रवीणा

शक्तिः सदा विजयते खलु सज्जनानाम् ॥

* * *

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः फल) निर्वृतये कान्तासंमिततयोपदेशयुजे" इत्यालङ्कारिकवचनात्काव्यस्य यशःप्रभृत्यनेकानुषङ्गिकफलसाधनतां "काव्यालापां(श्च वर्जयेत्" इत्यस्या) तादृशकाव्याविषयताञ्च पश्यन् बाल..................चारय इति श्रुतेः । मङ्गलस्य विघ्नसमाप्तिहेतुतया देवतागुरुपूजास्तुतिनमस्कारादीनां मङ्गलात्मतया ग्रन्थादावावश्यकर्तव्यतया आ............तद्गुणस्तुतिरूपम्मङ्गलमादौ निबध्नाति अस्तीत्यादिश्लोकत्रयेण ॥ अस्तीत्येतत्तिङन्तप्रतिरूपकमव्ययम्......... .... मानसपुत्रः तस्य नेत्रं नयनम् "लोचनं नयनं नेत्रम्" इत्यमरः । * * *

"कालाः परिमाणिना" इति सूत्रे प्रकारप्रयोगज्ञापनेन च पृथक्त्वावगमादत्त इति....विति नित्ययो...शशी... नाम्ना प्रसिद्ध इत्यर्थः । असाधारण्येन व्यपदेशार्थमिदं विशेषणम् । न क्षरन्तीति न क्षीयन्त इति वा नक्षत्राणि ।

... .

"न भ्राणनपान्न वेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या" इति नञः प्रकृतिभावाल्लोपाभावः । "नक्षत्रमृक्षं भं तारम्" इत्यमरः । "गणःप्रमदसङ्घौघाः" इति वैजयन्ती । तस्य नाथः पतिः । एतेन परमैश्वर्यं कथितम् ।

अस्ति विद्यते। तमेव विशिनष्टि। यमिति। आस्त-
....................(वारि)णि जले जायन्त इति वारिजा-
नि पद्मानि "सप्तम्यां जनेर्डः" इति डप्रत्ययः। तेषां
श्रियं शोभामाहरति यस्तथोक्तः। स तं हर... . त्ययः।
शोभा सम्पत्तिः पद्मा सा लक्ष्मीः श्रीरिति गम्यते। शाश्व-
तः। चन्द्रस्य पद्मवैरित्वं लोकप्रसिद्धिमङ्गीकृत्यैवमुक्तम्।

* * *

"यत्राभिप्रायगर्भा स्याद्विशेषणपरम्परा। अत्राभिप्राय
विदुषामसौ परिकरो मतः" इति लक्षणात्। वा-
रिजश्रीहरमित्यत्र पदंगतो निदर्शनालङ्कारः। वारिज-
श्रियो नयने असम्भवात् वारिजश्रीरिव वारिजश्रीरिति
बिम्बप्रतिबिम्बभावस्य गम्यत्वासम्भवात् धर्मयोगादुप-
मानोपमेययोः "प्रतिबिम्बक्रिया गम्या यत्र सास्यान्नि-
दर्शना" इति लक्षणात् परिकरनिदर्शनालङ्कारयोस्तिलत-
ण्डुलवत् संसृष्टिः। इतः परमलङ्काराः ग्रन्थविस्ताराभ्नो-
च्यन्ते। काव्यादावकारप्रयोगः प्रीतिकर इत्यकारः प्रयु-
क्तः। तदुक्तम्। "प्रीतिमकारस्तनुते यदि न ब्रूते निषे-
धार्थम्" इति। लक्ष्मीकरत्वादादौ तगणः प्रयुक्तः। तदुक्त-
म् "ततो लक्ष्मीं तनुते" इति। आमनन्ति—"म्ना अ-
भ्यासे" इत्यस्य धातोर्लिटि शपि "पाघ्राध्मास्थाम्नादाण्
दृश्यर्तिसर्तिशदसदां पिबाजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौ-
शीयसीदाः" इति म्नादेशः।

End:

हित्वेति । सुशर्मणि गोधनेन गोकुलेन सह यशः कीर्तिं भित्त्वा त्यक्त्वा निहतशेषेण हतावशिष्टेन बलेन सैन्येनानुयाते..................गते सति मात्स्यराजः चन्द्रातपेन ज्योत्स्नया क्षपितो नाय(शि)तः सैन्यानां सैनिकानां युद्धश्रमो यस्यास्तां तथोक्तां तां यामिनीं रात्रिम् । अत्यन्तसंयोगे द्वितीया । अध्वनि मार्गे अवसद्वसति स्म ॥ ११९ ॥

Colophon:

इति श्रीमद्राजाधिराजराजपरमेश्वरकर्नाटेश्वर श्रीकृष्णदेवमहारायशिरःप्रधानसकलागमपारावारपारीण श्रीसालुवातिम्मयदण्डनाथविरचितायां मनोहराख्यायां बालभारतव्याख्यायां दशमः सर्गः ॥ श्रीनागेश्वराय नमः ॥

श्रीवेङ्कटेशाय मङ्गलम् ॥

Subject: Bālabhāratavyākhyā otherwise known as Manoharā 1-10 sargas.

Remarks:—The Ms. is in good condition. The opening passages are wanting. This Ms. abruptly ends with the commentary of the 10th Sarga. It is given in the colophon in Telugu language that this Ms. was written by three persons namely Yellaśāstri, Veṅkaṭasubbayya and Nagara.

Sāluva Timmaya Daṇḍādhinātha, the author of this commentary on the Bālabhārata was a court poet of the famous Kṛṣṇa Deva Rāja, King of Vijayanagara, in the beginning of the 16th century A. D.

॥ भट्टिकाव्यम् ॥

3707. BHAṬṬIKĀVYAM.

Burnell's Catalogue No. 4798. Page 159. Right column.

Substance—Paper. Size—$10\frac{1}{8}\times6$ inches. Sheets—68. Lines—12 to 14 to a Page. Script—Devanāgarī. No. of Granthas—1800. Author—Bhaṭṭi. Complete.

Beginning:

अभून्नृपो विबुधसखः परन्तपः
श्रुतान्वितो दशरथ इत्युदाहृतः ।
गुणैर्वरं भुवनहितच्छलेन यं
सनातनः पितरमुपागमत्स्वयम् ॥ १ ॥
सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट
पितॄनताप्सीत्सममंस्त बन्धून् ।
व्यजेष्ट षड्वर्गमरंस्त नीतौ
समूलघातं न्यवधीदरींश्च ॥ २ ॥

End:

अथ ससंभ्रमपौरजनावृतो
भरतपाणिधृतोज्ज्वलचामरः ।
गुरुजनद्विजवन्द्यभिपूजितः
प्रविशति स पुरीं रघुनन्दनः ॥ ३० ॥
प्रविधाय धृतिं पुरञ्जनानां
युवराजं भरतं ततोऽभिषिच्य ।
झषकेतुरगाङ्करेण यष्टुं
कृतसम्भारविधिः पतिः प्रजानाम् ॥

Colophon:

इति भट्टिकाव्ये तिङन्तकाण्डे छन्दोविलसितं नामादितः

द्वाविंशतिः सर्गः ॥

Subject: Bhaṭṭikāvya. 1-22 sargas.

Remarks:—The Ms. is in good condition. This is one of the oldest Kāvyas, belonging to the 9th century. The name of the author appears in some Mss. as Bhartṛhari. The work deals with the story of the Rāmāyaṇa. The work has been published by the Niranyasāgara Press, Bombay.

॥ भट्टिकाव्यम् ॥

3708. BHAṬṬIKĀVYAM.

Burnell's Catalogue No. 10204 a. Page 159. Right column.

Substance—Palm leaf. Size—17½×1½ inches. Leaves—59 (1-59). Lines—7 to a Page. Script—Grantha. No. of Granthas—1800. Author—Bhaṭṭi. Complete.

Beginning, end and subject—Same as No. 3707.

Colophon:

इति भट्टिकाव्ये रावणवधे तिङन्तकाण्डे लुङ्विलसितं नाम नवमः परिच्छेदः । काव्यस्यायोध्याप्रवेशो नाम द्वाविंशतिः सर्गः ॥

विकृत्यब्दे रवौ कन्यां गते पुष्ये गुरोर्दिने ।

वेङ्कटेशेन लिखितं भट्टिकाव्यमिदं महत् ॥

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is Bhaṭṭikavyavyākhyā.

The name of the scribe is given as Veṅkaṭeśa.

The following ślokas are given after the colophon:

इदमधिगतमुक्तिमार्गचित्रं

विविदिक्षतां वदताञ्च सन्निबन्धम् ।

जनयति विनयं सदा जनानां

युधि सुसमाहितमैश्वरं यथास्वम् ॥

दीपतुल्यप्रबन्धोऽयं शब्दलक्षणचक्षुषाम् ।
हस्तामर्श इवान्धानां भवेद्व्याकरणादृते ।
व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम् ।
हता दुर्मेधसोऽन्यत्र विद्वत्प्रियतया मया ॥

शुभमस्तु ॥

बिन्दुदुर्लिपि + समीक्ष्य सज्जनाः ॥

॥ भट्टिकाव्यम् ॥

3709. BHAṬṬIKĀVYAM.

Burnell's Catalogue No. 10205. Page 159. Right column'
Substance—Palm leaf. Size—17⅓×1½ inches. Leaves—80. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—1800. Author—Bhaṭṭi. 1-16 Sargas (wants end).

Beginning—Same as No. 3707.

End:

अस्फूर्जि गिरिशृङ्गाणि व्यास्नाक्षीद्गन्धमादनम् ।
अज्ञदिष्टव्यकारिच्च गवाक्षो भूधरान् बहून् ॥

नवानि + जीर्णं............ ॥

Colophon: (Leaf No. 76)

इति रावणवधे तिङ्काण्डे लट्प्रदर्शनं नाम पञ्चदशः सर्गः ।

Subject: Bhaṭṭikāvya. 1-16 sargas.

Remarks :—The Ms. is in a fairly good condition.

॥ भट्टिकाव्यम् ॥

3710. BHAṬṬIKĀVYAM.

Burnell's Catalogue No. 10206. Page 159. Right column. Substance—Palm leaf. Size—13½ × 1 inches. Leaves—119. Lines—4 to 7 to a Page. Script—Grantha. No. of Granthas—1800. Author—Bhaṭṭi. Complete.

Beginning, end and subject—Sme as No. 3707.

Remarks :—The Ms. is in decaying condition.

॥ भट्टिकाव्यम् ॥

3711. BHAṬṬIKĀVYAM.

T. S. Collection No. 699. Substance—Paper. Size—10 × 4 inches. Sheets—49 (40-88). Lines—8 to 10 to a Page. Script—Devanāgarī. No. of Granthas—750. Author—Bhaṭṭi. Incomplete.

Beginning:

तोषोऽद्यैव च सीतयोः परश्वेतासि कल्प्स्यसि(?) ॥ ४६ ॥

आहूय रावणोऽवोचदथेन्द्रजितमान्तिकात् ।

वने मत्त इव क्रुद्धो गजेन्द्रः पर्यटन् मृधे ॥ ४७ ॥

End:

तूर्याणामथ निस्वनेन सकलं लोकं समापूरयन्

विक्रान्तैः करिणां गिरीन्द्रसदृशां क्ष्मां क्ष्मापयन् सर्वतः ।

सानन्दाश्रविलोचनः प्रकृतिभिः सार्धंसहान्तःपुरः

सम्प्राप्तो भरतः समारुतिरयं नम्रः समं भ्रातृभिः ॥२९॥

Colophon: (Sheet 86)

इति भट्टिकाव्ये लुङ्विलसितं नाम एकविंशः सर्गः ॥

Subject Bhaṭṭikāvya 9-22 sargas.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly begins with the 46th śloka of the sarga and ends with the 29th śloka of the twenty second sarga.

॥ भट्टिकाव्यम् ॥

3712. BHAṬṬIKĀVYAM.

T. S. Collection No. 698. Substance—Paper. Size—10×4 inches. Sheets—24 (6th sheet missing). Lines—7 to 10 to a Page. Script—Devanagarī. No. of Granthas—350. Author—Bhaṭṭi. 1-6 sargas (wants end).

Beginning—Same as No. No. 3707.

End:

नन्दनानि मुनीन्द्राणां रमणानि वनौकसाम् ।
वनानि भेजतुर्वीरौ ततः पापानि राघवौ ॥ ७२ ॥

Colophon: (Sheet No. 20)

श्रीमद्गोविन्ददीक्षितसूनुविक्रमावरजभट्टिमहाकविविरचिते महाकाव्ये पञ्चमः सर्गः ॥

Subject: Bhaṭṭikāvya. 1-6 Sargas.

Remarks:—The. Ms. is in decaying condition. This Ms. abruptly ends with the 72nd śloka of the Sixth sarga.

॥ भट्टिकाव्यम् ॥

3713. BHAṬṬIKĀVYAM.

P. A. Collection No. 327. Substance—Paper. Size—10×4¼ inches. Sheets—40 (22-25, 28 and 29 and 44 are missing out of 47 sheets). Lines—12 to 14 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Bhaṭṭi. 1-17 sargas (wants end).

Beginning—Same as No. 3707.

End:

भूमिष्ठस्यासममं युद्धम् रथस्थंनेति मातालिः ।
आहरद्रथमत्युग्रं सशस्त्रं वासवाज्ञया ॥ ९६ ॥

Colophon: (Sheet 44)

इति भट्टि० तिङ लृङ् विलसितं नाम तृतीयः परिच्छेदः ।
काव्ये १६ सर्गः ॥

Remarks:—The Ms. is in decaying condition. The Ms. abruptly ends with the 96th śloka of the Seventh sarga.

॥ भट्टिकाव्यव्याख्या ॥

3714. BHAṬṬIKĀVYAVYĀKHYĀ.

Burnell's Catalogue No. 10204 b. Page 159. Right column. Substance—Palm leaf. Size—18⅞×1½ inches. Leaves—236 (1-236). Lines—4 or 5 to a Page. Script—Devanāgarī. No. of Granthas—4850. Author—? 1-14 Sargas.

Beginning:

प्रणिपत्य सकलवेदिनमतिदुस्तरभट्टिकाव्यसलिलनिधेः ।

जयमङ्गलेति नाम्ना नौकेव विरच्यते टीका ॥

लक्ष्यं लक्षणञ्च उभयत्र विदुषां प्रदर्शयितुं श्रीस्वामिसूनुः कविर्भट्टिनामा रामकथाश्रयं महाकाव्यं चकार। तथाहि। अस्योपनिबन्धनं कविना द्विधा कृतम्। एकं लक्षणसूचकैः प्रकीर्णकाधिकारप्रसन्नतिङन्तकाण्डैश्चतुर्भिः। द्वितीयं लक्ष्यसूचकं रामसम्भवादिभिरेकविंशत्या सर्गैः। तत्र लक्षणं द्विविधम्, शब्दलक्षणं काव्यलक्षणञ्च। तत्र प्रथमस्य प्रकीर्णकाधिकारतिङन्तकाण्डानि। द्वितीयस्य प्रकीर्णकाण्डं यत्रोच्चावचेन बहूनां लक्षणानां प्रकीर्णकम्। तत्प्रकीर्णकाण्डं तदेवात्रोक्तम्। तस्य व्यापित्वादुत्तरत्रापि द्रष्टव्यमिति प्रदर्शनार्थम्। अत्र यद्यप्यादौ कविना देवतानमस्कारो न कृतः, तथापीष्टदेवतानमस्कारो विघ्नोपशमनहेतुर्भवतीति मन्यमान आह। इष्टदेवता सनातनो विष्णुः। तत्प्रतिबन्धना चेयं कथेति तत्प्रतिबन्धनैवात्र कीर्तितम्। रामायणवत्। अत्र विष्णोर्यस्मिन् काले जगत्कार्यवशादवतारः तदिदं दर्शयति ॥

॥ अभूदिति ॥ "गातिस्थ" इति सिचो लुक्। "भूसुवोस्तिङि" इति गुणप्रतिषेधः। "नयतेः डिच्च" इति नयतेरौणादिकः ऋः। नरो मनुष्यः तान् पातीति। "आतोऽनुपसर्गे कः"। आतोर्लोपः नृपो राजा अत्यन्तधर्मविजयी देवराजमित्रमासीदित्याह। विबुधसख इति विबुध्यन्त इति विबुधाः देवाः।

End:

द्विड्डिपुरित्यादि ॥ रणे भटाः परस्परं द्विष्वन्तः।

'द्विष अप्रीतौ' दिद्विषुः। अभिमुखं गतवन्तः। चुच्छि-
च्छवन्तः। 'छो छेदने।' दुताश्चक्षुभुः मूर्च्छां गतवन्तः।
सुषुवुः। भूमौ पतिताः। वच्यादित्वात्सम्प्रसारणम्। चखा-
दिरे। खादिता कर्मणि लिट्। चखदुश्च खादितवन्तः।
विलोपुश्च। विलोपं कृतवन्तः। "अत एकहल्" इति एत्वं।
प्रहस्त। अमात्यान् सचिवान् प्राह। * * एवमुक्तेन
प्रकारेण तां सेनां......

Colophon: (Sheet 222)

इति भट्टिकाव्यटीकायां जयमङ्गलायां प्रसन्नकाण्डे भाषा-
समावेशश्चतुर्थः परिच्छेदः। काव्यस्य सेतुबन्धस्य त्रयोदशः
सर्गः॥ समाप्तश्च प्रसन्नकाण्डं तृतीयम्॥

Subject: Bhaṭṭikāvyavyākhyā, otherwise known as Jayamaṅgalā 1-14 sargas.

Remarks:—The Ms. is in good condition. The other work contained herein is Bhaṭṭikāvya. This work is not however noticed by Dr. Burnell under this number.

॥ भट्टिकाव्यव्याख्या ॥

3715. BHAṬṬIKĀVYAVYĀKHYĀ.

Burnell's Catalogue No. 10207. Page 159. Right column.
Substance—Palm leaf. Size—$16 \times 1\frac{1}{8}$ inches. Leaves—245. Lines—5 to 7 to a Page. Script—Grantha. No, of Granthas—4850. Author—?. 1-14 sargas.

Beginning—Same as No. 3714.

End:

॥ यदा ॥ क्षणदाचराणां राघवाभियोगे मनोरथा

वाञ्छितानि यथा न फेलुः न फलिताः प्रहस्तस्य । व्यापा-
दितत्वात् तदालङ्कां भेजुः सेवितवन्तः । उदीर्णदैन्याः
उदीर्णं महद्दैन्यं दीनभावो येषामिति । प्रहस्तं च हतं मृतं
उच्चैराचख्युः । आख्यातवन्तः । रावणात्येत्यर्थात् ॥

Colophon:

इति भट्टिकाव्यटीकायां जयमङ्गलायां तिङन्तकाण्डे लिङ्विलसितं नाम प्रथमः परिच्छेदः ॥

काव्यस्य..............ध्यश्चतुर्दशः सर्गः ॥

Subject: Bhaṭṭikāvyvayākhyā otherwise known as Jayamaṅgalā.

Remarks:—The Ms. is in a fairly good condition.

॥ भट्टिकाव्यव्याख्या ॥

3716. BHAṬṬIKĀVYAVYĀKHYĀ.

Burnell's Catalogue No. 10208. Page 159. Right column. Substance—Palm leaf. Size—15⅛×4⅞ inches. Leaves—268. Limes—6 or 7 to a Page. Script—Grantha. No. of Granthas—5050. Author—?. 1-14 sargas only.

Beginning, end, colophon and subject—Same as No. 3715.

Remarks:—The Ms. is in very good condition.

॥ मीनाक्षीपरिणयः ॥

3717. MĪNĀKṢĪPARIṆAYAḤ.

Burnell's Catalogue No. 10244. Page 160. Right column,

Substance—Palm leaf. Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—81. Lines—5 to 7 to a Page. Script—Telugu. No. of Granthas—2000. Author—Malaya. (1-18 sargas). Complete.

Beginning:

...भूयादभिभूयभूयसीम-
भागधेयो भवभीविभावरीम् ।
....
...भास्य भानुर्भवरोग... ॥
....
...पातुलारूढवपुर्द्विपाननः ।
आपा(?)तुरस्त्येकमनादरेण मां
निष्पातुकानेकपाताम्रुखोदिता ॥ २ ॥
....
...रविसोमकुण्डला ।
समण्डलाग्रा जयहर्षताण्डवं
तनोतु चण्डीखलखण्डनोद्यता ॥ ३ ॥
मदेन तुङ्गो...........
...................ता ।
त्रिदेवतालोचनजन्मभूरयं
मुदे कुमारी मुहुराविरस्तु मे ॥ ४ ॥
अमन्दसन्दर्भ............
.... ।
.......गदान्ध्ययामिनी·
विभातसन्ध्यावतु विन्ध्य...... ॥ ५ ॥

..................पानतः
प्रदर्श्य जन्मान्तरवृत्तशेवधिम् ।
अवाप्तदैन्यां विभवेन शोभया
.... ॥ ६ ॥

...मे चारुवचोविजृम्भणे
भवानिमेषापदपद्मसेविनः ।
भवानि मे दृष्टिभिरस्तु कस्त
.... ॥ ७ ॥

...वतोमूर्तिरसाविवस्वतो
रुचा हरिद्रामदलेपदक्षया ।
प्रकाशमाना पथि नेत्रपद्मयो-
रनादि............. ॥ ८ ॥

....
सम्पदा स्तनचक्रभासनात् ।
तथोदिताश्वत्थजकान्तिदानतः
सरस्वती पूरयतां मनोरथम् ॥ ९ ॥

(...पि सर्वदानवान् विरो-
धिनोनेकपविक्रमोज्वलाः ।
प...हाशापतयोद...
.... ॥ १० ॥)

...............णौति
पश्चात्प्रथितान् कवीश्वरान् ।

प्रधानबेरेपरिपूजिते क्रमाद्वि-
धेयमेवोत्सवविग्रहार्चनम् ॥ ११ ॥

वसन्तया मे वसुधाग्र...
श्रुप....जम्रतिमं तपस्विनः ।
अवातरद्यस्य मुखान्महीतले
स पादबद्धापि सुखं सरस्वती ॥ १२ ॥

समग्रपादाङ्कनपद्य वर्तिनः
स पातु वल्मीकिभवोऽनिलाशनः ।
आपच...स्वयमाशिषाद्भुतो
मुखेन कान्त्यामृतमुज्जगार यः ॥ १३ ॥

पराशरस्यान्वयभागधेयतां
गताय पुंसे क्रियते नमस्क्रिया ।
यदीयसूक्तिप्रकरैक........
बभूव सेनापतिपूर्वजो गजः ॥ १४ ॥

परानशेषानपि वर्णयानि चेत्
प्रबन्धपर्याप्तिरनेन भाविनी ।
तथापि कालीमुखगर्भवीटिका
रसज्ञमेकं रसना दधातु मे ॥ १५ ॥

उपात्तकालाञ्जनभद्रकालिका
कटाक्षभास्वत्कविता लिपिश्रियः ।
स्मरामि कस्यापि कवेः सरस्वती
समाजराजीव महाटवी रवेः ॥ १६ ॥

* * *

सतीर्थ ....

यां पुरुषोत्तमांशभूः ।

चरन् क्रमान्नीपवनीति विश्रुतां

मनीषिमान्यो मधुरापुरीमगात् ॥ २४ ॥

* * *

ततस्तदीयैश्चरितैरलङ्कृतं

करोमि काव्यं कवयोऽहमीदृशम् ।

....

...त्यानि श्रुतं निशम्य ताम् ॥ २६ ॥

पङ्गुः प्रबन्धं प्रतिपाद्य शुद्धिमान्

पुराणविद्भूषयितुं सतां मुखम् ।

स चेद्रसालङ्कृतिभावभासुरः

प्रवेष्टुमेषां हृदयञ्च पारयेत् ॥ २७ ॥

गुणानुबन्धां सदलङ्क्रियोज्वलां

रसां दधानां रमणीयसौरभाम् ।

वचस्रजं वाग्मिवरेण निर्मितां

शुभाय कण्ठे कुरुते सुधीजनः ॥ २८ ॥

* * *

मदार्द्रदन्तावलगण्डमण्डली

विशालशाणामसु यत्र विश्वतः ।

मरुन्मृदुप्रेरणवृष्टचन्दनो

बिभर्त्यसौ गन्धवहस्य विभ्रमः ॥ ५७ ॥

तमेनमुद्वन्धिमतीव चन्दनै-
    र्विहारशैलं विभवेन भूषयन्।
कुलाद्रिधैर्ये कुलशेखरात्मभू-
    र्महीश्वरोऽभून्मलयध्वजाह्वयः ॥ ५८ ॥

महीभृता चन्दनमात्रदायिना
    दिशेयमामोदमुपैति दक्षिणा।
मयास्तु वेश्येव वशीकृतेति तां
    यशःसिताभ्रैरनुलिम्पति स्म यः ॥ ५९ ॥

उभौ नदीनामुदधिः सचैतयो-
    र्जितो परेण प्रथमस्तदाख्यया।
करप्रदः स्यान्मलयध्वजः कथं
    लयप्रदोऽस्मै मकरध्वजो नृपः ॥ ६० ॥

भृशं यदीया पिचुमन्दपालिकाः
    स्वभावतिक्तामुदशेरसन्ददौ।
गुणः स तस्या न बभूव नैपुणा-
    द्रसेश्वरस्यास्य चिरं निषेवणात् ॥ ६१ ॥

महीसुधीमण्डलमान्यशारदा-
    मनोज्ञसाम्राज्यमणीमयासने।
य एष दिव्ये फलके महाकवीन्न-
    वीनशब्दार्थरवीनवीवृधत् ॥ ६२ ॥

सरस्वतीं यः सरसोक्तिगुम्भनैः
    श्रियं च शृङ्गारकलाविलासतः।

महीमहिम्ना महयन्मुहुः समं
दधौ मुदं दक्षिणनायको यतः ॥ ६३ ॥

अरिप्रियाणां मुखकान्तिहारि चे-
दभूत नालीकसहस्रमद्भुता ।
कथं न सूतां स्मितहारि यद्भुनु-
र्लतायशः कैरवलक्ष्मप्यसौ ॥ ६४ ॥

अलं बलेनात्मयशःप्रतापयो
रराजहंसत्विषि सर्पत्रिष्टपे ।
स राजहंसो विललासशक्तिमा-
निह स्वभूम्ना परिभूतिमेति कः ॥ ६५ ॥

*　　　*　　　*

भारद्वाजकुलध्वजादुदभवद्यो रामनाथाद्बुधात्
पुत्रः श्रीमलयो विचित्रकवितापुष्पद्रुमोद्यानभूः ।
तस्य श्रीचरणाब्जषट्पदपदे सर्गोऽभवत्प्राक्तनः
काव्ये मीनविलोचनापरिणये नाव्ये रसौघैर्नवैः ॥ ७१ ॥

End:

सम्पद्भिः सह वृद्धि....तत्सेविनां देहिनां
सन्तान....दयं समं समगमन् सन्तायमानामहाः !
विद्याभिर्मतयोऽप्यमा............हृद्यां दशां
भक्त्या साकमुदञ्चिता परमभूत्प्राग्जन्मधृत्त्वज्ञता ॥ ११२ ॥

भारद्वाजकुलध्वजादुदभवद्यो रामनाथाद्बुधात्
पुत्रः श्रीमलयो विचित्रकवितापुष्पद्रुमोद्यानभूः ।

तस्य श्रीपदपद्मसद्ममनसः सर्गोयमष्टादशः
काव्ये मीनविलोचनापरिणये नाव्ये रसौघैर्नवैः ॥११३॥

Colophon:

अष्टादशः सर्गः ॥

Subject: Mīnākṣīpariṇaya. 1-18 sarga.

Sarga.	Ślokas.	Leaves.	Sargas.	Ślokas.	Leaves.
I.	70	5	X.	78	46
II.	45	8	XI.	107	52
III.	91	14	XII.	92	57
IV.	51	17	XIII.	62	60
V.	70	22	XIV.	95	65
VI.	56	25	XV.	?	?
VII.	99	30	XVI.	82	72
VIII.	82	37	XVII.	55	75
IX.	95	42	XVIII.	98	83

Remarks:—The Ms. is in good condition. The Ms. abruptly ends with the 37th śloka of the 18th sarga.

The author, Malaya is the son of one Rāmanātha of Bhāradvāja Kula. The work is not available in print. It deals with the marriage of Sundareśvara with Mīnākṣī, the most important of the deities in Madura. It my be presumed that the author of this work was a native of Madura.

॥ मीनाक्षीपरिणयः ॥

3718. MĪNĀKṢĪPARIṆAYAḤ.

Burnell's Catalogue No. 10248. Page 160. Right column. Substance—Palm leaf. Size—14×1 inches. Leaves—114. Lines—5 or 7 to a Page. Script—Grantha. No.

of Granthas—2000. Author—Malaya. (Sargas—1-18). Complete.

Beginning, end, colophon and subject—Same as No. 3717.

Remarks:—The Ms. is in a decaying condition. A transcribed copy of the Ms., in paper is also available in the library. See Transcript Volume No. 219.

॥ मुकुन्दविलासः ॥

3719. MUKUNDAVILĀSAḤ.

Burnell's Catalogue No. 10275. Page 160. Right column. Substance—Palm leaf. Size—12¼ × 1¼ inches. Leaves—87. Lines—5. Script—Grantha. No. of Granthas—925. Author—Bhagavanta. Complete.

Beginning:

श्रीगणेशाय नयः ॥ श्रीरामाय नमः ॥

शिवं शिवाश्लिष्टतनुं तनूज-

विराजितोत्सङ्गमुदूढगङ्गम् ।

स्फुरत्कलाधीशकळाकलापं

वन्दे समारूढवृषं वृषाङ्कम् ॥ १ ॥

क्व वासुदेवाश्रयिणी कथासौ

जनः क्व च स्तोकमनीषयैषः ।

सत्यं तथापि प्रतिपाद्यवस्तु-

माहात्म्यमेकं मुखरीकरोति ॥ २ ॥

कंसस्वसारं वसुदेवनाम्ने

यदूद्वहाय प्रतिपाद्य ताभ्याम् ।

अटन् प्रतोलीं गगनान्तरोत्थां
छन्दोमयीं वाचमुवाच कर्णत् ॥ ३ ॥

यां त्वं वहन्नद्य रथेन मूढ-
प्रयासिकं स प्रतिपन्नहर्षः ।
तस्याः कुमारो भविताष्टमो यः
स सर्वथा त्वां निहनिष्यतीति ॥ ४ ॥

स भर्तृकां हन्त ततः स्वसारं
निहन्तुकामः सतदात्मगर्भान् ।
जहि क्रमेणेति तदीरितेन
न्यवेशयत्तां मुदितः स्वगेहे ॥ ५ ॥

ततः कदाचिद्दनुजैरियं भू-
राक्रम्य कंसादिभिरर्द्यमाना ।
निवेदयन्ती निजमार्तिवृत्तं
विधातृमुख्यान्विबुधानवाप ॥ ६ ॥

भासां पुरस्कृत्यधरां सुरारि-
क्रान्तां विरिञ्चिप्रमुखाः सुधाशाः ।
दुग्धाब्धिमध्येशयमम्बुजाक्षं
शरण्यमीयुः शरणं त्रिलोक्याः ॥ ७ ॥

* * *

भयेन कंसादभिवञ्छितार्थान्
बाला तदा याचितुमक्षमेव ।
कदा नु पश्यामि धरामकंसा-
मित्येव चित्ते भृतदोहदा सा ॥ १७ ॥

दिनेषु तस्याः क्रमशः प्रयाते-
ष्वन्तः प्रहृष्टं सरसीरुहाक्षम् ।
ततः समाराधयितुं प्रहर्षात्
प्रावृट् प्रपेदे निजसौभगेन ॥ १८ ॥

क्वचिच्छिलीन्ध्रैः कुटजैः क्वहापि
नीपैः क्वचित्कुत्रचिदर्जुनैश्च ।
सम्पर्कमापद्य समुज्जिजृम्भे
सौरभ्यसान्द्रः शिशिरः समीरः ॥ १९ ॥

क्वचिन्नदन्तः क्वचिदुन्नदन्तः
क्वचिच्चरन्तः क्वचिदापतन्तः ।
क्वचिच्छिखाघूर्णनमाचरन्तो
मत्ता इवासन्मुदिता मयूराः ॥ २० ॥

End:

ब्रह्मात्मना सृजसि यो जगदेतदादौ
विश्वम्भरत्वमधिगम्य ततो बिभर्षि ।
पश्चात्स्वयं हरसि हन्त हरात्मना त्वं
तस्मै नमो भगवते त्रिविधात्मकाय ॥ ७२ ॥

संसारपङ्कपरिलिप्तसमस्तदेहैः
त्रैय्यन्तवारिधिविगाहनशुद्धभावैः ।
यो मृग्यसे नियमितात्मभिरात्मरूप-
स्तस्मै पुराणपुरुषाय नमः परस्मै ॥ ७३ ॥

या स्वर्गगर्वपतनोच्चलदुच्चवीची-
नीतालयं निजजटाकुहरैकदेशे ।

स्ना येन पावितजलाग्रपदेन मुक्ता

चित्ते स नो हरिहराकृतिरस्तु नित्यम् ॥ ७४ ॥'

तैस्तैरुपप्लवशतैः परिपीड्यमान-

मेनं प्रपञ्चकरुणेन तदा तदा तद् ।

विश्वं समुद्धृतमभूद्दशधावतीर्य

नित्यं स नोऽस्तु शरणं पुरुषः पुराणः ॥ ७५ ॥

यस्तापयस्यानिशमात्मदृशीकयात्व-

माह्लादयस्यप....भुवनं समस्तम् ।

स्वैरं स नो विदधतां हृदये निवासं

सूर्येन्दुचारुमथनो भगवान्मुरारिः ॥ ७६ ॥

कृष्णोऽपि कीर्तिधवलः परिपूतमूर्तिः

जारोऽपि सङ्गरहितोऽपि सहस्रदारः ।

लक्ष्मीधरोऽपि विहितोदधिदुग्धचोर-

स्तन्निर्गुणं सगुणमप्यनिशं भजामः ॥ ७७ ॥

इति नुतिभिरमन्दानन्दसन्दोहसिन्धु-

प्रचलदमलवीची सीकरासारसिक्तः ।

दरमुकुलितनेत्रं नीरजाक्षः कटाक्षैः

स्ववसतिमधिगन्तुं निर्जरानादिदेश ॥ ७८ ॥

गङ्गाधराध्वरिसुतो न.........नृसिंहसूरेः

यस्त्र्यंबकाध्वरिमणेश्च सुधीः कनीयान् ।

काव्येऽमुना विरचिते भगवन्तनाम्ना

सर्गः शुभोऽजनि मुकुन्दविलासनाम्नी ॥ ७९ ॥

Colophon:

इति श्री मुकुन्दविलासे दशमः सर्गः ॥

श्रीकृष्णार्पणमस्तु ॥

Subject: Mukundavilāsa. 1-10 sargas.

Sarga.	Ślokas.	Leaves.	Sarga.	Ślokas.	Leaves.
1	55	8	6	69	53
2	71	17	7	70	62
3	67	27	8	52	68
4	62	35	9	72	79
5	66	45	10	79	87

Remarks:—The Ms. is in good condition.

Bhagavanta is the author of this work dealing with the story of Śrī Kṛṣṇa. Students of the Maharatta history of Tanjore are aware of Bhagavanta and his other works.

A transcribed copy of the Ms. in paper is also available in the library. See Transcript Volume No. 482.

॥ यमकार्णवः सव्याख्यः ॥

3720. YAMAKĀRṆAVAḤ SAVYĀKHYAḤ.

Burnell's Catalogue No. 10323. Page 164. Right column.

Substance—Paper. Size—16½ × 1¼ inches. Leaves—68 (280-347). Lines—9 to a Page. Script—Grantha. No. of Granthas—2150. Author—Veṅkaṭeśa. (1-6 Āśvāsas). Complete.

Beginning:

॥ मूलम् ॥

" अनुकलमधुरापाङ्गैः

कल्याणततेरिवातिमधुरापाङ्गैः ।

अमृतसमुद्रतरङ्गैः

श्रीरवतान्मां हरेः समुद्रतरङ्गैः ॥ १ ॥"

॥ व्याख्या ॥

अनुकूलमधुरा । अपाङ्गैः । कल्याणततेः । इव । अति-मधुरापा । अङ्गैः । अमृतसमुद्रतरङ्गैः । श्रीः । अवतात् । मां । हरेः । समुत् । रतरङ्गैः ॥ नित्यमधुरा । मधुं अति-क्रान्तमतिमधु । तादृशः । रापः, अभिलापः यस्याः सा । समुत् सन्तोषसहिता । श्रीः । कल्याणततेरङ्गैरिव स्थितैः । हरेः रतस्य । रङ्गैः रङ्गस्थलैः । अपाङ्गैः मामव-तात् ॥ १ ॥

End:

॥ मूलम् ॥

स्फीतं नाम यशोभिः
स्फुरितं जगदुत्सवैरनामयशोभि ।
रामे राजनि तान्तं
हृष्टं पुष्टं सदा रराज नितान्तम् ॥

॥ व्याख्या ॥

यशोभिः स्फुरितम्, उत्सवैः स्फीतम्, अनामयेन शोभत इति अनामयशोभि, जगत् तान्तं सत् रामे राजनि सति नितान्तं अधिकं हृष्टं पुष्टञ्च सदा सदा रराज । नाम प्रसिद्धौ ॥ ८० ॥

॥ मूलम् ॥

हरिपादमात्रे यस्य
प्रगुणार्थं भाति पद्यमात्रेयस्य ।
यशसे तु सदाश्वासः
षष्ठस्तत्काव्यगोऽञ्चतु सदाश्वासः ॥

॥ व्याख्या ॥

यस्य आत्रेयस्य हरिपादमात्रे विष्णुपादाब्ज एव । मात्रशब्दस्यावधारणार्थता उत्तरपदत्वनियता । अत अस्वपदविग्रहः । पद्यं प्रगुणार्थं सत् प्रकृष्टार्थमित्यर्थः । भाति तत्काव्यगः तस्य काव्यं गतः षष्ठः सतामाश्वासकः सन्तोषजनकः । अयमाश्वासः सर्गापरनामा । सदा यशसे रामभक्तिकृतयशसे अश्नुतु । यशः कर्तुं प्राप्नोतु । यद्वा अर्हत्विति पाठः ॥ ८१ ॥

Colophon:

गजशैलतिथीतुल्ये १५७८ शालिवाहशके सति ।
वेङ्कटेशेन विहितः श्रीरामयमकार्णवः ॥

श्रीरामचन्द्रोदयसंज्ञयाद्यं
काव्यं द्वितीयं यमकार्णवाख्यम् ।
देवद्वतुष्ट्यै तु सुधीविलास-
सन्नन्दकाख्यञ्च कृतिर्मदीया ॥

नृसिंहपौत्रपौत्रोऽहं तुरीयः पुरुषोत्तमात् ।
वेङ्कटेशगुरोः पौत्रः श्रीनिवासगुरोः सुतः ॥
कलिवर्षेषु वृत्तेषु शैलनन्दरसाब्धिषु ४६९७ ।
शके(?) धृतितिथी तुल्ये १५७८ चैत्रे वारुणभे भवम् ॥

हरिः ॐ ॥ श्रीः ॥ श्रीविद्यासगुरवे नमः ॥ श्रीमद्वेदान्तगुरवे नमः ।

Subject: Yamakārṇavavyākhyā. 1 to VI Aśvāsas.

Āśvāsas.	I.	121	292	Āśvāsas.	IV.	80	322
,,	II.	80	302	,,	V.	80	335
,,	III.	80	312	,,	VI.	80	347

Remarks:—The Ms. is in good condition. The last three leaves deal with the commentary of Pādukāsahasra by Śrī Vedāntadeśika.

The story contained in this work is that the of Rāmayaṇa The author, whose name is Veṅkaṭeśa gives the following pedigree:—

Nṛsihma.
|
Puruṣottama.
|
Venkaṭeśa.
|
Śrīnivāsa.
|
Venkaṭeśa.

In addition to the present work he has written.

1. Rāmacandrodayakāvya.
2. Sudhīvilāsa.
and 3. Sudhīnandana.

The present work was composed in Śaka 1578 or A. D. 1656.

॥ रघुनाथचरितम् ॥

3721. RAGHUNĀTHACARITAM.

Burnell's Catalogue No. 10258. Page 161. Left column. Substance—Palm leaf. Size—$17\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—108 (81-188). Lines—7 to a Page. Script—Grantha. No. of Granthas—3100. Author—Vāmanabhaṭṭabāṇa. Complete.

Beginning:

विघ्नेश्वराय नमः ॥

दम्पत्योर्जगतां पत्योरपत्यं श्रेयसेऽस्तु वः ।
विघ्नसन्तमसं भिन्ते यदन्तद्युतिचन्द्रिका ॥ १ ॥

शारदां नौमि शब्दार्थज्योतिरुद्गमनारणिम् ।
देवीं कवीन्द्ररसनारङ्गमङ्गलनर्तकीम् ॥ २ ॥

कौस्तुभाभरणन्धाम कल्याणानि करोतु वः ।
यस्य दोरन्तराम्लः प्रथयेतन(?)रदाश्रमम् ॥ ३ ॥

जयन्ति सन्तः कवयो दिग्विजृम्भितकीर्तयः ।
कर्णावतंसतामेति सतां यत्सूक्तिमञ्जरी ॥ ४ ॥

वाणी महाकवीन्द्राणां कापि माणिक्यदीपिका ।
धुनाना जगदज्ञानध्वान्तमिन्धे स्वतेजसा ॥ ५ ॥

आननेन्दुसमुद्भूता कवेरमृतशीतला ।
कस्य वा न सुखं कुर्यात्कविता चापि कौमुदी ॥ ६ ॥

वन्द्यः कस्य न वाल्मीकिः यस्य वाङ्मधुनः कणान् ।
आदाय कवयोऽद्यापि निक्षिपन्ति स्वसूक्तिषु ॥ ७ ॥

सुधाया वाक्सुधायाश्च वाल्मीकेर्वदनार्णवात् ।
वक्त्रैः सुमनसः पूर्वां पिबन्ति श्रवणैः पराम् ॥ ८ ॥

ब्रह्मणोऽपि महान्व्यासो ब्रह्मा ब्रह्माण्डसम्भवः ।
यत्प्रबन्धमहाम्भोधौ ब्रह्माण्डैर्बुद्बुदायितम् ॥ ९ ॥

परं प्रदीप्यते लोकैश्चन्द्रादर्काच्च भारतम् ।
तमो गृह्णाति चन्द्रार्कौ तन्निगृह्णाति भारतम् ॥ १० ॥

कः कालिदासकविना कृतं कर्म करिष्यति ।
हनुमल्लङ्घितं कोऽन्यो लङ्घये(त्कपि)रर्णवम् ॥ ११ ॥

बाणं सत्कविगीर्वाणमनुबध्नाति कः कविः ।
सिन्धुबन्धुकमन्वेति द्युमणिं वा तमोमणिः ॥ १२ ॥

End:

वसिष्ठमुख्यैः कृतमङ्गलाशी-
देवाङ्गनालास्यविशेषदर्शी ।
श्रेयांसि पुष्णन् जगतां त्रयाणां
देव्या समेतो जनकेन्द्रपुत्र्या ॥

निषेदिवान्रत्नमये महार्हे
सिंहासने श्लिष्टशितातपत्रे ।
वलक्षवालव्यजनो धनानां
त्रैलोचनं मङ्गलमाततान ॥

पुरीं परीयाय ततः प्रहृष्टो
रथाधिरूढो रविवंशकेतुः ।
उत्तेजितांमुत्सवसत्क्रियाभिः
प्रभूतमाङ्गल्यमृदङ्गघोषम् ॥

विधूतवालव्यजनास्तदानीं
तं लक्ष्मणः सावरजः सिषेवे ।
प्रत्युप्तमुक्तासविशेषपाण्डु
तस्यातपत्रं भरतो बभार ॥

भेर्यः प्रतिश्रुग्मु(?)खरासुराणां
विमान.................................. ।
इक्ष्वाकुनाथस्य शशंसुरुच्चैः
पुरः प्रवेशं भुवनान्तरेषु ॥

नेत्रप्रभाक्षिप्तमृगेक्षणेन
लावण्यनिस्यन्दवता मुखेन ।

इन्दोरिव ह्रीतिमिवादधानः
प्रह्लादनं पौरदृशां स चक्रे ॥
भर्तारमन्वग्जनकेन्द्रपुत्री
हिरण्मयं स्यन्दनमावसन्ती ।
पवित्रयन्ती नगरी स्वधाम्ना
प्रभाविनी संवननं विवेश ॥
तमङ्गिरोऽत्रिप्रमुखास्तदानीं
भद्रासने तत्र निषेदिवांसम् ।
बहि... ....
.... ।

Colophon: Leaf No. 185.

इति वामनभट्टबाणविरचिते रघुनाथचरिते एकोनत्रिंशत् (:) सर्गः ॥

Subject: Raghunāthacarita. 1-30 sargas.

Sarga.	Ślokas.	Leaves.	Sarga.	Ślokas.	Leaves.
I.	66	83	XII.	98	123
II.	53	86	XIII.	72	126
III.	51	89	XIV.	78	130
IV.	80	93	XV.	84	135
V.	65	96	XVI.	64	138
VI.	79	99	XVII.	93	141
VII.	57	102	XVIII.	73	146
VIII.	77	107	XIX.	66	149
IX.	74	111	XX.	67	153
X.	76	115	XXI.	71	156
XI.	74	119	XXII.	79	161

Sarga.	Ślokas.	Leaves	Sarga.	Ślokas.	Leaves.
XXIII.	74	164	XXVII.	84	178
XXIV.	81	167	XXVIII.	74	181
XXV.	98	170	XXIX.	84	185
XXVI.	75	174	XXX.	72	188

Remarks:—The Ms. is in good condition. This Ms. abruptly breaks off at the very close. A transcribed copy of the Ms. is also available in this library. See Transcript Volume No. 185.

Vāmanabhaṭṭa Bāṇa is already familiar to us as the author of the drama Pārvatīpariṇaya, Vemabhūpālacarita etc. There is an excellent article on Vāmana Bhaṭṭa published as the introduction to the Śrī Vāṇi Vilas Press Edition of the Pārvatīpariṇaya.

॥ रघुनाथाभ्युदयः ॥

3722. RAGHUNĀTHĀBHYUDAYAḤ.

Burnell's Catalogue No. 10145. Page 161. Right column.

Substance—Palm leaf. Size—$17\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—52. Lines—5 to a Page. Script—Telugu. No. of Granthas—1250. Author—Rāmabhadrāmbā. Complete.

Beginning:

श्रीरामचन्द्राय नमः ॥ श्रीहयग्रीवाय नमः ॥

आनन्दितौ भूमितले हरीश-
विभीषणौ येन विशिष्य ताभ्याम् ।
नाम्ना च भक्त्या रघुनाथनेतु-
र्भद्राणि कुर्वीत स रामभद्रः ॥ १ ॥

यदिन्दिरामन्दिरजातरूप-
पद्मेषु पद्मा युगपत्प्रसन्ना ।
वेषैरशेषैर्वितरेदभीष्टं
राज्यादिमं श्रीरघुनाथनेतुः ॥ २ ॥

ऐश्वर्यलज्जातिशयाज्जगत्त्वां
सर्वज्ञताख्यापनतः सहर्षः ।
आशास्थमापातयतात्प्रशस्यं
राजावतंसो रघुनाथनेतुः ॥ ३ ॥

महत्तरं प्राप्तवतो महेशा-
दैश्वर्यमद्रीन्द्रसुतास्त्वयञ्च ।
रक्षैकताना रघुनाथनेतुः
शक्तिं दिशेदादिमशक्तिरग्र्याम् ॥ ४ ॥

परस्परस्पर्धितयेव शक्तिं
प्रौढां सदैश्वर्यमपि प्रसूते ।
भागद्वयं यत्पुरुषःसनामा
नारीनरात्मा रघुनाथभूपम् ॥ ५ ॥

कपोलदानोदितमन्घलेशा-
नलिप्रवेकानपि वावदूकान् ।
करोति यस्यैषकरीन्द्रवक्त्रो
वाचां प्रपञ्चे वरदो ममास्तु ॥ ६ ॥

End:

अथ कृत्यमहर्मुखप्रशस्तं
विरचय्यागमविश्रुतं यथावत् ।

मणिभूषितभूषणो महार्ही-
मवनीपालमणिः सभामयासीत् ॥ ८५ ॥

* * *

आसीताद्रीन्द्रसेतुक्षितितलवलयायातराजन्यजात-
प्राञ्चत्कोटीरकोटीप्रगुणमणिगणप्रांशुदीप्रांशुदीप्रैः ।
आरादारात्रिनातिस्फुटपदकटकद्योवमातो रघूणां
नेता त्रेता वदेतां क्षितिमिह रघुनाथेन्दुरिन्धेऽभिरक्षन् ॥

आचन्द्रमतुलं रघुनाथभूपे
विश्वम्भरामवति विश्वजनीनकीर्तौ ।
आसन्प्रजा गजतुरङ्गमहाटकाङ्क-
पर्यङ्किकामकुटकुण्डलभासमानाः ॥ ८८ ॥

अधिकश्रियमच्युतेन्द्रसूनुं
रघुनाथं रघुनाथमेव साक्षात् ।
हृदये कलयन्ति ये महान्तः
परमानन्दभरात्त एव धन्याः ॥ ८९ ॥

Colophon:

इति श्रीरामभद्रकरुणाकटाक्षलब्धसारसारस्वतप्रवर्तमानशतलेखिनी(सम)
समयलेखिनीयाष्टभाषाकल्पितचतुर्विधकवितानुप्राणितसाहित्यसाम्रा-
ज्यभद्रपीठारूढरामभद्राम्बाविरचिते रघुनाथाभ्युदये महा-
काव्ये द्वादशः सर्गः ॥

श्रीरङ्गपतये नमः ॥ शिवाय परमगुरवे नमः ॥
हयग्रीवाय नमः । श्रीरामचन्द्रार्पणमस्तु ॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ॥

आमूरि पापय कोमाकुडु धर्मभटलु रघुनाथाभ्युदयं शाहजिमहाराजुकु राशिनु श्रीआदिकुम्भेश्वरस्वामि(मी)सहायम् (यः)

श्री वीरभद्रगुरवे नमः ॥

Subject : Raghunāthābhyudaya. 1-12 Sargas.

Sarga.	Ślokas.	Leaves.	Sarga.	Ślokas.	Leaves.
I.	75	5	VII.	80	27
II.	60	9	VIII	102	32
III.	52	12	IX.	68	36
IV.	71	16	X.	77	41
V.	58	19	XI.	109	47
VI.	59	22	XII.	89	52

Remarks: The Ms. is in good condition. The ślokas from 31 to 46 of the second sarga are wanting. This Ms. was written by Dharmabhaṭṭa son of Pāpaya for Shahji Mahārāja (A.D. 1684 -1710). A transcribed copy of the Ms. in paper is also available in the library. See Transcript Vol. No. 438.

Rāmabhadrāmbā, the authoress was the queen of Raghunātha Nāyaka the most famous of the Nāyak kings of Tanjore. The poem is a short biography of her husband whom she adored even as a deity.

॥ राघवचरितम् ॥

3723. RĀGHAVACARITAM.

Burnell's Catalogue No. 4758. Page 161. Left column.

Substance—Paper. Size—$9\frac{1}{3} \times 4\frac{3}{4}$ inches. Sheets—92. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1456. Author—Śarabhoji Rāja. (1-12 sargas). Complete.

Beginning:

श्रीगणेशाय नमः ॥

दाता पदं शाश्वतमाश्रितानां
वातात्मजावेदितवाञ्छितार्थः ।
जेता रिपूणां रजनीचराणां
सीतासहायः श्रियमातनोतु ॥ १ ॥

ख्यातः स नामाखिलनन्दनीयो
महीपतिः शाहजिनामधेयः ।
प्रतापभाजां प्रथमं यमाहु-
र्ज्योतिष्मतां भानुमिव प्रशस्तम् ॥ २ ॥

यदीयसाचिव्यसमेधितश्री-
र्डिल्लीपतिर्भूरिकुतूहलेन ।
प्रायच्छदत्यच्छसितातपत्र-
ध्वजादिनानाबिरुदाङ्कलक्ष्मीम् ॥ ३ ॥

पतिं तमेनं प्रमदामनोज्ञं
मोहादवृण्वन्महिला हि बह्व्यः ।
महौजसस्तासु च तस्य जाताः
सुताः सुवीराः सुगुणाभिरामाः ॥ ४ ॥

रत्नेषु मुक्ताफलवद्ग्रहेषु
शीतांशुवत्कल्पकवद्द्रुमेषु ।

अभ्यर्हितस्तेष्वभवच्चवीमा-
नेकोजिनामा नृपसार्वभौमः ॥ ५ ॥

विधाय शत्रूनविनतान् बलेन
तञ्जाधिपः सोऽयमभूज्जिजेन ।
स्वविक्रमावर्जितसत्वभाजो
मृगेन्द्रता हि स्वयमेव लोके ॥ ६ ॥

विश्वम्भरोऽसाविह दीव्यतीति
स्वयञ्च लक्ष्मीरवतीर्य भूमौ ।
दीपाम्बिकेति प्रथिता पतिं त-
मविन्ददिन्दुं किल रोहिणीव ॥ ७ ॥

तस्यामजायन्त सुतास्त्रयोऽस्य
शस्त्रे च शास्त्रे च निकामदक्षाः ।
तेष्वग्रजन्मा जगति प्रतीतः
शाहेन्द्रनामा जितभोजकीर्तिः ॥ ८ ॥

तस्यानुजन्मा तपनातिचण्ड-
प्रतापभूमप्रथमानलक्ष्मीः ।
जगत्त्रयद्योतिजयापदानो
जयत्युदारः शरभेन्द्रनामा ॥ ९ ॥

प्रौढैः कवीन्द्रैः परिशीलनेन
विज्ञाय साहित्यविलासभेदान् ।
करोति काव्यं रघुवीरगाथा
पवित्रितं सैष मुदे बुधानाम् ॥ १० ॥

श्रीगणेशाय नमः ॥

अस्ति प्रसिद्धा नगरी रघूणा-
मलङ्घ्यसीमा परिघापरैर्युता ।
तस्यामजः कीर्तिसितातपत्र-
छायामधिष्ठाय शशास पृथ्वीम् ॥ १ ॥
आखण्डलार्धासनभागजस्त-
माशाधिपानामभयप्रदाता ।
परंतपः पङ्क्तिरथाभिधान-
स्तस्येन्दुमत्यां तनयो बभूव ॥ २ ॥
एकं शरीरस्य बभार भारं
यस्मिन् महीं शासति वृत्रशत्रुः ।
तस्यैकवीरस्य जगत्त्रयेऽपि
न दुर्लभं वस्त्वपि किञ्चिदासीत् ॥ ३ ॥
इत्थं महीं पालयतो नृपस्य
षष्टिः सहस्राण्यसमग्रमस्य ।
ययुः समानामनपत्यताया-
श्चिराय चिन्तास्मरतो बभूव ॥ ४ ॥
ततो वसिष्ठानुमतौ स्थितोऽसा-
वालोक्य सर्वानपि मन्त्रिवृद्धान् ।
आहर्तुमिच्छाम्यहमश्वमेध-
मभीष्टसिद्ध्यै तुरगो विमोच्यः ॥ ५ ॥

End:

रक्षो राजवलीमुखेश्वरमुखैर्मृत्वा पुनर्जीवितैः-
स्वैराशरवानरैश्च मुदितैः पूर्णे विमानोत्तमे ।

आरूढः सह लक्ष्मणो रघुपतिः सीतामिमां ह्लादयन्

सीते सेतुममुं समुद्रसरितः पश्येत्ययोध्यामगात् ॥ ९० ॥

किष्किन्धायामभित्वा कपिकुलयुवतीस्तं समारोप्य सद्यः

पश्यन्मध्ये प्रयागं पवनतनुभुवं प्रेषयित्वा पुरस्तात् ।

नन्दिग्रामं परस्ताद्भरतमभिमुखायातमासाद्य गत्वा

सम्यक्स्नातो रथस्थः सपदि निजपुरीं भ्रातृभिः प्राप रामः ॥ ९१ ॥

साकेते वेगवद्भिः कपिभिरुपहृतैः काञ्चनैः पूर्णकुम्भै-

र्विद्वद्भिर्मन्त्रविद्भिर्मुनिभिरपि मुदा सप्तभिर्मन्त्रिभिश्च ।

जानक्या रत्नपीठे रविकुलतिलकं संनिवेश्याभिषेकं

कुर्वद्भिर्धारयित्वा मकुटमपि मनोः प्रापिता भूः सलक्ष्मीः ॥ ९२ ॥

लब्ध्वा राज्यं स रामो भरतमवनतं यौवराज्येऽभिषिच्य

स्वाराज्ये वृत्रहेव प्रवणरिपुकुलस्वस्थचित्तो बभूव ।

पुष्टो लोकस्तदानीं प्रमुदितजनतः पूर्णकामः सदासीत्

काले काले सुवृष्ट्या मुहुरपि सफला भूरि सम्पत्प्रदा भूः ॥ ९३ ॥

Colophon:

इति श्रीमदभिजातभोसलकुलकलशजलधिसम्पूर्णतुहिनदीधितेरखि-

-लधरणिपालामकुटतटनिबिडितमणिकिरणपटलमञ्जरीपिञ्जरितचर-

णपङ्कजस्य सकलकल्याणगुणशेवधेरेकमहाराजस्य तनयेन बृंद्यु-

तगुणमधिकशुभगुणमणिगणमहोदधेः सकलभाषाद्भुतसरलसन्दर्भ-

गुणगरिमसमभिव्यञ्जितनिजसरस्वतीपुरुषावतारभावस्य शाहजि-

महीवलारेरनुजन्मना शरभोजिराजेन सङ्क्षेपरामायणे राघव-

चरिते महाकाव्ये द्वादशः सर्गः ॥ श्रीरामचन्द्रार्पणमस्तु ॥

श्रीरस्तु ॥ श्रीगोपालाय नमः ॥

Sheet 13.

इति पञ्चरत्नकविकृतौ राघवचरिते द्वितिय: सर्ग: ॥

Subject: Rāghavacarita. 1-12 sargas. Introductary ślokas 1-10.

Sarga.	Ślokas.	Sheets.	Sarga.	Ślokas.	Sheets.
I.	75	8	VII.	85	47
II.	65	13	VIII.	56	110
III.	77	20	IX.	130	65
IV.	76	27	X.	90	73
V.	64	33	XI.	75	80
VI.	74	40	XII.	93	92

Remarks:—The Ms. is in good condition.

Śarabhoji, the author of this poem, dealing with the story of the Rāmayaṇa was the third of the Maharatta rulers of Tanjore. He was the son of Ekaji and brother Sāhaji and he ascended the throne after his brother in 1711 A. D.

There seems to be some doubt regarding the royal authorship of this work. Dr. Aufrecht raised the doubt but we do not know on what grounds he did it. He probably thought that a busy king and politician could not have found the time necessary to compose literary works. It is hardly necessary to point out that Royal authors were not wanting in India. However, in the present instance, we find a colophon at the end of the second sarga to the effect

इति पञ्चरत्नकविकृतौ राघवचरिते द्वितिय: सर्ग:

which lends colour to the supposition that Śarabhoji was not the author but the work was fathered upon him by the poet Pañcaratnakavi. Anantanārāyaṇa, one of the court poets of Śarabhoji, was known as Pañcaratnakavi and it is very likely that he was the author of this work also.

A paper transcript of this work is available in this Library See T. V. No. 482.

॥ राघवपाण्डवीयम् ॥

3724. RĀGHAVAPĀṆḌAVĪYAM.

Burnell's Catalogue No. 4759. B. L. Errata Page XII. Substance—Paper. Size—10×4 inches. Sheets—38. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1060 Author—Kavirājapaṇḍita. (1-13 sargas) Complete.

Beginning:

श्रीगणेशाय नमः ॥

स्वाधिष्ठानाम्बुजरजःपुञ्जपिञ्जरमूर्तये ।
इच्छाधीनजगत्सृष्टिकर्मणे ब्रह्मणे नमः ॥ १ ॥
पुनातु वः सरस्वत्या विलासशिशुकः शुकः ।
तलांशुमयमाणिक्यपञ्जरान्तरगोचरः ॥ २ ॥
ब्रह्माण्डमण्डलच्छन्नपद्मकुड्मलदीर्विका ।
जायतां जगतः शान्त्यै शाम्भवी शक्तिरेकला ॥ ३ ॥
श्रीलतालिङ्गिताङ्गस्य विष्णुकल्पद्रुमस्य वः ।
अवतारमहाशाखाः पुष्णन्तु फलमीप्सितम् ॥ ४ ॥
कान्तिः श्रीकण्ठकण्ठस्य जयत्यालिङ्गनोत्सुका ।
स्कन्धारूढेव कालिन्दी मौलिमन्दाकिनीर्ष्यया ॥ ५ ॥
स वः करोतु विघ्नानां वारणं वारणाननः ।
मदद्राविभिरारब्धभोगावलिरिवालिभिः ॥ ६ ॥
जगत्प्रदीपयोर्वंशौ सूर्याचन्द्रमसोरपि ।
ययोरुद्दीपितो वाग्भिस्तौ वन्दे कविपुङ्गवौ ॥ ७ ॥

अन्यो विधाता वाल्मीकिरादिकाव्यं कमण्डलुः ।
रघुनाथकथा गङ्गा तया पूता जगत्त्रयी ॥ ८ ॥

द्वैपायनो परो ब्रह्मा तत्सृष्टिर्भारतार्णवः ।
सूक्तयो दिव्यरत्नानि त्रैलोक्यं तैरलङ्कृतम् ॥ ९ ॥

निश्रेण्यौ ब्रह्मलोकस्य वाग्देव्याः कर्णकुण्डले ।
धर्मद्रुममहामूलं वाल्मीकिव्यासयोः कृती ॥ १० ॥

भारतादिपुराणानि श्रीरामचरितानि च ।
त्रिसन्ध्यसवनान्येष सर्वसाधारणो मखः ॥ ११ ॥

पुराणरामायणभारतादि-
क्षीराणि संयोजितभक्तिवत्सैः ।
पुरातनैर्या दुदुहे कवीन्द्रैः
सा भारती कामदुघा ममास्तु ॥ १२ ॥

अस्ति कादम्बसन्तानसन्तानकनवाङ्कुरः ।
कामदेवः क्षमादेवः कामधेनुर्जनेश्वरः ॥ १३ ॥

कामं पुरातनो येन नूतनेनाभिभूयते ।
भार्गवो राघवेणेव रामो रामेण सङ्गरे ॥ १४ ॥

* * *

युग्मम् ॥

पदमेकमपि श्लिष्टं वक्रं भूयात्परिश्रमः ।
कथाद्वयैक्यं निर्वोढुः किं धरापतितोऽधिकम् ॥ ३९ ॥

श्रीमद्रामायणं गङ्गा भारतं सागरो महान् ।
तत्संयोजनकार्यज्ञौ कविराजभगीरथौ ॥ ४० ॥

सुबन्धुर्बाणभट्टश्च कविराज इति त्रयः ।
वक्रोक्तिमार्गनिपुणाश्चतुर्थो विद्यते न वा ॥ ४१ ॥

End:

सर्वतोभद्रः ॥

रम्याकल्पविलासिनी क्षितिपतेर्लावण्यतेजस्विनी
नित्याविष्कृतमण्डना स्थितिमती याभीष्टलोकान्तरा ।
लक्ष्मीराश्रयते स्म सा मतिमतापार्च्यं सुसेव्यं मुदा
दातारं रमितानुजेन च शतानीकेन रामं तदा ॥ ६४ ॥

चक्रबन्धः ॥

श्रुतचित्रकथस्तीर्थभूतात्कुम्भभुवः कवेः ।
स्वपुरप्राप्तये चक्रे राजा हरिविसर्जनम् ॥ ६२ ॥

स पूज्यानभिषेकान्ते स्वापतेयैरपूपुजत् ।
यथा ते सम्पदा प्रापुर्नरकिन्नरराजताम् ॥ ६३ ॥

श्रिया जुष्टः स भारत्या सानुजः साधुवत्सलः ।
पृथिवीं पालयामास कामदेव इवापरः ॥ ६४ ॥

Colophon:

इति श्री हरचरणी(धर)प्रसूतकादम्बकुलतिलकचक्रवर्ति वीरकाम-
देवप्रोत्साहितकविराजपण्डितविरचिते राघवपाण्डवी-
ये महाकाव्ये कामदेवाङ्के रावणदुर्योधनवधोल्लासितरामधर्मा-
भिषेको नाम त्रयोदशः सर्गः ॥ शुभमस्तु ॥

श्रीकृष्णार्पणमस्तु ॥ श्रीरस्तु ॥

Subject: Rāghavapāṇḍavīya. 1-13 sargas.

Sarga.	Ślokas.	Sheets.	Sarga.	Ślokas.	Sheets.
I.	93	6	VII.	57	22
II.	45	9	VIII.	55	25
III.	48	11	IX.	31	27
IV.	46	14	X.	42	29
V.	85	18	XI.	27	31
VI.	26	19	XII.	48	34

Sarga XIII. Ślokas 64 Sheets 37

Remarks:—The Ms. is in good condition.

The Mss. of Rāghava Pāṇḍavīya are noticed by Dr. Burnell in his errata list.

Kavirāja, the author of this work was patronised by the Kadamba King Vīrakāmadeva—probably he was his court poet—and there are sufficient reasons to think that he is older than Rājaśekhara, the author of the Bālabhārata and other works. The work is available in print.

॥ राघवपाण्डवीयम् ॥

3725. RĀGHAVAPĀṆḌAVĪYAM.

Burnell's Catalogue No. 4760. B. L. Errata Page XII.

Substance—Paper. Size—10 × 5 inches. Sheets—43. Lines—11 to a Page. Script—Grantha. No. of Granthas—1060. Author—Kavirājapaṇḍita. (1-13 sargas). Complete.

Beginning, end, colophon and subject—Same as No. 3724.

Remarks :—The Ms. is in good condition. For Burnell's No. and page see the errata list in his Catalogue.

॥ राघवपाण्डवीयम् ॥

3726. RĀGHAVAPĀṆḌAVĪYAM.

Burnell's Catalogue No. 4761.

Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—61. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—1067. Author—Kavirājapaṇḍita. (1-13 sargas). Complete.

Beginning, end, colophon and subject—Same as No. 3724.

Remarks:—The Ms. is in good condition. After the colophon the last page contains the following :—

रामधर्मकुलोत्कर्षं कविराजमुखोत्थितम् ।
मूलं राघवपाण्डव्या आपदेवः समालिखत् ॥ १ ॥

ज्ञानदं सर्वलोकानां पापघ्नं बहुबुद्धिदम् ।
कथाद्वयेन संयुक्तं बभौ काव्यं महाकवेः ॥ २ ॥

यथा समस्तदेवानाममृतं हि सुखास्पदम् ।
तथा सम्पूर्णबुद्धीनां काव्यमेतद्बहुप्रियम् ॥ ३ ॥

सर्गैरनेकैर्बहुशोभमानं
पदैश्च श्लिष्टैः कविराजदत्तैः ।
भूदेवचिन्तामणिपण्डितो मां
शिक्षापयामास सदर्थकाव्यम् ॥ ४ ॥

वेदेषु शास्त्रेषु समग्रबुद्धि-
श्चैवापरो भाति द्विजोत्तमोऽसौ ।
सौजन्यसिन्धुर्बहुशोभमानो
चिन्तामणिश्चास्तु मम प्रसन्नः ॥ ५ ॥

पाराशर्यवचःसरोजममलं गीतार्थगन्धोत्कटं
नानाख्यानककेसरं हरिकथासम्बोधनाबोधितम् ।
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा
भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि वः श्रेयसे ॥

On the title page the following is given:—

ब्रह्मा रक्षश्च रुद्रेन्द्रभूचन्द्राकाँनलानिलाः ।
ऋषयश्चौषधग्रामाः भूतसङ्घाश्च पान्तु वः ॥
रसायनमिवर्षीणाममराणामिवामृतम् ।
सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते ॥

राघवपाण्डवीयग्रन्थ(:) १०६०

॥ राघवपाण्डवीयम् ॥

3727. RĀGHAVAPĀṆḌAVĪYAM.

Burnell's Catalogue No. 4762. Page and column Nil. Substance—Paper. Size—7¾ × 4½ inches. Sheets—35. Lines—13 to a page. Script—Devanāgarī. No. of Granthas—1060. Author—Kavirājapaṇḍita. (1–13 sargas). Complete.

Beginning, end and subject—Same as No. 3724.

Colophon :

तारणसंवत्सरे श्रावणवद्यदशम्यां भानुवासरयुक्तायां मायूरक्षेत्रे राघवपाण्डवीयाख्यं काव्यं समाप्तिमगमत् । नाडे सावदमङ्गारेरिदं पुस्तकम् ॥

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ शुभमस्तु ॥

Remarks:—The Ms. is in good condition.

This Ms. was copied at Māyūra on Sunday 10th day of the dark fortnight in the month of Śravaṇa in the cyclic year Tāraṇa. The Ms. originally belonged to Nāḍe: Sāvada Mallāri.

॥ राघवपाण्डवीयम् ॥

3728. RĀGHAVAPĀṆḌAVĪYAM.

Burnell's Catalogue No. 4763.

Substance—Paper. Size—10 × 4½ inches. Sheets—17 (1-19-of which 12th and 13th wanting). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—340. Author—Kavirājapaṇḍita. (1-5 sargas). Incomplete.

Beginning—Same as No 3724.

End:

ततो रथव्याघ्रतघोषयात्रः
सुरेन्द्रसेनाकृतरोषबन्धः ।
अजातशत्रूचमराक्षितात्मा
मायी रिपुस्तद्वनगोचरोऽभूत् ॥ ७ ॥

अथ स्फुरच्चित्रमृगोपलब्ध्यै
दूरङ्गते सावरजे नरेन्द्रे ।
(तदाश्रमोपान्तमवाप लोभा-
ज्जयद्रथस्तीव्रतरादशास्यः ॥ ८ ॥)

Colophon: (Sheet No. 18.)

इति श्रीराघवपाण्डवीये ० खरदूषणनिवातकवचवधो नाम
चतुर्थः सर्गः ॥

Subject: Rāghavapāṇḍavīya. 1-5 sargas.

Remarks:—The Ms. is in good condition. This Ms. abruptly ends with the first half of the 8th śloka of the 5th sarga.

The work has not been noticed by Dr. Burnell.

॥ राघवपाण्डवियम् ॥

3729. RĀGHAVAPĀṆḌAVĪYAM.

G. K. D. Collection No. 256. Substance—Paper. Size —9½×4 inches. Sheets—12. Lines—6 or 7 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Kavirājapaṇḍita. First sarga only.

Beginning—Same as No. 3724.

End:

द्विजराजगतीभिस्संवर्धितश्रीनृपात्मजः ।
जगदानन्दयन्साक्षात्कामदेव इवाबभौ ॥ ९२ ॥

Colophon:

इति श्रीराघवपाण्डवीये महाकाव्ये प्रथमः सर्गः ॥

Subject: Rāghavapāṇḍavīya. First sarga only.

Remarks:—The Ms. is in good condition.

॥ राघवपाण्डवीयव्याख्यानम् ॥

3730. RĀGHAVAPĀṆḌAVĪYAVYĀKHYĀNAM.

Burnell's Catalogue No. 4764.

Substance—Paper. Size—10×5 inches. Sheets—63. Lines—12 or 13 to a Page. Script—Devanāgarī. No. of Granthas—1784. Author—Lakṣmaṇa. Complete.

Beginning:

श्रीगणेशाय नमः ॥

पाणिनये गौतमये जैमिनयेऽनन्तबादरायणये ।
सर्वस्वं निजमेकं सद्विद्यातीर्थमुत्तमश्लोकम् ॥ १ ॥

भास्वद्भ्रह्मज्ञानिवंशावतंस-
श्रीमद्भोजादत्तसूरिप्रसूतेः ।
हृद्यो विद्वल्लक्ष्मणस्य प्रयासो
विश्वेशस्य प्रीतये शश्वदस्तु ॥ २ ॥

परमात्मानमानम्य श्रीरामायणभारते ।
आवश्यकपदान्येव विवरीतुं यतामहे ॥ ३ ॥

निरस्तानर्थमद्वैतमखण्डानन्दमिच्छता ।
आत्मा द्रष्टव्य इत्यादिरस्ति वेदान्तडिण्डिमः ॥ ४ ॥

सर्वोपाधिविनिर्मुक्तं सच्चिदानन्दमद्वयम् ।
स्वं विज्ञातुमनीशस्य सगुणोपासनोदिता ॥ ५ ॥

साप्यत्यन्तविमूढानामशक्येति दयालवः ।
कवयः कृष्णरामादिवर्णनैरुद्धरन्त्यमून् ॥ ६ ॥

विष्णुरेवेदमखिलमिति यद्यपि निश्चितम् ।
तथापि नैतन्मन्दानां मतिमारोहति द्रुतम् ॥ ७ ॥

सर्ववेदैकसारस्य प्रणवस्याप्युपासनम् ।
संसारतरणोपायं कोऽपि नोमिति मन्यते ॥ ८ ॥

श्रुतिस्मृतिपुराणादिप्रसिद्धमहिमोर्जिता ।
कस्यामपि स्थितिः कस्याप्यभागस्य न दृश्यते ॥

अतः परमसिद्धान्तमाघ(ह)पद्यैः प्रदर्शयन् ।
रामधर्मात्मजव्याजं प्रस्तौतु कविरीश्वरम् ॥ १० ॥

॥ स्वाधिष्ठानमिति ॥

अधिष्ठीयत इत्यधिष्ठानमासनम्० । "अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि" इत्यमरः । रंजसा परागेण पिञ्जरेतीतरशिल्पसाम्यम्० । इच्छेति तद्वैलक्षण्यम्० कर्मपादोपादानेनैव शिल्पितावगमान्नाधिकपदत्वम्० व्यतिरेकालङ्कारध्वनिः । तेन सङ्कल्पमात्रसामग्रीकं विश्वसृजं नमस्यतामयापि तन्मात्रसामग्रीका काव्यसृष्टिः सुकरेति व्यज्यत इति प्राञ्चः । वस्तुतस्तु संसारानर्थनिवर्त्तिरूपं महामोहमहिम्ना चेतनाचेतननानाप्रपञ्चात्मनावभासमानाखण्डानन्दात्मतत्त्वमेवात्र नन्तव्यत्वेनोपन्यस्तमिति मन्तव्यम् । तथा हि । स्वस्यात्मनोऽधिष्ठानं पुरं शरीरं तथाम्बुजं हृदयकमलं "ब्रह्मपुरे दहरं पुण्डरीकम्" इति श्रुतेः । तत्र रजःपुञ्जेन सूक्ष्मसमुदायेन लिङ्गशरीरेण पिञ्जरा० रलयोरेकत्वस्मरणात्० पिञ्जलाभृशमाकुलामूर्तिः स्वरूपं यस्य० "समुत्पिञ्जपिञ्जलौ भृशमाकुलौ" इत्यमरः । देहद्वयतादात्म्यापन्नो हि चिदात्मा तद्धर्मानात्मन्यभिमन्यमानो व्याकुल इव लक्ष्यते० । अनेन तत्त्वमस्यादिवाक्यगतत्वं पदार्थश्चिन्मात्रो लक्षितः । "योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः" इति श्रुतेः । इच्छेत्यादिना सङ्कल्पमात्रमूर्तिभूतभौतिकप्रपञ्चाभिन्ननिमित्तोपादनतोपलक्षितशुद्धस्य पदार्थो दर्शितः । तयोरौपाधिकभेदस्य

वस्तुतोऽभावादर्थसिद्धमभेदं सामानाधिकरण्येन प्रदर्श्य ब्रह्मण इत्यनेन त्रिविधपरिच्छेदशून्यं तत्त्वमस्यादिवाक्यतात्पर्यगम्यमखण्डानन्दरूपं वस्तूपदिष्टम् । "स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म" इति श्रुतेः । नम इति तु द्वैतस्य तदनन्यत्वात्काल्पनिको नन्वनन्यभाव इति सिद्धान्तरहस्यं प्रदर्शितम्० । न केवलं कविसृष्टेरेव बाह्योपादानाद्यनपेक्षा, अपि तु वियदादिसृष्टेरपि । "वाचारम्भणं विकारो नामधेयम्" इति श्रुतेः इति ॥ १ ॥

End:

॥ श्रिया ॥

स रामो युधिष्ठिरश्च भरतप्रत्यर्पितया भरतकुलागतया च श्रिया सेवितः । अनुजा लक्ष्मणादयो भीमादयश्च० । कामदेवः स्मरः काव्यप्रयोजकश्च० । सभाः सशोभः रत्या पत्न्या प्रीत्या च० । सानुमदः शिखरमार्गान्यतरश्च० । "सानुः प्रस्थे तुषे मार्गे वात्यायां पल्लवे मदे" इति विश्वः । राजसरस्वतीसहितया लक्ष्म्येति वा० स्मरपक्षे सानुजः स वसन्तः साधुषु वत्सलः तद्वदुन्मादकः । राजपक्षे सावरजः साध्नोति त्रिवर्गं साधुः स चासौ वत्सलः स्निग्धश्चेति वा ॥ ६४ ॥

Colophon:

आवश्यकपदश्लेषव्याचिख्यासावशात्मनः ।

लक्ष्मणस्य कृतौ सर्गे इत्यासीत्त्रयोदशः ॥

आवश्यकपदश्लेषपदाशयैक-
विपक्षयानुक्षणमक्षिणीयम् ।
श्रीलक्ष्मणो राघवपाण्डवीयं
व्याचष्ट विस्पष्टगभीरभावम् ॥ १ ॥

उत्तमश्लोकपादाब्जरजोनिर्मृष्टचेतसः ।
दत्तसूरिकृति...........रस्तु सतां मुदे ॥ २ ॥

भास्वद्ब्रह्मज्ञानिवंशावतंस
श्रीमद्गोजादत्तसूरिप्रसूतेः ।
हृद्यो विद्वल्लक्ष्मणस्य प्रयासो
विश्वेशस्य प्रीतये शश्वदस्तु ॥ ३ ॥

Subject: A commentary on the Rāghavapāṇḍavīya. 1—13 Sargas.

Remarks:—The Ms. is in good condition

The author of the commentary, Lakṣmaṇapaṇḍita was the son of one Gojādattasūri.

॥ रामचन्द्रोदयम् ॥

3731. RĀMACANDRODAYAM.

Burnell's Catalogue No. 10143. Page 161. Right column. Substance—Palm leaf. Size—$15\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—177 (69th missing). Lines—6 to 10 to a Page. Script—Grantha. No. of Granthas—5200. Author—Venkaṭeśa. (1-30 sargas). Complete.

Beginning:

अमृताब्धितरङ्गौघमिन्दिरापङ्गमाश्रये ।
यः पुष्यति हरेरन्तरानन्दकलपाङ्कुरम् ॥ १ ॥

उभय्यो भूतयो यस्य निगमा नित्यवन्दिनः ।
स विष्णुः कर्मणा बद्धं सर्वं जगदजीजनत् ॥ २ ॥

महतस्तस्य नेत्राब्जादूर्जस्सौहार्दसंयुतम् ।
कालवस्तु कृतस्पन्दं किञ्चिज्ज्योतिरबोभवीत् ॥

सहस्रपात् प्रसूतिं तं सहस्रकरमामनन् ।
यद्वंशसम्भवा भूपा असङ्ख्यतान् करान् ययुः ॥

व्यालोलरश्मिभिर्बद्धः पद्मरागश्रियोज्वलः ।
यो विशालद्युमञ्जूषो द्युमणिः समकीर्त्यत ॥ ५ ॥

गुणजालनिधेस्तस्य तैक्ष्ण्यमेकं न दूषणम् ।
लक्ष्मीसुधानिधानस्य विषं जलनिधेरिव ॥ ६ ॥

प्राची सीमन्तसिन्दूरं यन्महः सुप्तबोधनम् ।
कान्ताकुतूहलाक्रान्तश्चक्रवाकोऽभिनन्दति ॥ ७ ॥

यस्य ज्योत्स्नासुधासारञ्जगतां मङ्गलं यशः ।
दधतानं सदा वेदैः कोकवर्गोऽनुगायति ॥ ८ ॥

एकचक्रचरं यस्य शताङ्गमतिमारुतः ।
एकोऽश्वः सप्तसंज्ञाको वहन्दिवि विराजते ॥ ९ ॥

सिद्धखिजगतीदीपः कोकभृङ्गारसीमभूः ।
यः प्राचीकुङ्कुमज्योतिर्दीपो वज्रमणीयते ॥ १० ॥

सरूपसर्ववस्तूनां ज्ञाने तस्य सहायता ।
आगता जन्म कान्ये किमात्मकारणलोचनात् ॥ ११॥

यदा धत्ते मुमुक्षूणां मार्गे संसरणत्यजाम् ।
अविरिश्चं प्रपञ्चस्य का कथा मतिकल्पने ॥ १२॥

पद्मिनीं पद्मया जुष्टां शृङ्गाररसशीतलाम् ।
काले करेण सम्बोध्य धत्ते रागं मदेन यः ॥ १३ ॥

आदाय प्राणिनां प्राणानस्तं यातो दिने दिने ।
सह प्राणभृतां प्राणैरुदयं योऽभिगच्छति ॥ १४ ॥

End:

काश्मीराङ्कुसुमं त्रिगर्तनृपतश्चेन्द्रप्रभं चापरं
पाण्ड्येन्द्रादत्रमौक्तिकानि मलयक्षोणीपतेश्चन्दनः ।
नेपालान्नवकम्बला हिमगिरीशानाच्च कस्तुरिका
गोणी...मि...दित्यभिहितो विप्रार्चनायाश्वशात् ॥

निजपदविरहासहं रघूणां
कुलमणिरस्य विभीषणं प्रपन्नम् ।
अभिमन्त्रितफणीन्द्रभो(ग)मुष्य-
भूभुजमदात्स्वसमं हरिं स तस्मै ॥ १४८ ॥

पुष्पकमप्यमराहमुदारो
रावणघातविनिर्जितमेषः ।
वैश्रवणाय विविश्रुतकीर्तिः
प्रैषयत प्रयताञ्जलिबन्धः ॥ १४९ ॥

नित्यप्रमोदसुभगा नियतप्रसादा
दीर्घायुषो दलितरोगभयप्रवासाः ।

भूरिप्रदा बहुधना हुतवाजपेया-
स्त्वं ब्राह्मणा मुमुदिरे परिशीलयन्तः ॥ १५० ॥

प्रणिहितनियमानां ब्राह्मणानां प्रसङ्गै-
र्निकलविधनवृद्धाभीष्टदानोत्सवैश्च ।
अनुदिनमखिलानामन्तरात्मेव हृद्यो
जनकनृपतिपुत्र्या राघवोऽरक्षदुर्वीम् ॥ १५१ ॥

इत्थं रघूद्वहपदाब्जयुगं प्रपन्न-
स्तत्प्रेरणेन विलसत्करुणोदितेन ।
काव्यं विदेहतनयाकुशलोक्तिभव्यं
श्रीवेङ्कटेशकविरातनुतात्मलब्ध्यै ॥ १५२ ॥

इदं मे वैदेहीपरिवृढदयादिव्यतटिनी-
परीवाहाकारं प्रतिपदसमग्रस्फुटरसम् ।
कथं काव्यं भव्यं कलिकलुषितैरप्यकरुणै-
रमृष्यं(दूष्यं वा)रचितरघुनाथावमतिभिः ॥ १५३ ॥

वेदपूर्णगुणपावकपद्यं
व्योमवह्निसमसर्गमुदारम् ।
काव्यमङ्गगुणशैलयुगाब्दे
वेङ्कटोऽकृत कलौ कविवर्यः ॥ १५४ ॥

षट्त्रिंशदत्र वृत्तानि छन्दांसि तु चतुर्दश ।
खार्कप्राणा इह श्लोका अनुष्टुप्संख्यया मताः ॥ १५५ ॥

आत्रेयः श्रीनिवासाह्वयगुरुतनयः काव्यरत्नं व्यतानीत्
सीतानाथप्रसादप्रकटितधिषणो रामचन्द्रोदयाख्यम् ।

आसीतेशाभिषेकादुदितशुभकथं त्रिंशता यत्तु सर्गैः
तस्मिन्नामाभिषेकाभ्युदयशुभकथस्त्रिंश आभाति सर्गः ॥ १५६ ॥

हरिः ॐ ॥ श्रीनिवासगुरवे नमः ॥

Subject: Rāmacandrodaya. 1-30 sargas.

Sarga.	Ślokas.	Leaves.	Sarga.	Ślokas.	Leaves.
I.	107	7	XVI.	107	92
II.	107	14	XVII.	108	98
III.	111	20	XVIII.	105	103
IV.	121	27	XIX.	107	108
V.	111	33	XX.	108	112
VI.	108	41	XXI.	110	116
VII.	102	47	XXII.	109	121
VIII.	105	52	XXIII.	105	128
IX.	108	57	XXIV.	105	133
X.	105	62	XXV.	119	140
XI.	106	67	XXVI.	131	146
XII.	102	72	XXVII.	136	154
XIII.	104	79	XXVIII.	122	165
XIV.	111	84	XXIX.	73	169
XV.	108	88	XXX.	156	177

Remarks:—The author of the work, Veṅkaṭeśa is the son of Āttreya Śrīnivāsa and gives the date of the composition as Kali 4736 or A. D. 1635. The work is not available in print.

The two leaves placed before the first leaf contain the following:—

यतीन्द्रकरुणापात्रं तन्महानसकिङ्करम् ।
आत्रेयप्रवणं वन्दे प्रणतार्तिहरं गुरुम् ॥ १ ॥

तातकारुण्यसम्प्राप्तज्ञानभक्तिरसामृतम् ।
यतिराजाह्वयं वन्दे देशिकं दिव्यदर्शनम् ॥ २ ॥

यतिराजगुरोः सूनुं पाषण्डमतखण्डनम् ।
आचार्यं पद्मनाभाख्यं भवसन्तारकं भजे ॥ ३ ॥

नमो रामानुजार्याय वेदान्तार्थप्रदायिने ।
आत्रेयपद्मनाभार्यसुताय गुणशालिने ॥ ४ ॥

रामानुजार्यसम्प्राप्तसर्वविद्यासमृद्धये ।
पद्मनाभाय महते तत्सुताय नमो नमः ॥ ५ ॥

पद्मनाभगुरोः सूनुं तत्कृपावाप्तवैभवम् ।
पुरुषोत्तममाचार्यं गुणसिन्धुमुपास्महे ॥ ६ ॥

तातपाददयापात्रं मायावादतमोरविम् ।
व्याख्यातन्यायकुलिशं नरसिंहार्यमाश्रये ॥ ७ ॥

नृसिंहदेशिकावाप्तज्ञानविज्ञानसम्पदे ।
आत्रेयशठकोपाय नमो वैराग्यसिन्धवे ॥ ८ ॥

श्रीशठकोपपदाम्बुजभृङ्गं तत्करुणेक्षणलम्भितबोधम् ।
देशिकमन्त्रिकुलाम्बुधिचन्द्रं नौमि नृसिंहमनन्तगुणाब्धिम् ॥ ९ ॥

श्रीमन्नृसिंहार्यसुतं महान्तं वेदान्तधुर्यं व्यवहारशीलम् ।
आचारहेतुं करुणापयोधिं वन्दे वदान्यं पुरुषोत्तमार्यम् ॥ १० ॥

पुरुषोत्तमपादाब्जसेवासंप्राप्तसम्पदे ।
नमः श्रीवेङ्कटेशाय गुरवे भक्तिसिन्धवे ॥ ११ ॥

पराङ्कुशशठारातिकृपासंप्राप्तसम्पदम् ।

श्रीवेङ्कटेशतनयं श्रीनिवासार्यमाश्रये ॥ १२ ॥

It may be interesting to note that the copyist has worked out the Muraja, Ardhabhramaka, Sarvatobhadra and various other bandhas in palm leaf very dexterously.

॥ रामचन्द्रोदयम् ॥

3732. RĀMACANDRODAYAM.

Burnell's Catalogue No. 10144. Page 161. Right column. Substance—Palm leaf. Size—14 × 1½ inches. Leaves—228. Lines—5 to 7 to a Page. Script—Telugu. No. of Granthas—5200. Author—Veṅkaṭeśa. (1-30 sargas). Complete.

Beginning, end, colophon and subject—Same as No. 3731.

Remarks:—The Ms. is in good condition. One Yellāśāstrin copied this Ms.

॥ रामचन्द्रोदयव्याख्या ॥

3733. RĀMACANDRODAYAVYĀKHYĀ.

Burnell's Catalogue No. 10147. Page 161. Right column. Substance—Palm leaf. Size—16½ × 1½ inches. Leaves—278 (Two leaves with No. 195). Lines—7 to 10 to a Page. Script—Grantha. No. of Granthas—9750. Author—Veṅkaṭeśa. (1-30 sargas). Complete.

Beginning:

अस्यानेकार्थजुष्टस्य काव्यस्य महतः स्वयम् ।
रामचन्द्रोदयाख्यस्य विवृतिः क्रियते मया ॥

॥ अमृतेति ॥

अमृताब्धितरङ्गाणां सुधासमुद्रवीचीनां ओघं प्रवाह-मिति रूपकम् । इन्दिरापाङ्गं लक्ष्मीकटाक्षमाश्रये भजामि । यः अपाङ्गः हरेः विष्णोरन्तर्हृदये आनन्द एव कलनः शाली तस्याङ्कुरः पुष्यति वर्धयति ॥ १ ॥

End:

आत्रेयः श्रीनिवासप्रभवः उत्पत्तिस्थानं यस्य । सीता-नाथस्य प्रसादेन प्रकटिना धिषणा यस्य स कविर्महत्का-व्यरत्नमिति अनेन प्रकारेण व्यतानीत् । श्रीनिवासाह्वय इति । गुरुतनय इति पाठे तु काव्यरत्नं व्यतानीदित्येव । भूतसामान्ये लुङ् । यत्काव्यमासीतेशाभिषेकात् रामाभि-षेकेण सह त्रिंशता सर्गैः उदिता उक्ता शुभा कथा य-स्मिन् काव्ये तस्मिन् त्रिंशतां पूरणः सर्गस्तु रामाभिषेका-भ्युदयेन विलसितः * * कार्शी गतेन क्लृप्तं काव्यं मुनिबाणतिथिमिते हि शके ॥ १५७ ॥

Colophon:

नृसिंहार्यपौत्रस्य पौत्रः कवीन्द्रः
तथा वेङ्कटेशार्यपौत्रः प्रसिद्धः ।
स्वयं श्रीनिवासार्यसूनुः स्वकाव्यं
लघुव्याख्यदाप्तार्थनाद्वेङ्कटेशः ॥
सीतारामभरतलक्ष्मणशत्रुघ्नेभ्यो नमः ॥

Subject: Rāmacandrodayavyākhyā. 1-30 sargas.

Remarks:—The Ms. is in good condition.

The commentary is by the author of the text itself. It is somewhat curious to note that certain differences in the reading of the text are referred to by himself. It is a matter for

great wonder that pictorial diagrams have been deftly worked out even in palm leaf manuscripts. Similar diagrams have been referred to before. See No. 3731.

A paper transcript of this work is available in this Library. See T. V. No. 331.

॥ रामचन्द्रोदयव्याख्या ॥

3734. RĀMACANDRODAYAVYĀKHYĀ.

Burnell's Catalogue No. 10146. Page 161. Right column.

Substance—Palm leaf. Size—14¼×1 inches. Leaves—392. Lines—6 to a Page. Script—Telugu. No. of Granthas—9750. Author—Veṅkaṭeśa. (1—30 sargas). Complete.

Beginning, end, colophon and subject—Same as No. 3733.

Remarks:—The Ms. is in good condition.

॥ रामचन्द्रोदयव्याख्या ॥

3735. RĀMACANDRODAYAVYĀKHYĀ.

Burnell's Catalogue No. 10148. Page 161. Right column.

Substance—Palm leaf. Size—15¼×1½ inches. Leaves—23 (178-201 of which 190th missing). Lines—8 to a Page. Script—Grantha. No. of Granthas—660. Author—Veṅkaṭeśa. (15th and 29th sargas only). Incomplete.

Beginning:

साकेतेति । विचित्रानिति । चित्रः सर्गः सूचितः ॥ १ ॥
रामालोकैः स्त्रीलोकैः । सन्तो.... । आयुची रामविलो-
किभिः संगतः अन्तो यस्याः तां अयोध्यां योद्धुमशक्यां
अवसत् ॥ २ ॥

माराधिकानां कामाधिकानां नलिनेक्षणानां स्त्रीणाम्
नलिने पद्मे मायाः श्रियः राधिकानां पूजयित्रीणां समूहं
क्षणानां त्रयं विलोक्यावरुरोह ॥ ३ ॥

End:

॥ यस्मिन्निति ॥ प्रत्नं प्राक्तनम् । कर्णमेव नेत्रं
कुर्वन्ति । श्रवणेनैव साक्षात्कार इत्यर्थः । सदा नित्यं
गमः गमनम् । शेषपक्षे । नेत्रकर्णयोरेकत्वं सर्पत्वात् ।
सदागमन्यापृतिः सद्वेदान्तविद्याभ्यासङ्गः ॥ ७५ ॥

॥ राम इति ॥ ७६ ॥ दाशरथाविति ॥ ७७ ॥

Colophon:

एकोनत्रिंशः सर्गः ॥ इयं व्याख्या कविनैव कृता ॥

घृतितिथिमिते शकाब्दे जनिमानुपकाञ्चिवेङ्कटेशकविः ।
काव्यमिदं व्याचष्टे स्वयमेव सतां नियोगमासाद्य ॥

ग्रन्थसङ्ख्या ॥ ५७६ ॥

सिद्धवर्गसमा व्याख्या श्लिष्टचित्राख्यसर्गयोः ॥ ६५६ ॥

Subject: Rāmacandrodayavyākhyā 15th and 29th sargas only.

Remarks:—The Ms. is in good condition. The commentary, though by the author himself, is only an abridgement of No. 3733.

॥ विज्ञानतरङ्गिणी ॥

3736. VIJÑĀNATARAṄGIṆĪ.

Burnell's Catalogue No. 6308. Page 91. Right column. Substance—Paper. Size—10 × 5¼ inches. Sheets—149. Lines—12 to a Page. Script—Devanāgarī. No. of Gran-

thas—3000. Author—Mahārudrasimha. Complete.

Beginning:

श्रीगणेशाय नमः ॥

यः सर्वाच्युतवेधसां भुवि तनुर्गुप्ता जनैर्लक्ष्यते
येषां भाग्यसुरद्रुमः फलभरैर्नम्रः कृपासागरः ।
यस्त्रातुं क्षमतेऽपि दैवतरुजो ज्ञानेध्मवैश्वानरो
मोहध्वान्तविनाशिवाञ्छितकरो देयान्मतिं निर्मलाम् ॥ १ ॥

समस्तविज्ञानकलासुरद्रुमं
प्रजेशदेवज्ञमुनीन्द्रवन्दितम् ।
मुकुन्दरुद्रप्रथमप्रपूजितं
गणाधिपं मङ्गलदायकं भजे ॥ २ ॥

स्फुरत्सहस्रांशुसमूहशोभितो
यवारुणाङ्गो धृतपद्महस्तकः ।
हृदि स्थितः श्रीहरिणातिसुन्दरः
करोतु शर्मप्रकरन्दिभाकरः ॥ ३ ॥

निर्जितेन्द्रियजनाभिवन्द्ययोः
कल्पवृक्षनवपल्लवाभयोः ।
भक्तिरस्तु मम सन्ततं दृढा
नन्दनन्दनपदारविन्दयोः ॥ ४ ॥

योगिनां हृदयाकाशे यो जागर्ति महेश्वरः ।
स सर्वदेवसम्पूज्यः कुर्यात्कल्याणमुत्तमम् ॥ ५ ॥

परिस्फुरद्रम्यकचारुवर्णा
समुल्लसन्मौक्तिकशुक्तिकर्णा ।

मदोद्भमत्कोकिलमञ्जुवाणी

करोतु कल्याणततिं भवानी ॥ ६ ॥

नारायणप्रियतमा शरदिन्दुशुभ्रा

शोणारविन्दरमणीयपदारविन्दा ।

विज्ञानकल्पलतिका प्रकृतिप्रगल्भा

वाणी सदा वसतु कण्ठतले मदीये ॥ ७ ॥

तेजोमयी मूर्तिरुमाधवस्य

सर्वामराणां वदनं सुचारु ।

ज्ञानाग्रदज्ञानकृतं ममारा-

दघेन्धनं भस्म शिखी करोतु ॥ ८ ॥

भक्तिज्ञानविवर्धनीं श्रुतवतां कर्णे सुधास्पर्धिनीं

साधूनां सुधियां विमूढमनसामप्याशयोल्लासिनीम् ।

श्रीमच्छङ्करदासवर्णनमयीं रम्यां जगत्पावनीं

सीतारामगिरीन्द्रजाहरगुणग्रामाधिवासोज्ज्वलाम् ॥ ९ ॥

दोरुद्दामभुजङ्गविक्रमविषज्वालावलीढाखिल-

द्विड्वर्गस्य दलेलसिंहनृपतेः प्रख्यातकीर्तेः सुतः ।

राधाकृष्णपदारविन्दमधुपः श्रीरुद्रसिंहः सता-

मक्रीतानुचरो मुदा प्रकुरुते पूर्वां शुभाख्यायिकाम् ॥१०॥

युग्मम् ॥

श्रीविज्ञानतरङ्गिणी मुररिपोर्नामावलीभङ्गिनी

श्रेयःसागरसङ्गिनी बुधझषापापद्रुमोन्मूलिनी ।

आनन्दभ्रमराकुतूहलकथाप्रागल्भ्यपूर्णामृता

स्नानार्थं परभूतिहृष्टमनसां भूयात्सदा धीमताम् ॥ ११ ॥

पितुराज्ञां समासाद्य गुरुणानुमतः शिशुः ।
प्रवृत्तोऽस्मि तरीतुं तामगाधोग्ररयां नदीम् ॥ १२ ॥

ननु भगवद्गुणानुवर्णनं विहाय निष्फले किमर्थं प्रवर्तसे इत्यत आह(?) । "प्राणेभ्यो मत्प्रिया भक्ताः" इति भगवद्वचनाद्भक्तानां कथा भगवतः स्वगुणवर्णनादप्यधिकतरप्रीतिजननी। अतोऽत्र भक्तप्रवरस्य राज्ञः शङ्करदासस्य पुण्यश्लोकस्य समस्तकलिकलुषविध्वंसिनि चरिते साद्भिरवश्यं प्रयत्नः कर्तव्यः ।

"क्वाहं क्षुद्रमतिर्मोहग्रस्तो भवकूपनिपतितो महामन्दः ।
क्व विबुधगणवेद्यं शङ्करदासमहीपतेश्चरितम् ॥ "

इति मत्वापि शिवप्राणप्रियभक्तकथाकरणायोद्यते मयि स्वयमेव स ज्ञानं दास्यतैवेत्यालोच्य परिश्रमाय प्रोत्सहे ॥

End:

प्रभूतो ह्लादो येषां ते प्रह्लादाः । प्रेतादयस्तेषां प्रेम्णा पूर्णः । अवलरिपुदमनः । अकारो विष्णुः, स एव वल येषान्ते अवला वैष्णवास्तेषां रिपवस्तान् दमयन्तीति । दम्य उत्सेकं गर्वं हर्तुं शीलं यस्य सा "दासृ दाने" धातुः । दास्यते इति दासो ब्राह्मणो (गु)णवान् । "गुणवान्ब्राह्मणो दासः" इत्यमरमालायाम् । .... शेषं समानम् ॥ ४ ॥

Colophon:

इति श्रीमच्छङ्करदासचरणनखचन्द्रचन्द्रिकासादरपानमात्रैकावलम्बनात्मचकोरश्रीमहारुद्रसिंहविरचितायां रामगुणभूधरप्रस्तुतायां

कृष्णनवनीरदस्नेहासारसलिलपूरितायां विज्ञानतरङ्गिण्यां श्री-
शङ्करदासगोलोकनिवासवर्णनं नाम षोडशः कल्लोलः समाप्तः ॥

शुभमस्तु ॥

Subject: Vijñānataraṅgiṇī. 1-16 Kallolas.

Remarks:—The Ms. is in a fairly good condition. This work has not been printed so far.

॥ विशेषणरामायणम् ॥

3737. VIŚEṢAṆARĀMĀYAṆAM.

Burnell's Catalogue No. 10276. Page 162. Left column. Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—27 (13-39). Lines—4 to a Page. Script—Telugu. No. of Granthas—350. Author- Vīrarāghava. (1-7 Kāṇḍas). Complete.

Beginning:

श्रीकृष्णोऽवतु रुक्मिणीपरिणये वेदिस्थपीठे शिव-
ब्रह्मेन्द्रार्कमुखामरप्रतिफलप्राज्ञन्मणीभूषणैः ।
हाराद्यैर्निजविश्वरूपमखिलैर्देदीप्यमानस्तदा
सर्वेषामिव दर्शयन् यवनिकामाथामुदस्य स्थितः ॥
श्रीमद्योगकलाप्रफुल्लकमले हृन्मध्यगे कर्णिका-
पीठे रत्नमयेऽरवीन्दशिखिनां बिम्बान्तरे सुस्थितम् ।
रुक्मिण्या रमया भुवा विलसितं पार्श्वद्वये सत्यया
मध्ये श्रीहरिमिष्टदेवमतुलं कृष्णं जगन्मोहनम् ॥
श्रीमद्ब्रह्मपरं रमाप्रियतमं गौरीमनोनायकं
वाणीशं त्रिपुरां प्रणम्य शिरसा लक्ष्मीं सतीं शारदाम् ।

आनम्यात्मगुरून्विनम्य वरदं सम्पूज्य विघ्नेश्वरं
का...न्ता प्रतिपद्य राघवकविः काव्यं करोत्युज्ज्वलम् ॥

End:

दशरथवरपुत्रं ताटकादेहदात्रं
जलधरसमगात्रं सन्मुनिश्रेणिमित्रम् ।
विकचकमलनेत्रं विश्वसंस्तोत्रपात्रं
रघुसरसिजमित्रं नौमि सीताकलत्रम् ॥

श्रीनाथं सितपङ्कजपत्रनयनं सीतामनोनायकं
श्रीमत्कोमलनीलनीरजतनुं शृङ्गाररत्नाकरम् ।
चिद्रूपं जितदैत्यराजनिकरं सेतुक्रियाकारकं
सिन्धुप्रोन्नतगर्वपर्वतपविं श्रीकण्ठमुख्यैस्स्तुतम् ॥

....
....
....

चिन्तालोलमुनीन्द्रमानसगतं श्रीरामचन्द्रं भजे ॥

श्रीमत्काश्यपगोत्रपूतमहितापस्तम्बसूत्रस्य च
श्रीमन्नेल्लुरिरङ्गमन्त्रिसुधियः पौत्रस्य विद्यानिधेः ।
श्रीमत्पूजितवीणवेङ्कटपतेः पुत्रस्य रामायणं
काव्यं स्वीकुरु वीरराघवकवेः श्रीराम मे वाङ्मयम् ॥

श्रीरामाङ्घ्रिसरोरुहाङ्कितमिदं श्रीराघवाख्यावता
प्रोक्तं चारुतरं त्रिशेषणमहारामायणं वा नवम् ।
श्रीमच्चाटुकथाशुकाव्यरचनाचातुर्यवाग्वैखरी-
श्रीवैचित्र्यधुरन्धरेण कविना चन्द्रार्कतारं वसेत् ॥

Colophon:

इति श्रीमद्विशेषणरामायणे वीरराघवीये उत्तरकाण्डः समाप्तः ॥

श्रीरामार्पणमस्तु ॥ श्रीमन्मदनगोपालार्पणमस्तु ॥ श्रीः ॥

Subject: Viśeṣaṇarāmāyaṇa. 1-7 Kāṇḍas.

Remarks:—The Ms. is in good condition.

The author gives the following as his pedigree.

Nellurī Raṅgamantrin.
|
Vīṇa Venkaṭapati.
|
Vīrarāghavakavi.

The last mentioned, (i.e.) Vīrarāghavakavi is the author of this work. The work deals with the story of the Rāmāyaṇa, and has not been printed so far.

॥ शिवलीलार्णवः ॥

3738. ŚIVALĪLĀRṆAVAḤ.

Burnell's Catalogue No. 10194. Page 162. Right column.

Substance—Palm leaf. Size—$5\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—108. Lines—6 or 8 to a Page. Script—Grantha. No. of Granthas—2600. Author—Nīlakaṇṭhadīkṣita. (1-22 sargas). Complete.

Beginning:

श्रीकृष्णानन्दयोगीन्द्रचरणाम्बुरुहद्वयम् ।
धर्मार्थकाममोक्षाणां निदानं नित्यमाश्रये ॥

पूतं स्वतः पूततरं ततो यत्
गाङ्गं पयः शङ्करमौलिसङ्गात् ।
तत्पातु मातुः प्रणयापराध-
पादाहतेः पूततमं ततो नः ॥ १ ॥

* * *

अर्धं तनोरद्रिसुतामयोऽस्मी-
त्यहंयुना किं फलमादियूना ।
गीर्वाणयोगीन्द्रमुपास्महे तं
सर्वात्मना शैलसुतात्मको यः ॥ ५ ॥

कालेन शम्भुः किल तावतापि
कलाश्चतुःषष्टिमिता प्रणिन्ये ।
द्वासप्ततिं प्राप्य समाः प्रबन्धा-
ञ्छतं व्यधादप्पयदीक्षितेन्द्रः ॥ ६ ॥

End:

हालास्येशितुरीशितुर्यदि सखे लीलासु शुश्रूषसे
तत्सर्वागमगुप्तमस्य यदि वा तत्त्वं विजिज्ञाससे ।
पारं वाथ दिदृक्षसे यदि परं काव्यागमस्रोतसां
तत्कर्णे कुरु नीलकण्ठमखिनो वाचं शिवैकाश्रयाम् ॥९९॥

मलयध्वजपाण्ड्यकन्यकाचरणद्वन्द्वनिवेशितात्मना ।
शिवयोः कविनेदमर्पितं शिवलीलार्णवकाव्यमद्भुतम् ॥ १०० ॥

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्वाहकमहाव्रतयाजिश्रीमदप्पय्यदीक्षितसोदर्यश्रीमदाचादीक्षितपौत्रेण नारायणदीक्षितात्मजेन भूमिदेवीगर्भसम्भवेन नीलकण्ठदीक्षितेन विरचिते शिवलीलार्णवे द्वाविंशतितमः सर्गः ॥

हरिः ओम् ॥ शुभमस्तु ॥ शिवलीलार्णवं समाप्तम् ॥

Subject: Śivalīlārṇava, Complete.

Remarks:—The Ms. is in good condition. After the colophon

there are 13 blank leaves of which the 2nd leaf contains five ślokas beginning with

'महेशानन्ताद्यत्रिगुणरहितामेयविमल'

and ending with

जगद्दग्ध्वा स्थास्यस्यजहरनमोऽवेद्य शिव ते ॥ ५ ॥

The leaves viz., 11th & 12th contain the following:—

"श्रीरस्तु ॥ अस्माकं यत्कृपादृष्टिधर्मकामार्थमुक्तयः ।
कलये हृदि तां बालकृष्णानन्दसरस्वतीम् ॥
अथातो धर्मजिज्ञासा० विरोधेत्वनपेक्षं स्यादसतिह्यनुमानम् ॥"

The last i.e. 13th leaf contains:—

अर्थबोधोऽक्षरावाप्तिर्जपपारायणादिकम् ।
अधीत्या शक्यते यद्यत्तत्सर्वं भाव्यते तथा ॥ १ ॥

❁ ❁ ❁

अधीतिरक्षरावाप्तिः पदानामवधारणा ।
पदार्थवाक्यार्थधियाद्यनुष्ठानं ततः फलम् ॥

It is well known that Nīlakaṇṭha Dīkṣita was the grandson of the brother of Appaya Dīkṣita and that he wrote the Nīlakaṇṭha Vijaya Campū in 1638 A. D. This work has been printed both in the Śrī Vani Vilas Press and in the Trivandrum Sanskrit Series.

॥ शिवलीलार्णवः ॥

3739. ŚIVALĪLĀRṆAVAḤ.

Burnell's Catalogue No. 10195. Page 162. Right column. Substance—Palm leaf. Size—20¼ × 1¼ inches. Leaves—100. Lines—6 or 7 to a Page. Script—Grantha. No. of

Granthas—2600. Author—Nīlakaṇṭhadīkṣita. (1-22 sargas) Complete.

Beginning, end, colophon and subject—Same as No. 3738.

Remarks :—The Ms. is in good condition.

॥ सत्यनाथाभ्युदयः ॥

3740. SATYANĀTHĀBHYUDAYAḤ.

Burnell's Catalogue No. 10149. Page 163. Left column. Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—51. Lines—6 to 8 to a Page. Script—Nandināgarī. No. of Granthas—950. Author—Saṅkarṣaṇa. (1-11 Sargas.) Complete.

Beginning :

श्रीवेदव्यासाय नमः ॥

श्रीरामचन्द्रं शुभवक्त्रचन्द्रं
गुणौघसान्द्रं जनकात्मजेन्द्रम् ।
निरस्तचन्द्रं प्रणमामि वीन्द्रं
धनुर्धरेन्द्रं त्रिजगन्नरेन्द्रम् ॥ १ ॥

यो ह्यब्जगान् साधुजनानगाध-
भवाब्धिगान् सुव्यवतार्य बन्धून् ।
अब्धिस्थितान् शक्र इवोद्दधार
मध्वः समासुच्चरतात् भवाब्धेः ॥ २ ॥

तं सत्यनाथं जनगीतगाथं
सच्छ्लोकनाथं जितवादियूथम् ।
वन्देऽभिवन्द्यं दययैव सौख्य-
मपीपलन्नाह चिराययोऽलम् ॥ ३ ॥

स सत्यनाथो महिमाम्बुधिः क
क चाहमत्यल्पमतिस्तथापि ।
यथाश्रितश्चास्मि यथामनीषं
सन्नाथलीला कविकण्ठमालाम् ॥ ४ ॥

तदीयचर्यालसिताप्यलं मे
मदीयवागादरणीयता क ।
तुषाहरस्वान(?)कणोऽपि लोकैः
रत्नाकरो ह्याद्रियते समस्तैः ॥ ५ ॥

पुरात्रवानी समभूद्धि कृष्णा-
चार्याह्वयो भूसुरराट् धरायाम् ।
यो बंहयन् सद्गुणवारिराशि-
र्गोत्रेऽमले मौनसुभार्गवाख्ये ॥

कृष्णातटस्थे समचारिनाम्नि
द्विजाग्रणीः संवसथेऽरिशक्तः(?) ।
कृष्णाङ्घ्रिभक्तो विहिताग्निहोत्रो
न चार्थलिप्सोष्ण....रराज ॥

सदा स्ववर्णासमयोग्यकर्मा
वदात.............................भक्तः ।
गदाधराङ्घ्र्यम्बुजसंहितौघ-(?)
सरागमव्याकरणो न भूमौ ॥

तयावसत्सत्कुलशीलरूपा
सत्यस्वरूपाप्य....मनोज्ञा ।

धर्मानुकूला सततं प्रसन्न-
वक्त्राम्बुजा बन्धुमहाप्रमोदा ॥

तौ दम्पती लौकिकवैरिकोश-
संपत्सुतौ प्राभजतामपुत्रौ ।

सत्पुत्रकामौ कमलाकलत्रं
तत्केशवं भक्तियुतौ नृसिंहम् ॥

सेवाप्रसन्नस्य हरेः प्रसादा-
द्भूतं तयोः पुत्रमणिर्बभूव ।

बभूव भूमेर्वलयस्य भूषा-
मणिर्गुणाढ्यो जनलालनीयः ॥

End:

ये स्वामिनो नः परलोकसंस्था
अपि स्वमाहात्म्यमतीव चित्रम् ।

सरोजलोकायुतवक्त्रसिक्तं
कुर्वन्ति तान् वर्णयितुं प्रभुःकः ॥

यः पुत्रकामः स लभेत पुत्रं
यो वित्तकामः स लभेत वित्तम् ।

तत्सादिनाथोरुगुणान्स्मरेह
यो धर्मकामो लभते स धर्मम् ॥

एवं स सत्याभिनवो यतीन्द्रः
श्रीसत्यनाथेन्द्रमहाप्रभावम् ।

पुनः......................जनान् कृतार्थान्
कोल्हुरसंस्थान् विदधे दयालुः ॥

संभूय सर्वेऽपि यदीयमर्था-
    न्नालं प्रवक्तुं भुवनेऽतिचित्रान् ।
तं सत्यनाथेन्द्रमहं कथं स्यां
    कात्स्न्येन संवर्णयितुं समर्थः ॥

तथापि या भक्तिवरात्प्रलीला
    श्रीसत्यनाथाख्यजगद्गुरूणाम् ।
मयापधारो(?) भुवि वर्णिता सा
    भूयान्मनोज्ञा कविकण्ठमाला ॥

मयार्पितानादरतः सुवर्ण-
    मालां रमेशातिनवां हृदिस्थे ।
स्वीकृत्य रामो तव तु प्रसन्नः
    श्रीसत्यनाथेन्द्रहृदब्जवासी ॥

श्रीसत्याभिनवीनतीर्थयतिराट्शिष्येण तत्प्रीतये
    शेषाचार्यतनूभवेन रचिते सङ्कर्षणेनादरात् ।
काव्ये श्राव्यपदे महागुणनिधिश्रीसत्यनाथोदये
    श्लाघ्ये सद्गुणसारलुब्धकविभिः सर्गोऽयमेकादशः ॥

Colophon:

इति श्रीसत्यनाथाभ्युदये एकादशः सर्गः ॥

Subject: Satyanāthābhyudaya. 1-11 sargas.

Remarks:—The Ms. is in good condition.

This manuscript, in Nandināgarī characters is very hard to decipher. There is much resemblance between the script of this Ms. and that found in most of the Nandināgarī copper plates.

The author is one Saṅkarṣaṇa, son of Śeṣācārya. This work has not been printed so far.

॥ सत्यनाथाभ्युदयव्याख्या ॥

3741. SATYANĀTHĀBHYUDAYAVYĀKHYĀ.

Burnell's Catalogue No. 10819. Page 163. Left column. Substance—Palm leaf. Size—14¼ × 1½ inches. Leaves—131. Lines 6 or 7 to a Page. Script—Nandināgarī. No. of Granthas—3700. Author—Subrahmaṇyācārya. (1-11 sargas). Complete.

Beginning:

श्रीवेदव्यासाय नमः ॥

श्रीरामचन्द्रं गुणपूर्णबोधं
श्रीसत्यनाथेन्द्रमपि प्रणम्य ।
श्रीशमसत्यै विवृणोमि सम्यक्
श्रीसत्यनाथाभ्युदयाख्यकाव्यम् ॥

अथ कविः स्वचिकीर्षितकाव्यस्य निरन्तरायसमाप्त्यर्थं स्वेष्टदेवतानतिलक्षणमङ्गलमनुध्यायन् ग्रन्थादौ निबध्नाति ।

श्रीरामेति ॥ अत्रादौ श्रीशब्दप्रयोगान्न गणादिदोषः । अत उक्तम् ।

" देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्युः लिपितो गणतोऽपि वा ॥"

इति । प्रणमामीत्युत्तमपुरुषप्रयोगादहमिति कर्ता लभ्यते । तथा चाहं श्रीरामचन्द्रं प्रणमामीत्यन्वयः । "णमु प्रह्वत्वे

शब्दे च" इत्यतो लटि उत्तमपुरुषस्यैकवचनस्येदं रूपम् । प्रसन्नतथावस्थितस्यैव नमनमभीष्टकारीत्यतस्तं तथा विशिनष्टि । शुभवक्त्रचन्द्रमिति । वक्त्रं चन्द्र इव वक्त्रचन्द्रः शुभः वक्त्रचन्द्र यस्य स तथोक्तः । तं निर्धारितस्वरूपस्यैव नमनं फलदं निर्धारणश्च लक्षणेनेत्याशयेनोक्तम् । गुणौघयुक्तम् । गुणानां ज्ञानानां हरिगुणानां ओघेन समुदायेन "स्तोमौघनिकरव्रातवारसङ्घातसञ्चयाः । समुदायः" इत्यमरः । सान्द्रं निबिडं अनेन कल्याणगुणपूर्णत्वं तस्य लक्षणमित्युक्तं भवति । रमादीनां विद्यमानत्वादस्यैव नमनहेतुरित्युक्तम् ॥ जनकेति ॥ जनकस्य तन्नामकराजस्यात्मजायाः पुत्र्याः सीताया इन्द्रं पतित्वेन श्रेष्ठमित्यर्थः, सीताया रमारूपत्वात्तत्पतित्वेन तस्यापि श्रेष्ठत्वात् तन्नमनं युक्तमिति भावः । यत्र गुणस्तत्र दोषः इति व्याप्तिस्तु .... इति श्रुतेः भगवदतिरिक्तविषयिणीत्याशयेनोक्तम् । निरस्तचन्द्रामिति । निराकृतलक्ष्म्याद्युपलक्षिताशेषशेषमित्यर्थः । निरवधिकवैरिक्ष्मापपादनायोक्तम्—वीन्द्रामिति ॥ विगत इन्द्रः श्रेष्ठःयस्य तं निरवधिकोत्तरमित्यर्थः । गुणौघेत्युक्तं किञ्चिद्विवृणोति—

धनुर्धरेन्द्रं त्रिजगन्नरेन्द्रामिति ॥ अत्राद्येन पराक्रमलक्षणो द्वितीयेन स्वातन्त्र्यलक्षणगुणो वर्णितो भवति । सर्वजगद्वाचकस्य स्वातन्त्र्ये नियमार्थः । अस्य श्लोकस्य

स्वभावोक्तिरुपाधिरलङ्कारः । "स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम्" इति लक्षणात् । शब्दालङ्कारस्तु वृत्त्यनुप्रासः ॥

" ....एकद्विप्रभृतीनां पदान्तगे ।
पुनरुक्तिरसौ नाम वृत्त्यनुप्रास इष्यते ॥"

इति लक्षणात् । प्रायोऽस्मिन् सर्गे वृत्तमुपजातिः, इन्द्रवज्रोपेन्द्रवज्रयोः साङ्कर्यात् ।

"स्यादिन्द्रवज्रा यदि तौ जगौगः
उपेन्द्रवज्रा जतजागगौ चेत् ।
अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीया उपजातयस्ताः" ॥ १ ॥

End:

स्वहृदि मनसि वहसीति ध्वनिः । .... इति सज्जनः स्वीकृत्य प्रसन्नोऽभवत् ।

Colophon:

इति..... ......श्री सत्यनाथाभ्युदयटीकायां सुब्रह्मण्याचार्यकृतायां एकादशः सर्गः ।

श्रीसत्यनथाभ्युदयाह्वयकाव्यस्य टीकया ।
कृतया प्रीयतां रामः सत्यनाथेन्द्रहृद्भवः ॥
सत्याभिनवतीर्थेन्द्रं पितरं मातरं गुरुम् ।
सुहृदं सद्गुणाम्भोधिं भूयो भूयो वदाम्यहम् ॥

Subject: Satyanāthābhyudayavyākhyā. 1-11 sargas.

Remarks:—The Ms. is in a fairly good condition. This work has not been printed so far.

———

॥ हरिवंशसारचरितव्याख्यानम् ॥

3742. HARIVAMŚASĀRACARITA-VYĀKHYĀNAM.

Burnell's Catalogue No. 10320. Page 163. Left column.
Substance—Palm leaf. Size—15¾×1½ inches. Leaves—190. Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—4850. Author—Appayadīkṣita. (1-28 sargas) Complete.

Beginning:

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥ १ ॥

आ सेतुबन्धतटमा च तुषारशैल-
माचार्यदीक्षित इति प्रथिताभिधानः ।
अद्वैतचिन्मयमहाम्बुधिमग्नभाव-
मस्मत्पितामहमशेषगुरुं प्रपद्ये ॥ २ ॥

यं ब्रह्म निश्चितधियः प्रवदन्ति साक्षा-
दादर्शनादखिलदर्शनपानभाजः ।
तं सर्ववेदसमशेषबुधाधिराजं
श्रीरङ्गराजमखिनं पितरं प्रपद्ये ॥ ३ ॥

वाचा सोदरया सुधामधुरया नैकप्रबन्धानले-
स्सालङ्काररसध्वनिप्रणयिनां षड्दर्शनीदर्शिनाम् ।

व्याकुर्वे सुधियां मुदेऽप्पयगखीगोविन्दमन्त्रीरितं
काव्यं श्रीहरिवंशसारचरितं नानाविधालङ्क्रियम् ॥ ४ ॥

इह खलु गोविन्दमन्त्रीति विख्यातमहिमाभिख्यो महाकविः श्रीहरिवंशेन प्रपञ्चितां भगवत्कथां सहृदयहृदयाह्लादकारिण्या कान्तासम्मिततया काव्यसरण्या सञ्जिघृक्षु(रादौ) वस्तुनिर्देशरूपं (मङ्गलमाचरति)

(अस्तीन्दुरिन्द्रानुजचित्तशुक्ति-
मुक्तामणिर्मूलधनं सुराणाम् ।
अम्लानमुत्तंसमुमासखस्य
पुराविदः पुष्पमपां यमाहुः ॥)

(व्याख्या)

इन्द्रावरजस्य भगवच्चित्तमेव शुक्तिस्तस्या मुक्तामणिः सुराणां सुधाशनानां मूलधनं आहाररूपं .... अपां पुष्पम् । "चन्द्रमा वा अपां पुष्पम्" इति प्रसिद्धम् । उमासखस्य गौर्या सह चरतः शिवस्य अम्लानमुत्तंसं शेखरं पुराविदः प्राचीनाभिज्ञा वृद्धा आहुः वदन्ति । इहाम्भस्सारत्वशीतलत्वनयनानन्दनत्वादिसाम्यादिशब्दो मुक्तामणित्वेन रूपकस्य (गङ्गामृत)मुक्तामणिजननत्वसाम्यात् भगवच्चित्तस्य शुक्तित्वेन रूपकस्य च परम्परा सञ्जातेति तत्र परम्परितरूपकम् । सुधाशनानामिन्दुरनपायजीवनोपाय इति साम्यान्मूलधनत्वेन रूपकं तन्निरवयरूपकम् । अपां पुष्पमित्यपि निरवयवरूपकम् । समुद्रजलान्मुकुलवदुदेत्य पश्चात्प्रकाशातिशयरूपविकसनत्वशीलत्वादतिशीतलामृतमकरन्दभरित-

त्वाच्च साम्याज्जलपुष्पत्वनिरूपणम् । अम्लानमित्युत्तंस-विशेषणेन (प्रसिद्ध) पुष्पादाधिक्यविभावनादधिकरूपक-पर्यवसायि । "उपमैव तिरोभूतभेदा रूपकमिष्यते" इति रूपकलक्षणम् । केचिदारोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति परिणामालङ्कारलक्षणम् ।

आरोप्यमाणस्याधिष्ठानात्मना प्रकृतोपयोगित्वे परिणाम इति व्याचक्षते । अन्ये त्वधिष्ठानस्यारोप्यमाणात्मना प्रकृतोपयोगित्वे परिणाम इति व्याचक्षते । द्वितीयमते अपां पुष्पं(मित्यत्र) परिणा(मा)लङ्कारः । इहारोप्यमाणस्य पुष्पत्वस्य पुष्पात्मनोत्तंसनरूपप्रकृतकार्योपयोगित्वादेतेषाञ्च संसृष्टिः ॥ २ ॥

End:

॥ शिखीति ॥ शिखिनो वह्नेः समक्षमङ्गजभूरनिरुद्धः सुराहितप्रसुतनूभुवो दैत्येन्द्रात्मजायाः परिग्रहमतनुत । तेन तावदेव नासौ बाणोऽपि प्रबलसौहृद....घनसम्पदः परिग्रहमतनुत तत्कन्याग्रहणेन तस्मिन्यादवानां ...ढसौहृदमासीदित्यर्थः ॥ ५७ ॥

॥ ताततेति ॥ ताताज्ञप्त्या कृष्णनियोगेन जाम्बवत्यास्तनूजः साम्बः बाणामात्यस्य कुम्भाण्डस्य कन्याञ्चित्रलेखामितरे पुत्राः स...दयोभानुप्रभृतयः ॥ ५८ ॥

॥ आत्मेति ॥ आत्मैश्वर्यादपि शिष्टैरनूनैर्विभवगर्भैरैश्वर्यातिशयैः सा....बान्धवानार्यान् शिष्टानपि सपर्याविधिभिः पूजाकरणैर्नतान् प्रणतान् पा....वान् । अनूनैः

समग्रैः भूमिदानैः ....नमयन् (कुटिल) धिया शत्रूणां शासन्निग्रहं बाणमोक्षावधि बाणासुरमोक्षपर्यन्तं पूरयित्वा निरवशेष......दुष्टनिग्रहसाधुपरित्राणाभ्यां धर्मसंस्थापनमवधारादनिनिर्वर्तितमित्यानन्दसमृद्धिं (?) बिभ्रत् त्रैलोक्यरक्षामकुरुत । स्वारित प्र.........................
प्रयोजनबहुमानोऽस्तीति सूचयितुमात्मनेपदम् ॥ ६० ॥

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य श्रीविश्वजि-
(दतिरात्रयाजि रङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ
हरिवंशसारचरितव्याख्यायां त्रयोविंशतिः सर्गः ॥

हरिवंशसारचरितव्याख्यानं सम्पूर्णम् ॥

हरिः ओम् ॥ शुभमस्तु ॥ अविघ्नमस्तु ॥

श्रीरामचन्द्राय नमः । श्रीविघ्नेश्वराय नमः ॥

Subject: Harivamśasāracaritavyākhyā. 1-23 sargas.

Remarks: —The Ms. is in a fairly good condition.

The author of the Harivaṃśasāracarita is Govindamantrin and he ought not to be confused with the famous Govindadīkṣita, the minister of the Nāyak kings. As a matter of fact some scholars have made this confusion. This author was Govindamantrin and was attached to the Koṇḍavīḍu family of chieftains.

Appayya Dīkṣita's commentary alone on this work is available here. With great difficulty the text could be reconstructed from the commentary.

॥ खण्डकाव्यानि ॥

KHAṆḌA-KĀVYAS

॥ उषाहरणकाव्यम् ॥

3743. UṢĀHARAṆAKĀVYAM.

Burnell's Catalogue No. 10249. Page 157. Left column. Substance—Palm leaf. Size—$18\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—70. Lines—5 to a Page. Script—Grantha. No. of Granthas—950. Author—Trivikramapaṇḍita. Complete.

Beginning:

श्रीगणेशाय नमः ॥

लक्ष्मीलावण्यपीयूषपानपात्रायितेक्षणः ।
सनीरनीरदश्यामः पातु वो भगवान्हरिः ॥ १ ॥

यत्पादपद्मयुग(रेणुनिषे)वणेन
सद्यः प्रभूतमतयो भविनो भवन्ति ।
स्कन्दाभिधानगदितं गुरुमद्य मूर्ध्ना
ज्ञानामृतोपनिधिभूमिमहमुन्नमामि ॥ २ ॥

विज्ञानपाथेयवतां विपश्चि-
दागन्तुकानामहमात्मशक्त्या ।
आतिथ्यकार्याय फलं रसार्द्रं
काव्याभिधानं लिकुचः प्रसोष्ये ॥ ३ ॥

न प्रौढशब्दाऽपि न चार्थपुष्कला
न चाप्यलङ्कारशुभाकृतिर्मम ।
न श्राव्यवृत्ता रसिकैरुपेक्षिता
नवेति कैश्चिद्ध्रियते वधूरिव ॥ ४ ॥

न चात्र नैर्गुण्यकथा मुकुन्द-
पादाम्बुजस्मारकवाक्यबद्धे ।

यदृच्छयापि क्षिणुयाद्धि दोषान्
नाम्नां सकृत्कीर्तनमच्युतस्य ॥ ५ ॥
वैदर्भमार्गानुरताः कवीन्द्राः
केचित्परे गौडपथप्रवीणाः ।
प्रायेण तेषामनुवृत्त्यभावा-
द्वयानभिज्ञस्त्वपथेन यामि ॥ ६ ॥
तस्यास्तु दुर्भाषणदस्युदोष-
विध्वंसनो भक्तिरसः सखा मे ।
सङ्गं तु कामस्य पदारविन्दे
पापापहे पूर्णसुखस्य विष्णोः ॥ ७ ॥
श्रीमन्तं श्रीपतिं देवं देवास्सेन्द्रादिदक्षवः ।
क्षीरोदधिमुपाजग्मुः पुरोधाय प्रजापतिम् ॥ ८ ॥

End:

इत्थं कृतीन्बुधगुणान् स्वगुणैः प्रणीतैः
पूर्णः पुराणपुरुषः परमन्वशाच्च ।
ज्योतिर्गणानिव गवाञ्जगदेकदीपः
कालैरिवेन्दुरमलैरतिसुन्दरश्रीः ॥ ७३ ॥
परिततनिजतेजोऽपास्तसन्तापबीजः
प्रशमितमतिभेदैस्सेवितस्स्वैस्सुहृद्भिः ।
अमृतमयमगाह्यं विश्वहृद्यं स्ववेद्यं
स्वपदमुरुसुखं तत्सोऽध्यतिष्ठन्महिष्ठः ॥ ७४ ॥

Colophon:

इति श्रीमत्कविकुलतिलक श्रीमत्त्रिविक्रमपण्डिताचार्यविरचितोषाहर-
णाख्ये महाकाव्ये नवमः सर्गः ॥

Subject: Uṣāharaṇa Kāvyam 1-9 sargas.

Remarks:—The Ms. is in a fairly good condition. Last two leaves are much injured. The story is narrated of this author that he was once an *advaitin* but that in course of time he changed his creed and turned a *Dvaitin.* The work is in print, having been published originally from Bombay and later on from Mysore. The introduction gives the necessary information regarding the author.

The text, in the Mysore and the Bombay editions is accompanied by the commetary of Sumatīndra.

A paper transcript of this work is available in this library. See T. V. No. 61.

॥ उषाहरणकाव्यम् ॥

3744. UṢĀHARAṆAKĀVYAM.

Burnell's Catalogue No. 4795. Page 157. Left column. Substance—Paper. Size—10¼×4 inches. Sheets—4. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—72. Author—Trivikramapaṇḍita. Incomplete.

Beginning—Same as No. 3743.

End :

समरेषु महीयस्सु त्रिदिवे ये पराजिताः ।
ते दैत्यसत्तमा भूमौ बभूवुर्भूभुजां सुताः ॥ ७१ ॥

अभिषिक्ताश्च राज्येषु सप्रभावास्तरस्विनः ।
सुवेषा इव ते योषास्सर्वतो गृह्णते श्रियम् ॥ ७२ ॥

Colophon: Nil.

Subject: Uṣāharaṇakāvyam. First sarga 1-72 ślokas only.

Remarks:—The Ms. is in a fairly good condition.

॥ उषाहरणकाव्यटीका ॥

3745. UṢĀHARAṆAKĀVYAṬĪKĀ.

Burnell's Catalogue No. 10248. Page 157. Left column.
Substance—Palm Leaf. Size- 18½×1½ inches. Leaves—289 (71-359). Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—5580. Author—Sumatīndrayatiḥ. Complete.

Beginning:

श्रीमन्तो जानकीजानेः पदपङ्कजपांसवः ।
जयन्ति सीतावक्षोजकुङ्कुमश्रीविडंबनाः ॥ १ ॥

[येनाखण्डिमुदैव खण्डपरशोरुद्दण्डकाण्डाम्बिनः] सनं
भूदेवीतनयाप्यलाभि सरसैरङ्गैरपाङ्गैरपि ।
सद्भिर्मद्युतिहर्म्यनिर्मितलसन्नर्मोर्थशर्मोदयः
श्रीरामो मम मानसे वि(हरता)त् सीतासहायस्सदा ॥ २ ॥

सज्जनाम्भोरुहपुषे वेदव्यासाभिधाजुषे ।
तमस्तोममुषे तस्मै परस्मै ज्योतिषे नमः ॥ ३ ॥

आमोदं यो व्यातानीद्रघुकुलतिलके सेवया श्रीहनूमान्
भीमात्मा कृष्णदेवे प्रबलधरणीपव्याजवैरीन्द्रहत्या ।
मध्वाख्यो ब्रह्मसूत्रीप्रभृतिकृतिकृतान्योक्तिभाष्यादिकृत्या
श्रीवेदव्यासदेवे स दिशतु सुदृशं श्रीमदानन्दतीर्थः ॥ ४ ॥

जगन्ति न त्रीण्यपि यत्पदत्रय-
प्रयोगपर्याप्तफलानि जज्ञिरे ।
तमाननूषेयलसत्पदाः कृतिः
कथं प्रबन्धारमयुं त्रिविक्रमम् ॥ ५ ॥

हरेश्चरित्रं निबबन्ध चित्रं
चित्रायमाणैस्सरसैर्वचोभिः ।
त्रिविक्रमाचार्यसुधीरहञ्च
तत्सूक्तिसंशीलनतत्कृतार्थः ॥ ६ ॥

भूरिमनीषागमचितकरणान्
श्रीजयतीर्थप्रतिकृतिशरणान् ।
सन्ततमीडे सुचरित्तचरणान्
वेङ्कटनारायणगुरुचरणान् ॥ ७ ॥

यतिस्स सुमतीन्द्रराडहमनर्घ्यपद्यक्रम-
त्रिविक्रमकवेः कृपामुपचयं जगत्यां नयन् ।
उषाहरणदीपिकां रसिकरञ्जनीनामिकां
तनोमि सुमनोमनोघनविनोदभा(वो)द्याम् ॥ ८ ॥

पार्श्वद्वयप्रवहदच्छकवेरकन्या-
मुक्ताभ्यदामतरळस्सरळैर्वचोभिः ।
व्याख्याननैपुणमुषाहरणप्रबन्धे
दद्यादपाङ्गधानिनो मम रङ्गनाथः ॥ ९ ॥

श्रीमान् त्रिविक्रमपण्डिताचार्यः उषाहरणाख्यं महाकाव्यं चिकीर्षुस्तदादौ "आशीर्नमस्क्रियावस्तुनिर्देशोवाथ तन्मुखं" इति कविसमयसिद्धानाशीर्नमस्क्रियावस्तुनिर्देशान् लक्ष्मीत्यादि त्रिश्लोक्या करिष्यन्नादौ आशीर्वचनरूपमङ्गळमातनोति ॥

लक्ष्मीलावण्येति ॥ लक्ष्म्याः लावण्यम्—
"मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा ।

प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥"

इत्येकावल्यामुक्तं कान्तितरळत्वम् । पीयूषप्रभूतं तस्य पानस्य पात्रमिवाचरतः पानपात्रायिते ततो "गत्यर्था कर्मक" इत्यादिना कर्तरि क्तः । पानपात्रायिते ईक्षणे नयने यस्य स तथोक्तः ॥

End:

परिततेति ॥ सः एवमनुवर्णितचरित्रः । महिष्ठं अतिशयेन महान् सर्वोत्तमः अयं श्रीकृष्णः । परिततं परितो (विस्तृतं य)न्निजतेजःप्रभावः तेनापास्तं सन्तापस्य सञ्ज्वरस्य बीजं कारणं येन सः परिततनिजतेजोऽपास्तसन्तापबीजः । * *

अत्र मालिनीनामकं वृत्तम् । "ननमययुतेयं मालिनी भोगिलोकैः" इति हि तल्लक्षणम् ।

"सर्वत्र भिन्नसर्गान्तैरुपेतं लो(करञ्जितं) ।
(काव्यं)कल्पान्तरस्थायि" इत्यालङ्कारिकसमयम् ।
अनेन वृत्तिविशेषरचनेन कविरन्वग्रहादिति सर्वं मङ्गलम् ॥ ७४ ॥

श्रद्धा(राद्धगुरुदिनाखिल)कलासाम्राज्यरज्यद्धियां
शब्दालङ्कृतिकोशराशिरसवद्ग्रन्थानुसन्धायिनाम् ।
नाना(तन्त्रसुबोधनाश्रितयशोभाजां बुधानां मुदे)
(व्याख्याता सुमतीन्द्रयोगिमणिना)त्रैविक्रमीयं कृतिः ॥

उदाहरणवर्षिणीमुचितभावनिष्कर्षिणी-
मशेषरसपोषिणीमखिलसूरिसन्तोषिणीम् ।

त्रिविक्रमसरस्वतीं पठ पठेति सञ्चोषिणी-
मुषाहरणदीपिकां हरिमुदेऽहमातन्व्यमूम् ॥
त्रिविक्रमपदन्यासो विश्रुता(बुधा)द्भुतमोदकृत् ।
तच्छुश्रूषा मम परं भूयात्तत्परितोषिणी ॥

Colophon :

इति श्रीमत्कविकुलतिलकश्रीमत्रिविक्रमपण्डितचार्यविरचितोषाहरणाख्य-
महाकाव्यव्याख्यायां रसिकरञ्जनीसमाख्यायां सूरीन्द्रतीर्थ-
पूज्यपादशिष्यसुमतीन्द्रयतिविरचितायां नवमस्सर्गः ॥

Subject: Uṣāharaṇakāvyaṭika named Rasikarañjanī 1-9 sargas.

Remarks:—The Ms. is in good condition, but some leaves at the end are injured.

Sumatīndrabhikṣu is the author of this commentary. The author was the pupil of one Venkaṭanārāyaṇa and another Sūrīndratīrtha. The commentary too is known as Uṣāharaṇadīpikā or Rasikarañjanī, and has been published in Mysore, and in Udipi. He appears to have been the court poet of Sāhajī Mahārāja (1684-1710 A. D.) whom he has extolled in his work called Sumatīndrajayaghoṣaṇā a Ms. of which is available in this Library.

॥ उषाहरणकाव्यटीका ॥

3746. UṢĀHARAṆAKĀVYAṬIKĀ.

Burnell's Catalogue No. 4796. Page 157. Left column.
Substance—Paper. Size—10×4 inches. Sheets—17.
Lines—12 to a Page. Script—Devanāgarī. No. of Gran-

thas—384. Author—Sumatīndrayati. Incomplete. 1st sarga only.

Beginning:

श्रीमान् त्रिविक्रमाचार्यपण्डिताचार्यवर्यः etc.

Same as No. 3746.

End:

सुवेषाः शोभनवेषाः अलंक्रियाजन्यास्शोभाः यासां ताः तथोक्ताः। योषा इव स्त्रिय इव। "स्त्री योषिद्वला योषा" इत्यमरः। सर्वतः सर्वेभ्यः। श्रियं सम्पदं। गृह्णते अपहरान्ति। "ग्रह उपादाने" इति धातुः। लिङात्मनेपदम्॥ ७२॥

मोहेति॥ मोहस्य मूर्छायाः। "मूर्छा तु कश्मलं मोहम्" इत्यमरः॥........

Colophon: Nil.

Subject: Ūṣāharaṇaṭīka—Rasikarañjanī. First sarga 1-72 ślokas only.

Remarks:—The Ms. is in good condition. The introductory ślokas are not given in this Ms.

॥ ऋतुसंहारः ॥

3747. ṚTUSAMHĀRAḤ.

Burnell's Catalogue No. 5028. Page 163. Left column. Substance—Paper. Size—$9\frac{1}{2} \times 3\frac{3}{4}$ inches. Sheets—6. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—Kālidāsa. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अथ षड्ऋतुवर्णनम् ॥

आदौ वसन्तवर्णनम् ।

उत्सृष्टुमम्बुजदृशामिव मानरत्न-
मादाय षट्पदतिलान् मधुवारिपूरान् ।
पुंस्कोकिलस्य कलकूजितकैतवेन
सङ्कल्पवाक्यमयमातनुते रसालः ॥ १ ॥

परिहरति हन्त हरिणी किंशुकविपिनं दवानलभ्रान्त्या ।
मन्दमतिर्विपरीतामनुरागिणि बुद्धिमावहति ॥ २ ॥

End:

जातं दम्पतिचेतसोर्विनिमयं विज्ञाय विज्ञा सती
व्रीडान्योन्यमसंस्तुतेतरजनस्पर्शाद्ध्रुवं बिभ्यती ।
निर्याताखलु तद्विमुक्तसकलस्त्रीपुंससङ्गस्ततो
वाक्यं हास्यकरं वदत्यविरतं मासे सहस्ये वशः ॥

Colophon:

इति षड्ऋतुवर्णनं समाप्तम् ॥

Subject: Ṛtuvarṇana.

Remarks:—The Ms. is in good condition. Several editions of this work are available, the two popular ones being that published by the Sri Vani Vilas Press, Srirangam and the other by the Nirṇayasāgara press, Bombay.

The work deals with the description of the various seasons.

॥ एकदिनप्रबन्धः ॥

3748. EKADINAPRABANDHAH.

Burnell's Catalogue No. 10279. Page 157. Left column. Substance—Palm leaf. Size—$13\frac{3}{8} \times 1\frac{1}{2}$ inches. Leaves—25. Lines—6 or 7 to a Page. Script—Telugu. No. of Granthas—600. Author—Ālūri Sūryanārayana yajvan. Complete.

Beginning:

स्फुरंतु मे गुरुरन्ध्रनखप्रभा
दलितसन्तमसे हृदयान्तरे ।
अधिकजा करकङ्कणकुण्डली
क्कणितशङ्कितशङ्करसंस्तुतः ॥

भवतु भूप सभेभविदुषां पुरो
विदधतः कृतिमेकदिने मम ।
कुशलदायिशिवे तव वीक्षणं
कुशलमुन्मिषितेन जगत्कृतौ ॥

कुरुकुलोद्भवराजयशःसुधा-
रसनिलुप्तमहीमयदर्पणे ।
सुरपुरप्रतिविम्बविलोलितं
विजयते पुरमिन्द्रपदाङ्कितम् ॥

निजमणिप्रतिसंभृतमम्बुधिः
वलयमस्य विलोकय रुणद्ध्यहो ।
विपुलखेदविषेण कृतारवः
प्रतिकलं कृतवीचिभुजोच्छ्रयः ॥ ४ ॥

End:

इत्युत्कण्ठा तरलवनिता लोचनेन्दीवराणा-
मिन्दुः क्रान्त्वा नगरमखिलं सोऽवरुह्य द्विपेन्द्रात् ।
पार्थः साकं हरिसहस्रुवा भद्रपीठे निषण्णः
श्रीकृष्णाद्यैः सपरिमुमुदे पूज्यमानो यथार्हम् ॥ ११४ ॥

श्रीयज्ञेश्वरयज्वनः सितकरादालूरिवंशाम्बुधे-
र्ज्ञानाम्बा सुषुवे यमध्वरिवरं श्रीसूर्यनारायणम् ।
तस्य श्रीमति लिंगयप्रभुसभामध्ये प्रतिज्ञाकृत-
श्रीमानेकदिनप्रबन्धसुकृतौ सर्गश्चतुर्थोऽजनि ॥ ११५ ॥

नाडीभिर्दिवसस्य नव्यमचिराद्व्याहतो हास्पदैः
शब्दार्थैः प्रभुसभ्यसंततकथावृत्तक्रमैर्यन्त्रितम् ।
यत्काव्यं निरमायि संप्रति मया तस्मिन्हठात्कारतः
प्राप्तं दोषमुपेक्ष्य केवलगुणग्राही बुधस्तुष्यतु ॥ ११६ ॥

स्वस्य गुणाविष्करण-
प्रयोजनानेत्सगौरवादपि वा ।
त्रिंशत्घटिकनिबन्धन-
साहसतो वा [सर्वा] मुदेऽस्तु मे काव्यम् ॥ ११७ ॥

Colophon:

इति श्रीमहोपाध्याय श्रीमदालूरि यज्ञेश्वरमहाग्निचित्पुत्रेण ज्ञानाम्बागर्भशुक्तिमुक्तामणिना श्रीसूर्यनारायणवाजपेय-याजिना कृतायामेकादिनप्रबन्धकृतौ चतुर्थः सर्गः ॥

Subject: Ekadinaprabandha. 1-4 sargas.

Remarks:—The Ms. is in a good condition.

The author of the work is one Sūryanārāyaṇa of Ālūri family.

He evidently belonged to the Telugu districts—the title Alūri suggests it—His father is one Yajñanārāyaṇa and his mother Jñānāmbhā. The name itself indicates that it was composed during the course of a single day.

॥ कथात्रयी सव्याख्या ॥

3749. KATHĀTRAYĪ SAVYĀKHYĀ.

Burnell's Catalogue No. 4765. Page 157. Left column. Substance—Paper. Size—9⅞ × 4⅛ inches. Sheets—143. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—2148. Author—Cidambarakavi. Complete.

Beginning:

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।

सारम्भा विबुधास्सुधारसधरं रामायणं भारतं
सारं भागवतं च किञ्च सरसा यद्येकदा वीक्षितुम् ।
प्रज्ञातुश्च पदप्रपञ्चविभवं सर्वं तु कुर्वन्तु ते
प्रज्ञातुङ्गहृदश्चिदम्बरकवेः सत्काव्यरत्नं हृदि ॥

श्रीरामपाण्डुसुतकृष्णकथासुधांशोः
धारावगाहमहधारितवासनानाम् ।
वाचां चिदम्बरकवेर्वशितासवाचां
मोचापयोरसमुचां जगदेव मूल्यम् ॥ २ ॥

प्राचारदः शरविपाण्डवकृष्णवार्ता
वाचालकौशलजुषां वसुधासुधानाम् ।
वाचां चिदम्बरकवेः पुरतोऽपि वास्तु
का चातुरी गुडपयः कदळीरसानाम् ॥ ३ ॥

पद्यानि वाचि कतिचित्पठितानि कृत्वा
विद्यानिधित्वमभिलष्यति यो विवेकी ।
कुण्ठेतरोरुकुतुकः कुशलो विचित्रं
कण्ठे करोतु स चिदम्बरकाव्यरत्नम् ॥ ४ ॥

मञ्जूद्यन्मधुरोहवैभवमिळत्सौरभ्यपूरस्फुर-
द्वृत्तोदारसुवर्णसारसहिता रम्या सरस्वत्यसौ ।
सम्भावाना(भाव्या)जयतूऽमहारसनया सान्द्रप्रसादोल्लस-
द्वैशद्या विबुधोत्तमेन कलया केनाप्यलङ्कारिणा ॥ ५ ॥

वाचं स वः पुष्यतु तुष्यदात्मा
प्रकाशितानेकपदार्थहृद्या ।
गौरीडिता यस्य गुणैर्विधत्ते
मनोरमा मञ्जुरसैः प्रहर्षम् ॥ ६ ॥

भूमार्णवो वः प्रतनोतु पूर्णान्
कामान्स रामः कमनीयधामा ।
स्वालोकलूनद्युतिकार्तवीर्य-
प्रलम्बदोर्दण्डदशाननो यः ॥ ७ ॥

काव्यमव्याजतश्श्राव्यं कथात्रयवदावदम् ।
चिदम्बरीयं चित्रार्थमिदं व्याकुर्महे वयम् ॥ ८ ॥

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम् ॥ ९ ॥

तथा बुधोक्तरीत्यैव यथा बुद्धिबलोदयम् ।
आख्यायते नन्त्रसाभिव्याख्यासौ विदुषां मुदे ॥ १० ॥

अमरस्यापि विश्वस्य यादवस्य यशस्विनः ।
भास्करस्यापि हृद्यस्य वात्स्येन्दोर्वामनस्य च ॥ ११ ॥

पश्च प्रपञ्चप्रथिताः सूक्तयोऽतिसुगन्धयः ।
प्रत्नानीमानि रत्नानि यत्नादेव पदे पदे ॥ १२ ॥

स्वालोकेनैव बालानां मतिमान्द्यतमोभिदि ।
अर्थप्रदीपिकाख्यायां व्याख्यायां व्यक्तशक्तयः ॥ १३ ॥

सम्मत्यै सकलार्थानामत्यसाधारणाख्यया ।
पद्ये पद्ये विलिख्यन्ते पण्डितानां निघण्टवः ॥ १४ ॥

अलसानामिहालोकेप्यानुकूल्यव्यपेक्षया ।
तत्तदाख्या न लिख्यन्ते व्याख्याविस्तरभीतितः ॥ १५ ॥

अनर्घवृत्तमत्यर्थमत्र सद्गुणभास्वरम् ।
उत्तेजितमुदग्रेऽस्मद्व्याख्यानं निकषोपले ॥ १६ ॥

धार्यं हृदि जनैर्धन्यैरोजसा सुमहोज्ज्वलम् ।
अलङ्कारविशेषार्थं कलङ्काभावसुन्दरम् ॥ १७ ॥

इदं परं समुद्भूतं चिदम्बरहृदम्बुधेः ।
काव्यरत्नं कलाभिज्ञैः प्राज्ञैरेव परीक्ष्यताम् ॥ १८ ॥

काव्यमारभमाणः कविरादौ "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इति वचनादाशीर्वचनमाचरति—वाचमिति ॥

वाचं वो रचयतु सर्वदान्तरङ्गे
गाङ्गेयः सरसनयोदयां दधानः ।

सत्याप्तो बुधकुलमौलिबन्धुरोज-
श्रीरामस्तुतगुरुमाननाब्जहंसः ॥ १ ॥

उदयां उद्भूतशुभविधिम् । गां वाणीम् । रसनया जिह्वया दधानः । गेयः स्तुत्यः । सत्याप्तः सत्यलोकाप्तः । बुधकुलमौलिषु विद्वद्गणावतंसेषु देवकुलश्रेष्ठेषु च । बन्धुरः मनोहरः । श्रिया रामश्चारुः स्तुतौ गुरुमाननौ गुरुसत्कारौ अब्जहंसौ यस्य सः । अजः ब्रह्मा । वः युष्माकम् । अन्तरङ्गे हृदि । सर्वदा वाचं रचयतु वासयतामित्यर्थः ॥

* * *

इष्टदेवतानमस्कारपूर्वकं चिकीर्षितं प्रबन्धमर्थाभिधा-नात्प्रागल्भ्यकथनादेवासाधारणं वदन् प्रतिजानीते ॥ विधायेति ॥

विधाय कमलेक्षणं विशदसारसारस्वत-
प्रवाहवरभूषणं हृदि सुभासि वागीश्वरम् ।
करोति परमा लसत्सुरसभासुरार्थं जय-
त्कथात्रयि चिदम्बरः प्रतनु काव्यरत्नं बुधः ॥ २ ॥

* * *

प्रतिपाद्याः कथा विवृण्वन्नुदारतत्सारस्वारस्येन स्वप्र-बन्धस्य विद्वज्जनादरणीयत्वं प्रार्थयते ॥ अस्त्विति ॥

अस्तु रसेन सदाशयतुष्ट्यै
नीस्तुलसारमिदं निभृतेन ।

लाघवकारि सुधालहरीणां
राघवपाण्डवयादववृत्तम् ॥ ३ ॥

* * *

विदुषां प्रवृत्तिरुच्यर्थं सुव्युत्पत्तिनिमित्तं ललितसाधन-
मिलितत्वमभिदधानः संक्षिप्ततामेव कृतेः प्रकृतेरणेन
विवृणोति ॥ पञ्चाशदिति ॥

पञ्चाशच्च शतञ्च पद्यमणयः पञ्चापि किञ्चातुलाः
पुण्या राघवपार्थकृष्णविषया वर्ण्याः प्रसिद्धाः कथाः ।
चित्रे वर्णनया चिदम्बरकवेर्यत्काव्यरत्ने कृता
वक्त्रे ह्यक्षरसाशयैः सरलता कुत्रेति चिन्त्या बुधैः ॥ ४ ॥

* * *

अथ कथाः प्रस्तौति ॥ अस्तीति ॥

अस्ति प्रस्तुतहृद्यदुर्गचितता हस्ति श्रिता भारतैः
पूर्णार्थे पथि मानवै रुचिभृतैः पूर्वाह्निनीशेक्ष्यया ।
प्राकारैस्सरितोज्वला परिघया भास्वज्जयोल्लासिभिः
भूभृद्भिर्मधुरेह मानस भुवा तुल्यैरयोध्या परैः ॥ ५ ॥

End:

सा द्वारकान्तरलराजगृहा वहन्ती
लक्ष्मीमभात् क्षितिजयालसितामयोध्या ।
नाथेन हस्तिनगरीतिभिरञ्चितश्री-
र्मुक्तामणिप्रचुरभूर्मुदितेन तेन ॥

द्वारैः कान्तरसं कान्तभूमिराजगृहं यस्यां सा तथोक्ता। क्षितिजया भूसुतया सीतया लसितां लक्ष्मीं वहन्ती। हस्तिनामेव नगानां पर्वतानां रीतिभिः पङ्क्तिभिः अश्चितश्रीः। मुक्तामणिभिः प्रचुरभूः। सा अयोध्या नगरी मुदितेन तेन नाथेन रामेण अभात्॥

* * *

श्रीरामो रमजातशत्रुरमृतश्रीसारसारस्वत-
क्षीराम्भोघसरङ्गरस्फुटनटत्क्षेमोरुधामाकृतौ।
आरामो गुणशाखिनामतितरामासक्षमाभूदयं-
स्तारामोदघनं ननन्द भुवनं तन्वञ्जयं मङ्गलम्॥

* * *

माता वेदपुरीश्वराद्बुधमणेः श्रीवेङ्कटाख्योन्नता-
ज्जाता यस्य जगत्प्रसिद्धयशसो यः श्रीनिवासानुजः।
प्रत्ने पुंसि मतिं न्यधत्त परमे यः काव्यरत्ने कृतौ
शस्यस्तस्य सतश्चिदम्बरस्य सुमतेस्सर्गस्तृतीयोऽजनि॥

श्रीवेङ्कटाख्या यस्य कवेः माता, बुधमणेः जगत्प्रसिद्धयशसः उन्नताद्वेदपुरीश्वराज्जाता। यः श्रीनिवासानुजः, यः प्रत्ने पुराणे परमे पुंसि हरौ मतिं न्यधत्त निहितवान्, भक्तिं कृतवानित्यर्थः। सुमतेः तस्य चिदम्बरकवेः कृतौ काव्यरत्ने शस्यः प्रशंसार्हः तृतीयः सर्गः अजनि॥

उक्तमर्थमुपसंहरति—

एवं कौशिकयज्वराजकमणिश्श्रीसूर्यनारायणः
क्षीराम्भोधिविधोरनन्तपादिनो नारायणस्यादितः ।
चित्तं पूर्णमिदं चिदम्बरकवेः पुत्रस्य रामायण-
श्रीमद्भारतसारभागवतकं सत्काव्यरत्नं कृतिः ॥

एवमुक्तप्रकारेण कौशिकः यज्वराजमणिः श्रीसूर्य-
नारायण एव क्षीराम्भोधिस्तस्य विधोः इन्दोरादितः आ-
दौ । सार्वविभक्तिकस्तसिल् । अनन्तपदिनो नारायणस्य
अनन्तनारायणस्येत्यर्थः । पुत्रस्य चिदम्बरकवेः कृतिः
प्रबन्धः रामायणश्रीमद्भारतसारभागवतकं समाप्तम् ॥

श्रीसीतारामार्पणमस्तु ॥ श्रीगुरुभ्यो नमः ॥

End of the 1st सर्ग: (sheet No. 67)

यत्नेनेरितकृष्णचम्बुफाणिति(?) यः काव्यरत्ने कृतौ
धार्ये तस्य चिदम्बरस्य सुमतेस्सूर्यैरसोऽम्भोरुहाम् ।
आद्यस्वाद्यरसोऽगमत्सकलतामुद्दामरामायण-
श्रीमद्भारतसारकृष्णचरिते सर्गो निसर्गोज्ज्वलः ॥

स्पष्टोऽर्थः ॥

End of the 2nd सर्ग: (sheet No. 105)

यज्वा कौशिकभूषणं समभवद्यस्सूर्यनारायणः
पुत्रस्तस्य समः पुरन्दरगुरोर्योऽनन्तनारायणः ।
सूनोस्तस्य चिदम्बरस्य सुमतेश्श्रीकाव्यरत्न कृतौ
सर्गो राघवपार्थकृष्णचरिते साधुर्द्वितीयोऽजनि ॥

Colophon: (Sheet No. 67 and 105)

इति पदवाक्यप्रमाणपारावारपारीणकौशिकगोत्रविशेषक श्रीमदनन्तनारायणसुधीवसमीरितायां रामायणभागवतसारस्यकाव्यरत्नस्य व्याख्यायामर्थप्रदीपिकाख्यायां प्रथमस्सर्गः ॥

Subject: Kathātrayī, with the commentary of Anantanārāyaṇa 1-3 sārgas.

Remarks:—The Ms. is in good condition.

At the end we find:—

इदं कथात्रयीव्याख्यानं रामाभट्टेन लिखितम् ॥

The Kathātrayī is a Śleṣakāvya, dealing with the stories of Rāma, Kṛṣṇa and the Pāṇḍavas, similar to the Yādavarāghavapāṇḍavīya. Each stanza is capable of a threefold interpretation, applicable to Rāma, Kṛṣṇa and the Pāṇḍavas respectively.

The author of this work is called Cidambarakavi of Kauśikagotrā. His genealogy is given as follows:—

Sūryanārāyaṇa
|
Anantanārāyaṇa
|
Cidambarakavi.

The commentary Arthapradīpikā is presumably by the son of Cidambarakavi—Anantanārāyaṇa.

The Ms. under notice was copied by Rāmābhaṭṭa. This work has not been printed so far.

॥ कथात्रयी ॥

3750. KATHĀTRAYĪ.

Burnell's Catalogue No. 10813. Page 157. Left column.

Substance—Palm leaf. Size—18½ × 1¾ inches. Leaves—62. Lines—6 to a Page. Script—Telugu. No. of Granthas—2148. Author—Cidambarakavi. Complete.

Beginning, end, colophon and subject—Same as No. 3749.

Remarks:—The Ms. is in fairly good condition.

॥ कथात्रयी ॥

3751. KATHĀTRAYĪ.

Burnell's Catalogue No. 10314. Page 157. Left column.

Substance—Palm leaf. Size—15⅛ × 1¼ inches. Leaves—96. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—2000. Author—Cidambarakaviḥ. Incomplete.

Beginning—Same as No. 3749.

End:

उरुमानवमानवर्धनौजा

मरुदुल्लासिविराजिमानयानः ।

विजयो विभुराजिके विरेजे

भुजनिर्मूलवलामरारिभूपः ॥

* * *

अपरत्र ॥ उरु मायायाः लक्ष्म्याः नवमानवर्धनमोजो यस्य सः तथोक्तः । मरुद्वत् वायुवत् उल्लासिता । विना गरुडेन राजमानं यानं यस्य सः तथोक्तः, गरुडध्वज इत्यर्थः । विभुः कृष्णः । आजिके विरेजे । अन्यत्समम् ॥ अर्थान्तरे ॥ उमायाः पार्वत्याः नवमानवर्धनं ओजः तेजो यस्य सः तथोक्तः । मरुत्सु देवेषु उल्लासी ब्रह्मा

सुरज्येष्ठत्वाचस्य.... ॥

Colophon: (Leaf No. 50 and 80) Same as No. 3749.

Subject—Same as No. 3749.

Remarks:—The Ms. is very old and injured. This Ms. abruptly breaks off in the middle of the 3rd sarga.

॥ कथात्रयीव्याख्या ॥

3752. KATHĀTRAYĪVYĀKHYĀ.

Burnell's Catalogue No. 10321. Page 157. Left column. Substance—Palm leaf. Size—18½×1⅓ inches. Leaves—65. Lines—8 to a Page. Script—Grantha. No. of Granthas—1800. Author—Anantanārāyaṇa. Complete. Wants beginning only.

Beginning:

.. ..

पदच्छेदः पदार्थोक्तिविग्रहो वाक्ययोजना ।
आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम् ॥ १ ॥

Same as No. 3749.

End:

श्रीराम इति ॥ गुणानां जन्मभूम्यां ऊर्जिताभ्यां सुधाश्रीभ्यां अमृतलक्ष्मीभ्यां सारायां सारस्वत्यां सरस्वतुस्समु....संब(न्धि)न्यां स्फारायां स्फीतायां अमोघायां लहर्यां ओघे अतिस्फुटमतिव्यक्तं महद्धाम प्रभावो यस्य स तथोक्तः । अभिरामाकृतिः मनोहराकारः । आगमा एव अगमा इति रूपकम् । निखिलानामागमागमानामागमवृक्षाणां ततेर्वाटिकायाः आरामः उपवनभूतः । आपन्नानामाश्रितानां कल्पद्रुमः पारिजातः । धन्यः सः श्रीरामः श्रीमान् राम-

....त्यादिवत्समासः । तारेण आमोदेन सन्तोषेण घनं सान्द्रं भुवनं लोकं शुभं तन्वन्सन्ननन्द (मुमुदे) ॥

अन्यत्र ॥ श्रिया लक्ष्म्या रामः मनोज्ञः गुणानां ज...

....................संपत् ....

तस्य साहित्यस्य स्फारया अमोघया अप्रतिहार्यया लहर्या

....

सारायां सारस्वत्यां सरसायाः....संबन्धिन्यां स्फारायां अमोघायां लहर्यां अति स्फुटं महत्....स्थानं यस्य स तथोक्तः । अभिरामा...लागमागमतते रामः । आपन्नकल्पद्रुमः आप्तपारिजातः । धन्यः स कृष्णः । तारामोदघनं भुवनं शुभं तन्वन् सन्ननन्द । "सम्पत्तिश्श्रीश्च लक्ष्मीश्च रामो नीले...कर्ता पुण्यवान्धन्यः पलाशीद्रुद्रुमागमाः" इत्यमरः । अत्र सारसारगमागमेति द्वयोर्व्यञ्जनयुग्मयोरसकृदावृत्त्या छेकानुप्रासः ॥

अन्यत्र वृत्त्यनुप्रासः इत्यन...कारयोरर्थालङ्काराभ्यां श्लेषरूपकाभ्यां संसृष्टिः । ओजः प्रसादश्लेषसौकुमार्यादयो गुणास्तु स्पष्टाः ॥

Colophon:

इति पदवाक्यप्रमाणपारावारपारीण कौशिकगोत्रविशेषेकानन्तनारायणसुमतिविरचितायां रामायणभारतभागवतसारस्य काव्यरत्नस्य व्याख्यायां अर्थप्रदीपिकायां तृतीयस्सर्गः ॥ काव्यरत्नस्य व्याख्या समाप्ता ॥

पद्यानि वाचि कतिचित्+कण्ठे करोतु स चिदम्बरकाव्यरत्नम् ॥

कल्याणवाचां विदुषां कण्ठाभरणमुज्ज्वलम् ।

कविश्चिदम्बराश्चित्रं ....॥

Subject: Kathātrayīvyākhyā 1-3 sargas.

Remarks:—The Ms. is very old and much injured. This Ms. abruptly begins in 9th śloka of the beginning.

॥ कविकर्पटिका ॥

3753. KAVIKARPAṬIKĀ.

Burnell's Catalogue No. 4783. Page 157. Left column. Substance—Paper. Size—7 × 3⅜ inches. Sheets—17. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—244. Author—Vādīndrakavi. Complete.

Beginning:

श्रीगणेशाय नमः ।

श्रीभवानीशङ्कराभ्यां नमः ॥

यः कातन्त्रसुधानिधानकलशस्साहित्यरत्नालयः
सानन्दस्फुटगद्यपद्यरचनाप्रागल्भ्यसन्दोदयः ।
षट्काव्यामृतपूरपूर्णवदनस्सद्वृन्दचन्द्रोदय-
स्तस्येयं कविकर्पटीकरचना कण्ठे प्रतिस्थाप्यताम् ॥ १ ॥

यत्नादिमां कण्ठगतां विधाय
श्रुतोपदेशाद्विदितोपदेशः ।
अज्ञातशब्दार्थविनिश्चयोऽपि
श्लोकं करोत्येव समासु शीघ्रम् ॥ २ ॥

आदौ तावदनुष्टुप्छन्दसा चन्द्रवर्णनमारभ्यते ।
तत्र तावत्प्रथमपादे, पश्चाधरे कर्पूरपूर–डिण्डीरपिण्ड–
रजनीकर–शंबूककण्ठ–गङ्गाप्रवाह–मृणालवाल–शङ्खसञ्चय

—मल्लिकाचय—कैरवव्रात—चन्दनद्रव—नीहारहार— ॐ
ॐ पुनस्तत्रैवपादे त्र्यक्षरे, नीकाशं, संकाशं, सम्प्रेक्ष्यं, संस्पर्द्धि:, तुल्यभा, विध्वंसि ॥

End:

अथ शार्दूलविक्रीडितच्छन्दसा प्रथमचरणे प्रज्ञानां निजभूपिरेष नियतम् । विख्यातो गुणशालिनां, पुनः । गुणमयो । पुनः । कर्मप्रधानोन्नतिः । सरक्तचित्तो येन । द्वितीयपादे । चन्द्राकारगुणप्रकाशसुभगः । दुर्वारारिविध-ट्टनपटुः । यः काव्ये जनितो महाकविजनैः । लोकानामुप-कारकः प्रति दिनं । पुनः । प्रज्ञावतामग्रणीः । दानेन कर्णोपमः । नित्यं गुणैः संयुतः । प्राणैरयं सुस्वरः । तृतीये ॥ स्फूर्यत्कन्दसमूहनिर्मलयशाः । कीर्त्यालम्बित-सप्तवारिधिपथाः । प्रज्ञाधिगुरुसन्निभो गुणवती । पुनः । विद्याविनोदी स्वयम् । पुण्यात्मनामग्रणीः । चतुर्थपादे तर्को-दर्कविशुद्धचरितः । श्रेयान्सर्वजनेनिलमतिः । शक्त्या निर्जितसारशत्रुनिवहः । पुनः । वागीश्वरोयं नृपः । श्रीभी-मदेवो नृपः । वागीश्वरो(री) पातु वः । भीमोयमालोकय-ताम् । विद्वानयं राजते । श्रीदेशिको राजते ॥

Colophon:

इति श्रीवादीन्द्रकविविरचिता कविकर्पटीकरचना समाप्ता ॥
श्रीकृष्णार्पणमस्तु ॥

Subject: Kavikarpaṭikā.

Remarks;—The Ms. is in good condition.

The name of the author is given in this Ms. as Vādīndra

and in the next Ms. No. 3754 it is given as Vāgindra. The work brings together a number of words which can easily fit in into verse composition. These phrases will be a valuble aid to any one who wishes to indulge in versification.

॥ कविकर्पटिका ॥

3754. KAVIKARPAṬIKĀ.

Burnell's Catalogue No. 4782. Page 157. Left column.

Substance—Paper. Size—$8\frac{1}{4} \times 4\frac{1}{8}$ inches. Sheets—21. Lines—9 to a Page. Script—Telugu. No. of Granthas—244. Author—Vāgindrakavi. Complete.

Beginning, end and subject—Same as No. 3753.

Colophon:

इति श्रीवागिन्द्रकविविरचिता
कविकर्पटिकरचना समाप्ता ॥

Remarks :—The Ms. is old and is in fairly good condition.

॥ कविकर्पटिका ॥

3755. KAVIKARPAṬIKĀ.

Burnell's Catalogue No. 5009. Page 157. Left column.

Substance—Paper. Size—$9\frac{1}{8} \times 5\frac{1}{4}$ inches. Sheets—14. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—244. Author—Vādīndrakavi. Complete.

Beginning, end, colophon and subject—Same as No. 3753.

Remarks :—The Ms. is in good condition.

संसारचक्र + नृहरे नृलोकम् ॥

॥ कविकर्पटिका ॥

3756. KAVIKARPAṬIKĀ.

Burnell's Catalogue No. 5010. Page 157. Left column. Substance—Paper. Size—$12\frac{1}{4} \times 4\frac{3}{4}$ inches. Sheets—7. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—244. Author—Vādīndrakavi.

Beginning and subject—Same as No. 3753.

End:

पुनः ॥ वागीश्वरोयं नृपः । श्रीभीमदेवो नृपः । जीयादयं भूपतिः । भीमोऽयमालोक्यताम् । विज्ञानपारायणः । विद्वानयं राजतः (ते) ॥

Colophon:

इति श्रीकविराज........शं......धरविरचिते कविकर्पटी समाप्ता ॥

शुभमस्तु ॥

Remarks:—The Ms. is in good condition.

The following is given in the title page.

"हें पुस्तक श्रीमन्तराज श्रीशरभोजीमहाराजसाहेबयांच्या कारकर्दीत काशीदेशाहून खरीदी करून आणिलें असें ॥"

This Ms. belonged to king Serfoji, having been brought down from Benares, while he had gone there on pilgrimage.

॥ गङ्गावतरणम् ॥

3757. GAṄGĀVATARAṆAM.

Burnell's Catalogue No. 10258. Page 157. Right column. Substance—Palm leaf. Size—$20\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—40.

Lines—5 to a Page. Script—Grantha. No. of Granthas—800. Author—Nilakanṭhadīkṣita. Complete.

Beginning:

अद्भुतं किमपि द्वन्द्वमस्तु तन्मम शर्मणे ।
स्वस्तिकृत्तनुते यस्य सुदृढाश्लेषनिर्वृतिम् ॥ १ ॥

व्यासमेव स्तुमो यस्य वाचं गुणयितुं विधिः ।
विषीदति वृषाङ्केण विलूने पञ्चमानने ॥ २ ॥

कान्तस्सहृदयो वाचः कविरेव चिरन्तनः ।
जडे जगति येनैव च्छन्दः प्रागन्वरुध्यत ॥ ३ ॥

कवितामफलद्वीटी काळिदासमुखेऽर्पिता ।
पत्युर्मुखेतु सा गौर्याः परुषाशिगमाक्षरम् ॥ ४ ॥

End:

अस्पृष्टाः कलयामि दुष्कविकुलैरज्ञैरनाकर्णिता
ज्ञानाज्ञानवतां कदाप्यपतिता दूरे दुरूहाध्वनि ।
खेलन्तु श्रुतिसम्पुटीचुलुकिता स्वैरं रसज्ञैर्जनैः
प्रत्युक्तिच्यवमाननूतनसुधासाराः कवीनां गिरः ॥ ९४ ॥

Colophon:

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्वाहकमहाव्रतयाजि श्रीमदप्पयदीक्षितसोदर्यश्रीमदाचादीक्षितपौत्रेण नारायणदीक्षितात्मजेन श्रीनीलकण्ठदीक्षितेन विरचिते गङ्गावतरणे भगीरथनगरप्रवेशो नामाष्टमः सर्गः ॥

काव्यञ्च समाप्तम् ॥

Subject: Gaṅgāvataraṇam 1-8 sargas.

Remarks:—The Ms. is in good condition.

The following ślokas are given after the colophon:

गङ्गावतरणं रम्यं काव्यराज्याभिषेचनम् ।
विनायकसुधीप्रीत्यै लिखितं ह्यप्पधीमता ॥

हालास्येशितुरीशितुर्यदि सखे लीलासु शुश्रूषसे
तत्पद्यागमगुप्तमस्य यदि वा तत्वं विजिज्ञाससे ।
पारं वाथ दिदृक्षसे यदि परं काव्यागमस्रोतसां
तत्कण्ठे कुरु नीलकण्ठमखिनो वाचं शिवैकाश्रयाम् ॥

Several editions of this work are available, the more important being those of the Nirṇayasāgar Press, Bombay and the Śrī Vāṇi Vilās Press, Srirangam. This Ms. was copied by Appadhīmān to please one Vināyakasudhī.

॥ घटकर्परकाव्यम् ॥

3758. GHAṬAKARPARAKĀVYAM.

Burnell's Catalogue No. 4778. Page 158. Right column.

Substance—Paper. Size—$9\frac{5}{8} \times 3\frac{3}{4}$ inches. Sheets—2. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—37. Author—Kālidāsa. Complete. text only.

Beginning:

श्रीगजाननाय नमः ॥

निचितं स्वमुपेत्य नीरदैः
प्रियहीना हृदयावनीरदैः ।

सलिलैर्निहितं रजः क्षितौ
रविचन्द्रावपि नोपलक्षितौ ॥ १ ॥

हंसा नदन्मेघभयाद्द्रवन्ति
निशामुखान्यद्य न चन्द्रवन्ति ।
नवाम्बुमत्ताश्शिखिनो नदन्ति
मेघागमे कुन्दसमानदन्ति ॥ २ ॥

मेघावृतं निशि न भाति नभो वितारं
निद्राभ्युपैति च हरिं सुखसेवितारम् ।
सेन्द्रायुधश्च जलदोऽथ(द्य)रसन्निभानां
संरम्भमावहति भूधरसन्निभानाम् ॥ ३ ॥

End:

तासामृतुस्सफल एव हि या दिनेषु
सेन्द्रायुधाम्बुधरगर्जितदुर्दिनेषु ।
रत्युत्सवं प्रियतमैस्सह मानयन्ति
मेघागमे प्रियसखीश्च समानयन्ति ॥ २० ॥

(एतान्निशम्य विरहानलपीडिताया-
स्तस्या वचः खलु दयालुरपीडितायाः ।
साध्वीभिरेवमुदितैर्जलदैरमोघैः
प्रत्याययौ सदनमूनदिनैरमोघैः ॥ २१ ॥)

भावानुरक्तवनितासुरतैश्शपेय-
मालम्ब्य चाम्बु तृषितः करकोशपेयम् ।
जीयेय येन कविना यमकैः परेण
तस्मै वहेयमुदकं घटकर्परेण ॥ २२ ॥

Colophon:

इति श्रीकालिदासकृतौ घटकर्परकाव्यमूलं समाप्तम् ॥

Subject: Ghaṭakarparakāvyam. Text only.

Remarks—The Ms. is in good condition.

This is one of the many works attributed to Kālidāsa. Ghaṭakarpara is supposed to have been one of his contemporaries. The work is available in print in the Nirṇaya Sāgar Press. Bombay.

In this manuscript verse No. 21 is missing but is found in almost all other Mss. So that verse has been inserted here within brackets.

॥ घटकर्परकाव्यम् ॥

3759. GHAṬAKARPARAKĀVYAM.

J. L. Collection No. 535. Substance- Paper. Size—7½×4 inches. Sheets —8. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—37. Author—Kālidāsa. Complete.

Beginning, end and subject—Same as No. 3758.

Colophon:

इति श्रीकालिदासविरचितं घटकर्परकाव्यं समाप्तम् ।

श्रीसाम्बसदाशिवार्पणमस्तु ॥

इदं पुस्तकं रामचन्द्रशास्त्रिणा लिखितम् ॥

Remarks:—The Ms. is in good condition. This Ms. contains only the text.

॥ घटकर्परकाव्यम् सव्याख्यम् ॥

3760. GHAṬAKARPARAKĀVYAM.

Burnell's Catalogue No. 4779. Page 158. Right column. Substance—Paper. Size—14 × 5⅜ inches. Sheets—10. Lines—5 to 9 to a Page. Script—Devanāgarī. No. of Granthas—147. Author—Kālidāsa. Complete with the commentary.

Beginning:

श्रीगणेशाय नमः ॥

निचितं खमुपेत्य नीरदैः
प्रियहीनाहृदयावनीरदैः ।
सलिलैर्निहितं रजः क्षितौ
रविचन्द्रावपि नोपलक्षितौ ॥

प्रोषितप्रमदयेदमुच्यत इति षष्ठश्लोकेनान्वयः । प्रोषितप्रमदया विदेशगतभर्तृकया सख्या अग्रतः इदं निचितमित्यादि वक्ष्यमाणश्चोच्यते । हे सखि ! कीदृशी कुन्दसमानदन्ति । कुन्दपुष्पवत् समानाः दन्ताः यस्यास्सा तस्याः सम्बोधनम् । निचितं व्याप्तं आच्छन्नमाकाशम् । कैः ? नीरदैः । किम्भूतैः नीरदैः ? प्रियहीना हृदयावनीरदैः । प्रियेण वल्लभेन हीना रहिता तस्या हृदयं चित्तं तदेवावनी भूमिस्तां रदन्ति विदारयन्ति । तासां मनोदाहकैरित्यर्थः । किं कृत्वा ? खमाकाशमुपेत्यागत्य तथा सलिलैर्निहितं स्थापितम् । किन्तत् रजो धूलिः । कस्यां ? क्षितौ ।

तथा रविचन्द्रावपि सूर्यशशाङ्कौ मेघैराच्छादितत्वान्नोप-
लक्षितौ न दृष्टौ ॥ १ ॥

End:

भावानुरक्तवनितासुरतैश्शपेय-
मालभ्य चाम्बु तृषितः करकोशपेयम् ।
जीयेय येन कविना यमकैः परेण
तस्मै वहेयमुदकं घटकर्परेण ॥ २२ ॥

येन परेण कविनाहं यमकैः जीयेय तस्मै घटकर्परेणाह-
मुदकं वहेयं तस्य किङ्करो भवेयमित्यर्थः । यत्स(त्सो)हं
जीयेय तदा मयैवाहं जीयेय । एतत्प्रतिज्ञादृढीकरणार्थं
शपथद्वयं प्राह कविः । भावानुरक्तवनितासुरतैः
शपेयं भावेन स्वभावेन चित्तेन परमार्थेनानुरक्ता रागर-
क्ता सा चासौ वनिता तस्याः सुरतानि तैः तानि न प्राप्नुया-
मित्यर्थः । यदि प्रतिज्ञां न पालयति तृषितः पिपासितः
करकोशपेयं हस्तपुटपातव्यं अम्बु जलं वा लभ्यं प्राप्य
शपेयं शपथं करिष्यामि ॥ २२ ॥

Colophon:

इति श्रीकालिदासविरचितं घटकर्परकाव्यं सटीकं काव्यं
समाप्तम् ॥
श्रीशिवाय नमः ॥

Subject: Ghaṭakarparakāvyam, with commentary.

Remarks:—The Ms. is in excellent condition. The 20th stanza
("तासां ऋतुः + समानयन्ति ॥")

and the commentary of that is omitted in this Ms. also. The name of the commentary is not known.

॥ घटकर्परकाव्यम् ॥

3761. GHAṬAKARPARAKĀVYAM.

Burnell's Catalogue No. 4771. Page 158. Left column. Substance—Paper. Size—$10\frac{3}{8} \times 4\frac{1}{2}$ inches. Sheets—4. Lines—9 to 14 to a Page. Script—Devanāgarī. No. of Granthas—147. Author—Kālidāsa Complete with the commentary.

Beginning, end and subject—Same as No. 3760.

Colophon:

इति घटकर्परं समाप्तम् ॥

Remarks:—The Ms. is in good condition.

The 21st śloka

(एतन्निशम्य + अमोघैः ॥

is written in the commentary: and its commentary is omitted.

॥ घटकर्परकाव्यम् ॥

3762. GHAṬAKARPARAKĀVYAM.

Burnell's Catalogue No. 4772. Page 152. Left column. Substance—Paper. Size—$10\frac{1}{8} \times 4\frac{1}{2}$ inches. {Sheets—5. Lines—8 to 14 to a Page. Script—Devanāgarī. No. of Granthas—147. Author—Kālidāsa. Complete with the commentary.

Beginning, end, colophon and subject—Same as No. 3760.

Remarks:—The Ms. is in good condition.

The commentary only of the 21st śloka is omitted in this Ms.

॥ घटकर्परकाव्यम् ॥

3763. GHAṬAKARPARAKĀVYAM.

Burnell's Catalogue No. 4775. Page 158. Right column. Substance—Paper. Size—9¾ × 3⅞ inches. Sheets—8. Lines—5 to 10 to a Page. Script—Grantha. No. of Granthas—147. Author—Kālidāsa. Complete with the commentary.

Beginning, end, colophon and subject—Same as No. 3760.

Remarks:—The Ms. is in good condition.

॥ घटकर्परकाव्यम् ॥

3764. GHAṬAKARPARAKĀVYAM.

Burnell's Catalogue No. 4776. Page 158. Right column. Substance—Paper. Size—9¼ × 3⅞ inches. Sheets—7. Lines—8 or 9 to Page. Script—Devanāgarī. No. of Granthas—147. Author—Kālidāsa. Complete with the commentary.

Beginning, end, colophon and subject—Same as No. 3760.

Remarks:—The Ms. is in good condition. The following is written on the title page.

तुलजाराजस्येदं पुस्तकम्

॥ घटकर्परकाव्यम् ॥

3765. GHAṬAKARPARAKĀVYAM.

Burnell's Catalogue No. 4777. Page 158. Right column. Substance—Paper. Size—10×4 inches. Sheets—11. Lines—4 to 7 to a Page. Script—Devanāgarī. No. of Granthas—147. Author—Kālidāsa. Complete. with the commentary.

Beginning, end, colophon and subject—Same as No. 3760.

Remarks:—The Ms. is in fairly good condition.

" श्रीमन्नारायणात्मजेन यशोत्तंसेन लिखितम् ।"

This is given at the end.

This Ms. was copied by one Yaśottamsa, son of Nārāyaṇa.

॥ घटकर्परकाव्यम् ॥

3766. GHAṬAKARPARAKĀVYAM.

Burnell's Catalogue No. 12358. Page 158. Right column. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—12. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—147. Author—Kālidāsa. Complete.

Beginning, end, colophon and subject—Same as No. 3760.

Remarks:—The Ms. is in good condition.

॥ घटकर्परकाव्यम् ॥

3767. GHAṬAKARPARAKĀVYAM.

Burnell's Catalogue No. 4773. Page 158. Left column.

Substance—Paper. Size—$7\frac{1}{4} \times 3\frac{1}{2}$ inches. Sheets —11. Lines—7 to 8 to Page. Script—Devanāgarī. No. of Granthas—147. Author—Kālidāsa. Complete with the commentary.

Beginning:

निचितं खमुपेत्य नीरदैः
प्रियहीनाहृदयावनीरदैः ।
सलिलैर्निहितं रजः क्षितौ
रविचन्द्रावपि नोपलक्षितौ ॥ १ ॥

श्रीगणेशाय नमः ॥

प्रोषितप्रमदयेति षष्ठश्लोकेनान्वयः । अस्यार्थः । प्रोषितः गतः प्रमदः भर्ता । एवम्भूतया सखीं प्रति निचितमित्यादि वक्ष्यमाणप्रकारेणोच्यते । हे सखि कीदृशी कुन्दसमानदन्ति कुन्दः कुन्दपुष्पं तद्वत्समानाः दन्ताः यस्याः सा तस्याः सम्बोधनम्, हे कुन्दसमानदन्ति । निचितं व्याप्तम् । खमाकाशम् । कैः ? नीरदैः मेघैः । किं कृत्वा ? उपेत्य आगत्य । किंभूतैः ? प्रियेण वल्लभेन हीनायाः तस्याः हृदयमेवावनी पृथ्वी तां रदन्ति विदारयन्तीत्यर्थः । "रद विलेखने" इत्यस्य धातोः । तस्या मनोदारकैरित्यर्थः । तथा सलिलैर्निहितं स्थापितम् । किमित्याह रजः क्षितौ । तथा रविचन्द्रावपि नोपलक्षितौ न दृष्टौ । भिन्नाधिकमगत्वान्नपुंस(क)वद्भावः (?) । मेघाच्छिन्नत्वान्निदाघकालो वर्तते ॥ १ ॥

End:

भावेति ॥ कविः प्रतिज्ञां करोति । यमकं विना अहं यमकैः अनुप्रासैः जीयेय जयामेति निर्वाण(?) यः तस्मै तदर्थं घटकर्परेण कुम्भकपालेनोदकं वहेयं वहामि । स्नानपानार्थं मानयामीत्यर्थः । किं कुर्वन्सन् ? तृषितस्सन् । किं कृत्वा ? करकोशेन पेयं अम्बु जलं हस्तेनेत्यर्थः । आचम्य इत्वा । एतेन शुचिर्भूत्वा सत्यं शपथं करोमीत्यर्थः । अन्यथा क्रीडादौ नर्मयुक्तौ नवंचन(?) नास्तीत्यर्थः । इति घटख(क)र्परं समाप्तं करोमि । मे सर्वं सजं गोकर्णाक्षातिहनामिति दुरकं वं(?)भवति । किङ्करो भवेयमिति भावः । यद्युदकं न वहेयं अतः शपेयं शपथं करोमि । कैः ? भावेन रसेन । अनुरक्ता विलासिनी । तस्याः सुतातीनाशायामित्यर्थः । च इत्यपरम् । तासुरतैः शपेयं शपथं करोमि । मम प्रियायामा(याः)सुरतं पत्नीति भावः ॥

Colophon:

इति श्रीकाळिदासकृता घटख(क)र्परकाव्यटीका समाप्ता ॥

Subject: Same as No. 3760.

Remarks :—The Ms. is in good condition. Śloka No. 21. (एतन्निशम्य+अमोघैः ॥) and its commentary is omitted in this Ms.

॥ घटकर्परकाव्यम् ॥

3768. GHAṬAKARPARAKĀVYAM.

Burnell's Catalogue No. 4774. Page 158. Right column.

Substance—Paper. Size—$9\frac{1}{4} \times 3\frac{3}{4}$ inches. Sheets—11. Lines—4 to 9 to a Page. Script—Devanāgarī. No. of Granthas—147. Author—Kālidāsa. Complete with the commentary.

Beginning, end, colophon and subject—Same as No. 3767.

Remarks :—The Ms. is in good condition. This seems to have been the original of No. 3767.

॥ घटकर्परव्याख्यानम् ॥

3769. GHAṬAKARPARAVYĀKHYANAM.

J. L. Collection No. 536. Substance—Paper. Size—9×4 inches. Sheets—10. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Kālidāsa Complete.

Beginning, end and subject—Same as No. 3767.

Colophon :

इति कालिदासविरचितं घटकर्परकाव्यस्य व्याख्यानं समाप्तम् ॥

श्रीसदाशिवार्पणमस्तु ॥ श्रीशिवार्पणमस्तु ॥

इदं पुस्तकं नरहरिभटपरंडकरस्य सूनुकृष्णभटपरंडकरेण लिखितं स्वार्थं परार्थञ्च । सर्वजिन्नामसंवत्सरकार्तिकमास ❀ ❀

Remarks :—The Ms. is in good condition. The text is not given in this Ms.

॥ घटकर्परकाव्यम् ॥

3770. GHAṬAKARPARAKĀVYAM.

J. L. Collection No. 537. Substance—Paper. Size—9×4

inches. Sheets—8. Lines—6 to a Page. Script—Devanāgarī. No of Granthas—100. Author—Kālidāsa 1-14 Ślokas. (Incomplete).

Beginning—Same as No. 3767.

End:

मार्गेषु मेघसलिलेन विनाशितेषु
कामो धनुः स्पृशति तेन विनाशितेषु ।
गम्भीरमेघरसितव्यथिता कदाहं
जह्यां सखिप्रियवियोगजशोकदाहम् ॥ १४ ॥

॥ मार्गेष्विति ॥ हे सखि । यदाहं जह्यां त्यजेयम् । प्रियवियोगजशोकदाहम् । प्रियो वल्लभः तस्य वियोगो विरहः तस्मात् जातो यः शोकः तेन दाहो दुःखं तं विशिष्टाहं गम्भीरमेघरसितव्यथिता केषु सत्सु मार्गेषु सरणिषु पथिषु । कथम्भूतेषु विनाशितेषु विनाशितं प्रापितेषु । केन मेघसलिलेन मेघानां सलिलं तेन मेघसलिलेन । अन्यच्च । कामः कन्दर्पः धनुश्च संस्पृशति । कथं विना तेन वल्लभेन विना । किंविशिष्टं धनुः शितेषु । शिताः तीक्ष्णाः इषवो बाणा येषु तत् । एतेन किमुक्तम् भवति वर्षाकाले बलवान्काम इत्यर्थः ॥ १४ ॥

Subject: Ghaṭakarpara with commentary. 1-14 Ślokas only.

Remarks:—The Ms. is in good condition. This Ms. abruptly ends with the 14th Śloka with its commentary.

On the title page is found:—

वेङ्काजीनायकस्येदं पुस्तकम् ।

॥ घटकर्परकाव्यं सटीकम् ॥

3771. GHAṬAKARPARAKĀVYAM SAṬĪKAM.

J. L. Collection No. 538. Substance—Paper. Size—6×4 inches. Sheets—4. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—Kālidāsa. 1-11 ślokas only. (Incomplete)

Beginning:—Same as No. 3767.

End:

॥ किं कृपेति ॥ हे तोयदाः मेघाः तं पथिकं यूयमेवं ब्रूत तव कान्तया कृपापि नास्ति। किमतस्तव कान्तया दयितयापि नास्ति। अन्यत्किम्। किमपि नेत्यर्थः। अतः परं किम्। कुत्सितं भविष्यतीत्याह। कीदृशया पाण्डुगण्डपतितालकान्तया धूसरके...... ॥

Subject: Gaṭakarparakāvya with commentary 1-11 ślokas only.

Remarks:—The Ms. is in good condition. This Ms. abruptly ends with the 11th śloka's commentary.

॥ चित्रबन्धरामायणम् ॥

3772. CITRABANDHARĀMĀYAṆAM.

Burnell's Catalogue No. 5042. Page 158. Right column. Substance—Paper. Size—$10\frac{3}{8}\times4\frac{5}{8}$ inches. Sheets—32. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—620. Author—Veṅkaṭeśvara. Complete. 1-6 sargas.

Beginning:

श्रीगणेशाय नमः ॥

लक्ष्मीकटाक्षा मयि ते प्रसरन्तु समन्ततः ।
तेषां महिम्ना जगतामीश्वरोऽभूज्जनार्दनः ॥ १ ॥

शारदा शारदाकाशनीरदाकारशालिनी ।
श्रितस्य रसनारङ्गे लास्यलीलाः क्रियात्सदा ॥ २ ॥

शि(नि)रोष्ठ्यम्—

नाटकीकृतसच्छास्त्रं स्तोत्ररत्नाकराकरम् ।
चूडामणिकृतं वन्दे तातं यज्ञेश्वराह्वयम् ॥ ३ ॥

वेङ्कटेशेन कविना चरकूरिकुलेन्दुना ।
रामायणं कविप्रीत्यै चित्रबन्धैर्निबध्यते ॥ ४ ॥

साकेतसंज्ञा नगरी नगरीतिगृहोज्वला ।
इहास्ति भूरिवरणा वरणा धरणीतले ॥ ५ ॥

सन्दष्टयमकम्—

यत्र भ्रमन्त्यः संरेजुर्दारुयन्त्रे नृपाङ्गणे ।
मेरुप्रदक्षिणरता गणिकास्तारका इव ॥ ६ ॥

End:

नागबन्धः—

अयकायचयव्येयभयहेयवरश्रय ॥ ३० ॥
व्ययक्षयनयश्रेयजयमायदमव्रय ॥

छत्रहरबन्धाः—

इति स्थितो मुनितिलकेन पादपान्
विलोकयन्पथि पलतां रघूत्तमः ।

अभिद्रुतं भरतमवैक्षतोत्सुकः
  सहानुजं फलितमनोरथद्रुमम् ॥ ३१ ॥

नन्दिता निजपदारविन्दयो-
  र्नन्दितेन भरतेनरासुवः ।
पाविमुच्य च तदाश्रमे पुरी-
  माजगाम रघुराजपालिताम् ॥ ३२ ॥

स रत्नसिंहासनमध्यमाश्रित-
  स्ततोऽभिषिक्तश्चतुरर्णवैर्जलैः ।
विभीषणार्कात्मजधूतचामरो
  बभूव शत्रुघ्नधृतोष्णवारणः ॥ ३३ ॥

राममाप मुदा साक्षाद्राज्यलक्ष्मीस्सनातनी ।
नितदास्सकृपश्रेणिः प्राप्तभूत्योपमामरा ॥ ३४ ॥

आन्दोलिकाबन्धः—

साम्राज्यलक्ष्मीमुदितोथ रामो
  यथोचितं पूजितमित्रवर्गः ।
दानैर्मखैस्तर्पितविप्रदेव-
  श्चिरं महीं पालयति स्म सर्वाम् ॥ ३५ ॥

रामं देवं धामायावंद्रागाकारं भो दातारम् ।
गेयो भू दारो यो धेयो वन्देहंसं तं भि भाधिः ॥ ३६ ॥

कङ्कणबन्धः—

षड्दर्शनी तत्त्वविदः कवीन्द्राः
  लक्ष्म्यादृता बह्वृचसार्वभौमाः ।

श्रीयज्ञनारायणभट्टसंज्ञा

यान्ति भूमौदुमतातपादाः(?) ॥ ३७ ॥

Colophon:

इति श्रीचरकूरिकोण्डुभट्टोपाध्यायपौत्रेण यज्ञनारायणभट्टतनयेन वेङ्कटेश्वरसर्वाम्बिकागर्भशुक्तिमुक्तामणिना विरचिते चित्रबन्धरामायणे महाकाव्ये युद्धकाण्डकथा । संपूर्णः षष्ठस्सर्गः ॥

Subject: Citrabandharāmāyaṇam 1-6 sargas.

Remarks:—The Ms. is in good condition and recent.

The author of this work is one Venkaṭeśa, son of Yajñeśvara or Yajñanārāyaṇa of the Carakūri family—evidently an Āndhra.

His geneology is given thus:—

Koṇḍubhaṭṭopādhyāya
|
Sarvāmbikā=Yajñanārāyaṇa bhaṭṭa
|
Venkaṭeśvara.

This Yajñanārāyaṇa is the author of a work called Cūdāmaṇi. The work deals with the story of the Rāmāyaṇa.

॥ चित्रबन्धरामायणम् ॥

3773. CITRABANDHARĀMĀYAṆAM.

Burnell's Catalogue No. 10274 a. Page 158. Right column. Substance— Palm leaf. Size—15¾ × 1¾ inches. Leaves—18 (1-18). Lines—8 or 9 to a Page. Script—Telugu. No. of Granthas—580. Author—Venkaṭeśvara. Complete. 1-6 sargas.

Beginning, end, colophon and subject—Same as No. 3772.

Remarks:—The Ms. is in a fairly good condition.

Other works contained in this manuscript are:—

1. चित्रबन्धरामायणटीका Sheets (19-54)

2. do. do. (1-19)

॥ चित्रबन्धरामायणटीका ॥

3774. CITRABANDHARĀMĀYAṆAṬĪKĀ.

Burnell's Catalogue No. 5043. Page 158. Right column. Substance—Paper. Size—10×4¼ inches. Sheets—57. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Yajñanārāyaṇa. Incomplete.

Beginning:

श्रीगणेशाय नमः ।

पूर्तये सम्पदां चारुकीर्तये दळितार्तये ।
दक्षिणामूर्तये नित्यं नमोऽस्तु शिवमूर्तये ॥ १ ॥
विहिताक्षरणद्यूतमन्याधूतं विभूतये ।
सम्पदूतं महद्भूतं रामदूतं नमाम्यहम् ॥ २ ॥
स्वपुत्ररचितं चित्रबन्धरामायणाह्वयम् ।
व्याकरोति महाकाव्यं यज्ञनारायणस्सुधीः ॥ ३ ॥
अवस्थानेऽपि जिह्वाग्रे शब्दालङ्कारशास्त्रयोः ।
बुधानां सुखबोधार्थमर्थमात्रं विलिख्यते ॥ ४ ॥

अत्र वेङ्कटेश्वरनामा महाकविः स्वप्नप्रसन्नभ्रमराम्बिकावरप्रसादलब्धसहजसारस्वतचित्रबन्धरामायणाख्यं काव्यं व्याचिकीर्षुः "काव्यं यशसेऽर्थकृते" इत्यालङ्कारिकपरिपाटीमनुसरन् "काव्यालापांश्च वर्जयेत्" इत्यस्यासत्काव्यविषयतां च पश्यन् चिकीर्षितस्य काव्यस्य निर्विघ्नपरिसमाप्त्यर्थं प्रचयगमनाय च स्वेष्टदेवताप्रार्थनारूपं मङ्गलमादावाचरति ॥

लक्ष्मीति ॥ ते वक्ष्यमाणमहिमसम्पन्ना लक्ष्मीकटाक्षाः मयि समन्ततः प्रसरन्तु । तेषां सामर्थ्यमेव प्रकटयति ॥ येषामिति ॥ येषां लक्ष्मीकटाक्षाणां महिम्ना जनार्दनोऽपि जगतामीश्वरोऽभूत्, किं पुनः ब्रह्मेन्द्रादय इति भावः । इदं काव्यं वेङ्कटेशेन कविना काव्यादिश्लोके सर्गान्तश्लोकेषु च लक्ष्मीपदाङ्कितं कृतमिति बोध्यम् ॥ १ ॥

End:

वक्त्र इति ॥ हनूमान् तदा नियोगसमये वक्त्रे विकचानां पाटलानां पद्मानां लक्ष्मीं दधत् दधानस्सन् । अनेन हर्षादयो व्यज्यन्ते । रत्नाकरस्य समुद्रस्य तरणाय शिखरीन्द्राणां पर्वतश्रेष्ठानां पर्वतश्रेष्ठं महेन्द्रं पूषा सूर्यः अम्बरस्याकाशस्य लङ्घनायोदयाचलमिव आरोहति स्म आरूढवान् । रोहतेः "लट् स्मे" इति भूते लट् । उपमालङ्कारः ॥ ६८ ॥

Colophon :

इति श्रीवरकूरिकोण्डुभट्टोपाध्यायतनय श्रीयज्ञनारायणभट्ट-

विरचितायां चित्रबन्धरामायणव्याख्यायां चतुर्थस्सर्गः ॥

Subject: Citrabandharāmāyaṇaṭīkā called Bālaprabodha 1-4 sargas only.

Remarks:– The Ms. is in good condition. This Ms. breaks off with fourth sarga.

The commentator gives his geneology as:—

Koṇḍubhaṭṭa
|
Yajñanārāyaṇa.

The author of the text says that his father was Yajñanārāyaṇa, son of Koṇḍubhaṭṭa. It is clear from the third of the introductory verses that the father commented upon the work of his son. This work has not yet been printed.

॥ चित्रबन्धरामायणटीका ॥

3775. CITRABANDHARĀMĀYAṆAṬĪKĀ.

Burnell's Catalogue No. 10274 b. Page 158. Right column. Substance—Palm leaf. Size—15¾ × 1¾ inches. Leaves—36(19-54). Lines—7 or 8 to a Page. Script—Telugu. No. of Granthas—1250. Author—Yajñanārāyaṇa. Incomplete.

Beginning—Same as No. 3774.

End:

तस्येति ॥ भुवि रोहन्तीति भूरुहाः वृक्षाः । तस्य हनूमतो वेगात् अनूत्पत्य अनू....क्षितिनन्दनीं सीताम् । "करणाधिकरणयोश्च" इति करणार्थे ल्युट् । "टिड्ढाणञ्" इत्यादिना ङीप् । पाताळे विचेतुं मार्गितुमिव स्वेषामपि क्षितिजत्वाविशेषात । सोदरीमार्गणमुचितमेवेति

॰ भावः ।........जले अम्भसि निपेतुः पतिताः । पते-
लिंट् ॥ ५ ॥

महेन्द्रेति । महेन्द्रस्य देवेन्द्रस्य............ ॥

Colophon: (Leaf No. 53.)

इति श्रीचरकूरिकोण्डुभट्टोपाध्यायतनय श्रीयज्ञनारायणभट्टविरचितायां चित्रबन्धरामायणव्याख्यायां (बालप्रबोधाख्यायां चतुर्थ-स्सर्गः) ॥

Subject: Citrabandharāmāyanaṭikā called Bālaprabodha 1-5 sargas.

Remarks:—The Ms. is in fairly good condition. This Ms. abruptly breaks off in the 6th stanza of Fifth sarga.

For other works contained in this Ms. See No. 3773.

॥ चित्रबन्धरामायणटीका ॥

3776. CITRABANDHARĀMĀYAṆAṬĪKĀ.

Burnell's Catalogue No. 10274 c. Page 158. Right column. Substance—Palm leaf. Size—14×1⅜ inches. Leaves—29 (212—240). Lines—4 or5 to a Page. Script—Telugu. No. of Granthas—425. Author—?. Incomplete.

Beginning:

शुभमस्तु ।

साकेतेति । विचित्रनीति । चित्रः सर्गः सूचितः ॥ १ ॥

रामायकैः श्रीलोकैः संगेन त्यान्तां (?) ग्लानां आवृत्ता रामविलोकि संगतः अन्तो यस्याः तां अयोध्यां योद्धुम-

ख्यामपश्यत् ॥ २ ॥

End:

वर्णक्रमविरोधिनां राक्षसानां कल्कं कल्कभावं कषा-
यतां प्रपद्य विधूतं वर्णं यशः येन वीर्येण उद्भवत् विष्णोः
यशः प्र......... ॥

Colophon: Nil.

Subject: Citrabandharāmāyaṇa. 1—105 verses,
1—55 do.

Remarks:—Ms. is in good condition.

॥ चिदम्बरविलासकाव्यम् ॥

3777. CIDAMBARAVILĀSAKĀVYAM.

Burnell's Catalogue No. 10516 a. Page 158. Right column. Substance—Palm leaf. Size—17½ × 1½ inches. Leaves—12 (3-14). Lines—8 or 9 to a Page. Script—Grantha. No. of Granthas—350. Author—Cidambarakavi. Incomplete. Sargas 2-5.

Beginning:

.... तस्य नादो
घण्टामणेर्गदितुमेव किमुज्जिजृम्भे ।
तं प्रस्थितं ....
.... ॥

एवं पुरादरभरादुपदाध(धु)रीणाः ।
इन्द्रादयो दिविषदो जगदेकनाथं
मन्द्रा........................ ॥
............उपासत चाटुकाराः ॥ ३ ॥

....

.... ।

आस्थाय सृष्टिभवमेव समष्टिभूतं

आस्थावशादिव यशो .... ॥ ४ ॥

आगामि सङ्घटनमादिनटस्य शंभोः

आदाववेक्षितुमिवातिरसं रमेशः ।

निद्रामुदस्य निरगात्..............

.... ॥ ५ ॥

......वनीवलयवेष्टनबन्धुरो यः

कर्पूरराशिपरिपाण्डुगभीरपूरः ।

इन्द्रोपलद्युतिलस... .. ..

.... ॥ ६ ॥

श्यामं क्वचिन्मरतकैः विदुरत्र (?) शङ्खैः

कामं सितं समरुणं क्वचन प्रवालैः ।

स्वान्तः पु......................

..............भिः सुतं शुभाभिः ॥ ७ ॥

शुभ्राणि शुक्तिपुरतस्स्फुटितादुदीर्णा-

न्यभ्रात्पयःकणधिया पतितानि.... ।

....

........कठिनानि मुखाद्वमन्ति ॥ ८ ॥

मुग्धारमन्दनिलयामुखचन्द्रबिम्ब-

सान्निध्यलाभजुषि सन्ततमेव य... ।

....

वियोगजनितं न विदन्ति खेदम् ॥ ९ ॥

क्षीरोदमक्षिशतलक्षिमहो विशेष· · · · · · · · · ·
तीरोदरं स...... .... ।
....
........यशोऽचिरेण विनतासु मा रुह ॥ १० ॥

मानानुरूपमतिशालिषु माधवस्य
नानानुतिव्यतिकरे न .... ।
....
माषाबलादजनि भागवतोत्तमेषु ॥ ११ ॥

नारायणे चलति नारदसंगतो वा
नामापदानपदगानवि(लोल....) ।
....
.........महती भवति स वीणा ॥ १२ ॥

तापिञ्छरम्यतनुरैक्ष्यत कर्णिकारात्
आपिञ्जरस्त्विषि हरिर्वयासामवीशे ।
...............प्रो
.....................विद्युदब्दः ॥ १३ ॥

दक्षौ विजृम्भितदरेतरसामघोषौ
पक्षौ वितत्य विचरन्दिपि पक्षिराजः ।
तं च..............................
............(स)भा बभासे ॥ १४ ॥

अंसं गतं सरसभागवतावतंसं
संसक्तं सरसिजाक्षमयं दधानः ।

हासं मयूर..............

........................॥ १५ ॥

फालेक्षणा तु विजयानुभवस्तवेति

स्याले प्रशंसति हरौ परिहासशीले ।

....

.... (मु)खमालुलोके ॥ १६ ॥

स्वस्योमया सहजया प्रणतौ कृताया-

मर्धं परं तदपि भक्त........ ।

....

............हितोऽभूत् ॥ १७ ॥

शश्वद्विजृम्भय निशार्ग(ल)भूतः शताङ्गे

विश्वत्प्रशंसनविशेषपद...... ।

....

.......................म् ॥ १८ ॥

पुण्येन पूर्वचरितेन विपाकभाजा

गण्येतरेण विबुध........... ।

....

..............ग्मुरेव ॥ १९ ॥

सत्पुङ्गवो हरिमुवाच सवाचमीशो

यत्पुण्डरीकमाधितिष्ठति (हंसयूनः) ।

....

.... ॥ २१ ॥(?)

सव्याघ्रपादमुनिरादरतोऽन्यकृत्या-
मंव्यावृतेन मनसा जनसार्थमन्यः ।
आनन्दनृत्तमव(लोकयितुं मदीयं
ध्यायन्दधन्नु तपस्यत तत्र धन्यः) ॥ २२ ॥

त्वद्वाक्यतः फणिपतिः त्वरयातिभक्त्या
तद्वासवान्सुकृति...सनया समेतः ।
कंजाक्षकिञ्च सपतञ्जलिरस्मदीक्षा-
सञ्जातधीर्ननु तपश्चरति प्रसिद्धः ॥ २३ ॥

तत्तन्मनोरथमहं परिपूरयिष्य-
न्नृत्तं मनोहरमहं महितं वितन्वन् ।
नित्यं चिदम्बरपुरे कृतसन्निधान-
(प्र)त्यक्षमेव भजतां फलदो भवानि ॥ २४ ॥

End:

संपूर्णकामेन चिदम्बरेण
संपूज्य पूज्येन विसृज्यमानाः ।
नरा वहन्तो हृदयेन देशं
स............स्वदेशम् ॥ ४८ ॥

अलङ्कृतौ महति चोलभुवः प्रियायाः
लोलेक्षणेन स्फुरति तत्र किमग्रहारे ।
सीमातिलङ्घिरसधाम्नि सितांशु-
चूडो वामालकान्तरमपि स्मरति स रम्यम् ॥ ४९ ॥

नद्या ह्युधारामके जानपद्याः
पारेवासी पालयूरग्रहारे ।

लीलासेव्यः शैल(क)न्यासहायः
कैलासेऽपि व्यापकाङ्क्षां न देवः ॥ ५० ॥
उदग्रमुच्चिद्रमानिवासं
चिदम्बरागारमुदारचेताः ।
कृत्वा कृपां काञ्चनसंसदीड्य-
चिदम्बरेशं चिरमध्युवास ॥ ५१ ॥

किंचित्सकुंचितपदाम्बुजमञ्चितश्रीः
तं चित्सभापतिमुदञ्चितभक्तिरर्चन् ।
प्राचेत रक्षय...मु...कुलाब्जभानु-
रास्ते हितेन हृदयेन चिदम्बरेशः ॥ ५२ ॥

मोचासारमुचां चिदम्बरकवेः वाचां परं वैभवं
श्राव्यं काव्यमिदं चिदम्बरविभोस्संसद्विलासं वरम् ।
रीतिश्रीरधरीकरोति विबुधां सौधीमसौ धीरधीः
एतच्चारु बहु प्रयोगचतुरस्वालोकमालोकताम् ॥ ५३ ॥

Colophon:

इति चिदम्बरस्य कृतौ चिदम्बरविलासे पञ्चमः सर्गः ॥

Subject: Cidambaravilāsakāvyam. 2-5 sargas only.

Remarks:—The Ms. is in a very bad condition. Most of the leaves are broken away and worm eaten. The author of the work Cidambarakavi seems to have been a native of the town of Pālayūr in the Tanjore District.

After the colophon is found:—

प्रबन्धकर्तापि चिदम्बरेश्वरः
तदर्थहारोपि चिदम्बरेश्वरः ।

प्रवर्तकोऽप्यस्य चिदम्बरेश्वरः
मुदेत तदेतत्त्रितयं विपश्चिताम् ॥
चैदम्बर्यां वासभूमौ नटेन्द्रो
कादंबीशः कान्तकर्णस्य शम्भोः ।
आविर्भावं सूचयन्नाभिषेकं
प्राबन्धोसावुत्सवो बन्धुरोऽभूत् ॥

The work deals with the purāṇic account of God Naṭarāja at the famous shrine of Cidambaram in South India. The other work contained herein is Cidambaravilāsavyākhyā (No. 3779).

॥ चिदम्बराविलासकाव्यम् ॥

3778. CIDAMBARAVILĀSAKĀVYAM.

Burnell's Catalogue No. 10315 a. Page 158. Right column. Substanco—Palm leaf. Size—15½ × 1⅛ inches. Leaves—18 (1-18). Lines—5 to a Page. Script—Telugu. No. of Granthas—350. Author—Cidambarakavi. Incomplete.

Beginning, end, colophon and subject—Same as No. 3774.

Remarks:—The Ms. is in a very bad condition. Most of the leaves are broken away and worm eaten.

The other work contained in this Ms. is Cidambaravilāsakāvyavyākhyā (Leaves 19–64).

॥ चिदम्बराविलासव्याख्या ॥

3779. CIDAMBARAVILĀSAVYĀKHYĀ.

Burnell's Catalogue No. 10316 b. Page 158. Right column Substance—Palm leaf. Size—17½ × 1½ inches. Leaves—

34 (15-48). Lines—8 or 9 to a Page. Script—Grantha. No. of Granthas—1250. Author—Cidambarakavi. Complete.

Beginning:

..................टन्नत्वा नटपतिं विभुम् ।

चिदम्बरविलासस्य व्याख्यां विरचयामहे ॥ १ ॥

काव्यमारभमाणः कविः "आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम्" इति वचनादाशिषमाचरति ॥ भद्रमिति ॥ अलि...भृङ्गपङ्क्तिवन्नीला श्यामला भवान्याः पार्वत्याः कटाक्षमाला कटाक्षपरंपरा भवतां युष्माकं भद्रं विधत्तां करोतु । भवस्य शिवस्य मौलिगङ्गा मौलिविद्यमाना गङ्गा यस्या... अक्षमालायाः प्रसङ्गात् प्रकर्षेण सङ्गात् संपर्कात वयस्यां सखीं यमुनां इतेव प्राप्तेव भाति सा भद्रं विधत्तामित्यन्वयः। अत्र विशदाया भवमौलिगङ्गाया भवानिसम्बन्धाद्यमुनामिळितत्वोत्प्रेक्षणादुत्प्रेक्षालङ्कारः। "यत्रान्यस्य तु सम्बन्धादन्यत्वेनोपकीर्तितम् । प्रकृतं हि भवेत्प्राज्ञास्तामुत्प्रेक्षां प्रचक्षते ॥" इति लक्षणात् । अत्र . "देवतावाचकाश्शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्यास्स्युर्गणतो लिपितोपि च" इति वचनाद्वर्णगादिशुद्धिरभ्युच्चयः । अत्र सर्गे प्रायेण वृत्तमुपजातिः । "अनन्तरोदीरितलक्ष्मभाजः पादा यदीया उपजातयस्ताः" इति लक्षणात् ॥

End:

मोचेति ॥ मोचासारमुचां कदळीरसमुतां चिदम्बरकवेः वाचां परं वैभवमिति शेषः । चिदम्बरविभोर्विलासं शंसद-

....मिदं काव्यं श्राव्यं श्रवणयोग्यं असौ रीतिः श्रीः रीतीनां पाञ्चालवैदर्भगौडरीतीनां श्रीः समृद्धिः । सौधीं सुधायाऽस्सम्बन्धिनीम् । विभातां विभुत्वम् । अधरीकरोति । अशैते बहुप्रयोगचतुरभरधीः स्वालोकं शोभनालोकं शोभनप्रकाशमेतत्काव्यं चिदम्बरविलासमवलोकतां ईक्षतां (प)श्यत्विति यावत्

Colophon:

इति पदवाक्यप्रमाणपारावारपारीणकौशिकगोत्रविशेषकचिदम्बरकविरचितायां चिदम्बरकृतेः चिदम्बरविलासस्य व्याख्यायां अर्थप्रदीपिकाख्यायां पञ्चमः सर्गः ॥

(चिदम्बरविलासकाव्यं मूलव्याख्यानं समाप्तम्)

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

Subject: Cidambaravilāsakāvyavyākhyā—called Arthapradīpikā sargas 1-5.

Remarks:—The Ms. is in a decaying condition. Many of the leaves are torn away and worm eaten.

The author of the text has commented upon the Kāvya.

॥ चिदम्बरविलासकाव्यव्याख्या ॥

3780. CIDAMBARVILĀSAKĀVYAVYĀKHYĀ.

Burnell's Catalogue No. 10315(b). Page 158. Right column. **Substance**—Palm leaf. Size—$15\frac{1}{2} \times 1\frac{1}{10}$ inches. Leaves —45 (19-64). Lines—5 to a Page. Script—Telugu. No. of Granthas—1250. Author—Cidambarakavi. Complete. Sargas 1-5.

Beginning, end, colophon and subject—Same as the previous No. 3779.

Remarks:—The Ms. is in a bad condition.

॥ चोरपञ्चाशिका ॥

3781. CORAPAÑCĀŚIKĀ.

Burnell's Catalogue No. 4935. Page 158. Right column. Substance—Paper. Size—9¾ × 4¼ inches. Sheets—16. Lines—7-11 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Bilhaṇa. Complete.

Beginning:

श्रीगणेशाय नमः ।

पृथ्वीमण्डलनाभिभूतकनकाद्विन्ध्योत्तरस्यां दिशि
नानासज्जनसङ्करराजितमहापाञ्चालदेशोऽभवत् ।
लक्ष्मीमन्दिरनामपट्टणपरं नानासुखैकास्पदं
तत्रासीन्मदनाभिरामनृपतिर्भूपालचूडामणिः ॥

End:

ज्ञात्वा दूतमुखाद्यथा दृढतरं स्नेहं नराधीश्वरो
त्वं या सो प्रतिषेधयाशु तमिह त्वं बिल्हणं प्रापय ।
इत्युक्ते तरसा समेत्य सहसा दुक्त्यानिषेधाधरा-
दानीयावनिपालवेश्मनि तया सोऽप्यब्रवीद्भूपतिम् ॥

Colophon:

इति बिल्हणकृतौ चोरपञ्चाशतीनाम ग्रन्थः समाप्तः

Subject: Corapañcāśikā.

Remarks:—In his Corapañcāśikā Bilhaṇa narrates the story of his love with a royal maiden and consequent marriage. The

work has been published by the Nirṇayasāgara Press, Bombay. It is well known that Bilhaṇa was living in the court of the Cālukya King Vikramāditya VI (1076-1112) of Kalyāṇa. His Vikramāṅkadevacarita was composed to perpetuate the memory of his patron.

॥ चोरपञ्चाशिका ॥

3782. CORAPAÑCĀŚIKĀ.

Burnell's Catalogue No. 4936. Page158. Right column.
Substance—Paper. Size—$8\frac{7}{8} \times 3\frac{7}{8}$ inches. Sheets—12. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Bilhana. Complete.

Beginning, end, colophon and subject—Same as No. 3781.

Remarks: —On the title page is given:

वेङ्काजी नायकस्येदं पुस्तकम्.

On the last cover page is found:

पुण्डोपनाम्न: वेङ्काजीनायकस्येदं पुस्तकम्.

There are certain epigraphical peculiarities in this manuscript.

के is written as ाक
कै ,, ,, ाके
को ,, ,, ाका
कौ ,, ,, ाको

This is not restricted to the letter क alone. It is only an instance.

The Ms. is well preserved.

॥ चौरपञ्चाशत् (ती) ॥

3783. CORAPAÑCĀŚAT (TĪ)

Burnell's Catalogue No. 4937. Page 158. Right column. Substance—Paper. Size—$8\frac{7}{8} \times 3\frac{7}{8}$ inches. Sheets—15. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Bilhaṇa. Complete.

Beginning—Same as No. 3781.

End :

आहूय चोरं नृपतिः स्वपुत्र्याः
चोरं तताने समसङ्गतुल्याः ।
तया सहाय(?)पृथिवीशपुत्र्याः
रराज रत्येव सरोजभाणः ॥ १५२ ॥

Colophon:

इति चोरशतकं समाप्तम् ॥

Subject: Corapañcāśat

Remarks:—The Ms. is in good condition.

After the colophon is found:

नचिान्तरपञ्चाशतपुस्तकं समाप्तम् ॥

॥ चौरपञ्चाशिका ॥

3784. CAURAPAÑCĀŚIKĀ.

Burnell's Catalogue No. 10245. Page 158. Right column. Substance—Palm Leaf. Size—$14\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—7. Lines—9-11 to a Page. Script—Telugu. No. of Granthas—280. Author—Bilhaṇa. Complete.

Beginning—Same as No. 3781.

End—Same as No. 3785.

Colophon: Nil.

Subject: Corapañcāśikā.

Remarks:—The Ms. is in good condition.

॥ चोरपञ्चाशती ॥

3785. CORAPAÑCĀŚATĪ.

Burnell's Catalogue No. 4938. Page 158. Right column. Substance—Paper. Size—$10\frac{3}{4} \times 4\frac{1}{8}$ inches. Sheets—9. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—210. Author—Bilhaṇa. Incomplete.

Beginning—Same as No. 3781.

End:

अद्यापि तामविगणय्य कृतापराधं
मां पादमूलपतितं सहसा चलन्तम् ।
वस्त्राञ्चलं मम करान्निजमाकृषन्तीं
मामेति रोषपरुषं वदतीं स्मरामि ॥ १२ ॥

Colophon: Nil.

Subject: Corapañcāśikā.

Remarks:—One page is left blank in the middle, though the text is not incomplete.

॥ चोरपञ्चाशत् ॥

3786. CORAPAÑCĀŚAT.

T. S. Collection No. 708. Substance—Paper. Size—$9\frac{5}{8} \times 4\frac{1}{8}$ inches. Sheets—16. Lines—7-8 to a Page. Script—

Devanāgarī. No. of Granthas—200. Author—Bilhaṇa. Incomplete.

Beginning—Same as No. 3781.

End:

अद्यापि तां गमनमित्युदितं मदीयं
श्रुत्वैव भीरु हरिणीमिवचञ्चलाक्षीम् ।
वाचि स्खलद्विगलदश्रुजलाकुलाक्षीं
संचिन्तयामि पु...... ॥ २६ ॥

Colophon: Nil.

Subject—Same as No. 3781.

Remarks:—The Ms. is in good condition.

On the title page is given:

विदुषा स्वामिनाथेन दीपाम्बापुरवर्तिना ।
लिखिता चोरचर्येयं बिल्हणस्य महाकवेः ॥

॥ चोरपञ्चाशिका OR बिल्हणचरितम् ॥

3787. CORAPAÑCĀŚIKĀ.
OR BILHAṆACARITAM.

S. K. Collection No. 180. Substance—paper. Size—10 × 4¾ inches. Sheets—8(11-18). Lines—9 to a page. Script—Devanāgari. No. of Granthas—125. Author—Bilhaṇa.

Beginning:

अद्यापि तां शशिमुखीं नवयौवनाढ्यां
पनिस्तनीं पुनरहं यदि गौरकान्तिम् ।

पश्यामि मन्मथशरानलपीडिताङ्गीं
गात्राणि संप्रति करोमि सुशीतलानि ॥ ९० ॥

End and colophon same as No. 3791.

Remarks:—The Ms. is in a bad condition.

The Corpañcāśikā is otherwise known as Bilhaṇacaritam, Corapañcāśat and Corapañcāśatī.

॥ चोरपञ्चाशिका ॥

3788. CORAPAÑCĀŚIKĀ.

Not noticed by Burnell. Ms. No. 15530.

Substance—Paper. Size—$8\frac{3}{8} \times 4\frac{1}{2}$ inches. Sheets—9 (19-29 sheets 23 & 24 are missing). Lines—9-10 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Bilhaṇa. Incomplete.

Beginning:

...स्त्वेयस्फुरति हृदये कोऽपि महिमा ॥ १४ ॥

भवन्तो वेदान्तं प्रणिहितधियामत्र गुरवो
विदग्धालापानां वयमपि कवीनामनुचराः ।
तथाप्येद्रूमो न हि परहितात् पुण्यमधिकं
न चास्मिन्संसारे कुवलयदृशो रम्यमधिकम् ॥ १५ ॥

End:

अर्धं सुत्या निशायां सरभससुरतायाससंश्लेषयोगैः ।
प्रोद्भूता.......................... ॥

Colophon: Nil.

Subject: Corapañcāśikā.

Remarks:—The Ms. is in a decaying condition.

॥ चोरपञ्चाशत् ॥

3789. CORAPAÑCĀSAT.

Burnell's Catalogue No. 4950 Page 158. Right column. Substance—Paper. Size—9¾ × 5 inches. Sheets—9. Lines—6 or 7 to a Page. Script—Devanāgarī. No. of Granthas—118. Author—Bilhaṇa. Incomplete.

Beginning:

श्रीगणाधिपतये नमः ।

शुभमस्तु ॥

अद्यापि तां कनकचम्पकदामगौरीं
फुल्लारविन्दनयनां तनुरोमराजिम् ।
सुप्तोत्थितां सुरतबिल्हणलालसाङ्गीं
विद्यां प्रमादगलितामिव चिन्तयामि ॥

End:

अद्यापि नैव हृदयं विनिवर्तते मे
तस्या निमग्नमधरे तरलेक्षणायाः ।
युक्तं न खल्वहमिदं तदुपेत्य साक्षाव्
लोकत्रयेऽपि दुरवापरसाभिपूर्णम् ॥ ६० ॥

Colophon: Nil.

Subject: Corapañcāśikā.

Remarks:—The Ms. is well preserved.

॥ चौरपञ्चाशिका ॥

3790. CAURAPAÑCĀŚIKĀ.

Burnell's Catalogue No. 10246. Page 158. Right column.

Substance—Palm leaf. Size—$18 \times 1\frac{4}{10}$ inches. Leaves—4. Lines—7 to a Page. Script—Grantha. No. of Granthas—75 Author—Bilhaṇa. Complete.

Beginning:

........वेश्य सुमुखीमनिमेषमालोकयन् मुखं तस्याः।
कथयन् कथाश्च विविधाः कालक्षेपं कदा करिष्यामः ॥

अद्यापि तां कनकचम्पकदामगौरीं etc.

Same as No. 3789.

End:

हंससंसदवतंसितं रंस्वीकृतं सुभगमानिभिवकैः (?)
द्यौरपि द्युमणिभूषिता क्षणज्योतिषेति हसितं तु केतकैः॥

Colophon:

इति चोरपञ्चाशत्समाप्तः

Subject—Same as No. 3781.

Remarks. The Ms. is in a decaying condition.

॥ चोरपञ्चाशत् ॥

3791. CORAPAÑCĀŚAT.

Burnell's Catalogue No. 4939. Page 158. Right column.

Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{8}$ inches. Sheets—6 (16-21). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—Bilhaṇa. Incomplete.

Beginning:

(अद्यापि तां विधृतकज्जलकाल)नेत्रां
तन्वीं प्रभूतकुसुमाकुलकेशपाशाम् ।
सिन्धूरसंवलितमौक्तिकहारदृष्ट-
माबद्धहेमरुचिमन्तरहं स्मरामि ॥ २० ॥

End:

तद्वाक्यैरेव बुद्धा तदुभयहृदयं भूमिपालो युवां वै
नित्यं स्वच्छन्दवृत्त्या सुखमनुभवतां तौ तथास्त्वीति गार्ताम् ।
प्राज्यं राज्यं गजाश्वप्रकरममलिनं भूषणौ सौधगेह-
प्रादिष्टार्थः स सिद्धिर्भवविपुलतरौ सिक्तयोश्चित्रमेतत् ॥११॥

Colophon:

इति श्री बिल्हणनाटकं समाप्तम् ॥

Subject: Corapañcāśikā.

Remarks:— The Ms. is well preserved.

॥ ज्ञानविलासकाव्यम् ॥

3792. JNĀNAVILĀSAKĀVYAM.

Burnell's Catalogue No. 4995. Page 158. Right column. Substance—Paper. Size—$9\frac{4}{5}\times3\frac{9}{10}$ inches Sheets—47. Lines—6 or 7 to a Page. Script—Devanāgarī. No. of Granthas—426. Author—Jagannātha. Complete.

Beginning:

श्रीगणेशाय नमः श्रीगुरुभ्यो नमः ।
यस्य स्मृत्या गलन्ति द्रागविद्याविभ्रवृत्तयः ।
तं नित्यानन्दकं ज्योतिर्विनायकमुपास्महे ॥ १ ॥

अस्ति प्रशस्तविषयः समस्ते क्षितिमण्डले ।
प्रशस्तदुस्तपतपस्संपत्त्या सुलभा नृणाम् ॥ २ ॥

* * *

वाराणसीव या साक्षात् मुक्तिक्षेत्रमनुत्तमम् ।
यदाश्रितानां विज्ञानलाभान्मुक्तिरसंशयम् ॥ ६ ॥

स्वकर्मनिर्मलतमानुष्ठाननिरतैः क्वचित् ।
अधिष्ठिता क्वचिच्छैवैः क्वापि भागवतैरपि ॥ ७ ॥

पायं पायं भगवतो निरपायं कथामृतम् ।
प्रगायन्तश्च नृत्यन्ति यस्यां सार्द्रहृदो जनाः ॥ ८ ॥

राकानिशीव नो यस्यां तमस्पर्शोऽपि लेशतः ।
प्रावृषीव न यत्रास्ति रजसोऽपि विजृम्भणम् ॥ ९ ॥

* * *

Sheet 5.

युक्त्या यथोक्तिरमला कुशला च बुद्धिः
भक्त्या हरेः शुचिविवेककलाविरक्त्या ।
श्रीचन्द्रचूडनगरीव सुपर्वनद्या
हृद्याप्यभासत तया सुतरां पुरी सा ॥ ४४ ॥

अक्का जगन्नाथमसूत माता
पिता च नारायणदेवविद्यम् ।
तन्निर्मिते ज्ञानविलासनाम्नि
काव्येऽत्र सर्गः प्रथमो व्यरंसीत् ॥ ४५ ॥

सम्पन्नो राज्यसंपत्त्या दैवसंपत्स्वरूपया ।
राजा सत्वप्रकाशाख्यो नगरीं तामपालयत् ॥ १ ॥

* * * *

Sheet 7.

स च तयोः सहवासमहोत्सवः
समभवत्सुतया हृदयङ्गमः ।
अपनिमीलनचम्पककोरके
लसितकान्तिसुवासनयोरिव ॥ २९ ॥

अङ्केति पूर्ववत् ।

तन्निर्मिते ज्ञानविलासनाम्नि
काव्येऽत्र सर्गो व्यगलद्द्वितीयः ॥ ३० ॥

विशीर्णशैशवामेनां यौवनश्रीरथाश्लिषत् ।
मधुलक्ष्मीरिवापेता शिशिरां वनमण्डलीम् ॥ १ ॥

* * * *

Sheet 11.

तस्मादभीष्टपुरुषस्य नयादवाप्तिः
स्यान्मे सुखस्य न लवोऽप्युदयेत तावत् ।
चिन्तातुरमिति नितान्तमिमामुदीक्ष्य
धात्री न्यवेदयत सा किल भूमिपाय ॥ ३४ ॥

अङ्केति पूर्ववत्

..........काव्येऽत्र सर्गो व्यगलत्तृतीयः ॥ ३५ ॥

अथ विज्ञाततत्त्वोऽसौ भूपतिः समुपेत्य ताम् ।
आश्वासयन्त्समवदत् पुत्रि चिन्तां परित्यज ॥ १ ॥

* * * *

Sheet 15.

इहैव पावनमिदं कुलमद्वितीयं
चेतः प्रसादपदमासददाशु यन्मे ।
यत्नस्तदत्र नियमेन फलिष्यतीति
निश्चित्य तत्समविशन्मुदितो विचारः ॥ ३६ ॥

अङ्केति पूर्ववत्
.........काव्येऽत्र सर्गे व्यगमच्चतुरीयः ॥ ३७ ॥

चतुर्थः सर्गः समाप्तः ॥

अथ पूर्णं विधुमिव प्रसन्ने शरदम्बरे ।
तत्रार्यं लोकयामास सद्गुरुं कुलनायकम् ॥ १ ॥

* * * *

Sheet 30.

यस्य वाङ्मनसागम्यमहिम्नो वर्णनक्रमः ।
केवलं निजवाग्जालसम्प्रक्षाळनहेतवे ॥ ६१ ॥

अङ्केति पूर्ववत् ।
.......काव्येऽगलत्पञ्चम एष सर्गः ॥
अथैकस्य निजालोकरभसोपेतचेतसः ।
कुलाधिपतिरातिथ्यं कर्मणा शर्म निर्ममे ॥ १ ॥

* * *

Sheet 34.

इति तया सममिष्टवयस्यया
विहितसत्परिहासविलासया ।

स्वपरिणीते(?)कलाकृदनेहसो

विदधती परिपालनमात्रसत् ॥ ३६ ॥

अङ्केति पूर्ववत् ॥

....

काव्येऽत्र सर्गो विरराम षष्ठः ।

षष्ठः सर्गः ॥

कुलाधिपेन प्रहितो द्रष्टुं कन्यामिहान्तरे ।

विप्रः कृपावलोकाख्यः प्राप्तो भूमिपतिं प्रति ॥ १ ॥

* * *

Sheet 40.

सखीमुखादश्रौषीत्प्रियस्यैव गुणान्मुहुः ।

तत्प्रियेषु च संप्रीतिं समवध्नात्सुलोचना ॥ ४३ ॥

पवित्रतममैत्रिकात्प्रभृतिदासिकासेविता

रहस्यमणिपेटिकामयमहासखीतोषिता ।

सुधारसनिषेचनाद्धृतरसालसाराधिका·

ममन्यत मनोहरं प्रियकथां विना नापरम् ॥ ४५ ॥(४४)

अङ्केति पूर्ववत् ॥

तन्निर्मिते ज्ञानविलासनाम्नि काव्येऽगमत्सप्तम एष सर्गः ॥

प्रियालिङ्गनसौख्यस्य पुरो विषयजं सुखम् ।

सा तुच्छं मन्वती काममित्यन्तः समकल्पयत् ॥ १ ॥

End: Sheet 45.

इति गाढप्रेमबन्धादात्यन्यानन्दमन्दिरे ।

विनात्मना किमपि वा न तस्याः प्रत्यभासत ॥ २९ ॥

प्रियोऽपि गाढनिर्बद्धः प्रेम्णा कुशलया तथा ।
क्षणमप्येतया तावद्वियुक्तो न व्यभाव्यत ॥ ३० ॥

आत्मानमेव सर्वत्र पश्यन्ती सा सुलोचना ।
किञ्चिन्नाविन्ददात्मानमहो केयं विचित्रता ॥ ३१ ॥

लहरीव समुद्रस्य विलीना जलनामके ।
विनात्मना सुनयनां न सा पृथगलक्ष्यत ॥ ३२ ॥

कलानिधेरिव कला सकले विधुमण्डले ।
नालक्ष्यत पृथक्त्वेन सुखधामनि सात्मनि ॥ ३३ ॥

इत्यात्ममात्रमेवैषा विशेषाभाववर्जिता ।
यादृगासीत्तादृगासीत्तद्वक्तुं तु न शक्नुमः ॥ ३४ ॥

किमानन्दे लीना व्यतिगतपथे वाङ्मनसयोः
किमानन्देनैव प्रसभमतिसान्द्रेण घटिता ।
किमानन्दाकृत्या परिणमनमासाद्य गलिता
यथा सद्भाग्या सा समजनि तथा सैव न परा ॥३६॥(३५)

कृपाकटाक्षेण कृतः कृतार्थो
रामेण दीनैकदयापरेण ।
कश्चिन्मुमुक्षुः सुजनाङ्घ्रिरेणु-
र्नाम्ना जगन्नाथ इति प्रतीतः ॥ ३७ ॥ (३६)

मन्देनापि भृशं नितान्तगहनं श्रुत्यन्तमार्गानुग-
स्तेन ज्ञानविलास इत्यभिधया यस्सत्प्रबन्धः कृतः ।
तज्जानन्तु महाजना न रचना सेयम्मदीया पुन-
र्लीलोन्मीलितमीहितं रघुपतेः तत्सर्वधीबोधिनः ॥ ३८ ॥ (३७)

एला सद्रचना मयैव विहितेत्येवं मयाहङ्कृतौ
युक्ता स्यात्सदसद्विचारविधये विद्यावतां प्रार्थना ।
अन्तर्यामितया सतो रघुपतेरेवोत्तमां कल्पनां
जानेऽहं तु ततस्स्वतो बुधजनाः पश्येयुरेनाम्मुदा ॥ ३९(३८) ॥

Colophon:

अक्का जगन्नाथमसूत माता
पिता च नारायणदैवविद्यम् ।
तन्निर्मिते ज्ञानविलासकाव्ये
सर्गो ययावष्टम उत्तमत्वम् ॥ ४० ॥ (३९) ॥

अष्टमसर्गः समाप्तः ।

श्रीज्ञानविलासकाव्यं समाप्तम् ।

Subject: Jñānavilāsakāvyam 1-8 sargas.

Remarks:—The Ms. is recent and is in good condition. The following extracts are given after the colophon.

एतत्काव्यार्थसङ्ग्रहोऽयम् ॥

सद्वृत्तिः पूः प्रशस्ता भुवि तदधिपतिः कोऽपि सत्वप्रकाशः
शान्तिः कान्तास्य पुत्री सुमतिरिति सतां सङ्गतिस्तामपुष्यत् ।
सख्या सा विष्णुभक्त्या हरिभजनमुपाशिक्षि बाल्ये प्रगल्भा
सत्यात्मानं वरीतुं वरमिह विषये भूरिवैरस्यमाप ॥ १ ॥

ज्ञात्वा स्वप्रकाशः सुमतिपरिणतिं तद्वरं सद्विचारा-
द्वेदान्तेषूपलभ्य प्रथितमथ गुरुं प्रश्रयेणोपसद्य ।
तेनादिष्टं सुमत्या सह वरपुरुषं योजयित्वा कृतार्थः
साक्षादानन्दसान्द्रामलभत परमां योगभूमिं स शान्ताम ॥ २ ॥

परिभाव्येवमुद्दिष्टमेतत्काव्यार्थसङ्ग्रहम् ।
व्याख्यानमनुगृह्णन्तु मया कृतमिदं बुधाः ॥

श्रीरस्तु । श्रीरङ्गायै नमः ॥

The following is given on the last title page.

इदं पुस्तकं काशीतः धुण्ठिराजयज्वना प्रेषितमपूर्वमिति ।

The author states that his mother was called Akkā and his father Nārāyaṇa. The work was evidently secured by the famous commentator on Mudrārākṣasa, Dhuṇḍirājā who flourished during the reign of Śahajee Mahārājā (1684—1710 A. D.). The work is an allegorical Kāvya, explaining the greatness of Vedāntic ideals.

॥ डमरुकव्याख्या ।

3793. ḌAMARUKAVYĀKHYĀ.

J. L. Collection No. 539. Substance—Paper. Size—$7\frac{3}{4} \times 5$ inches. Sheets—2. Lines—18 to a Page. Script—Devanāgarī. No. of Granthas—65. Author—Candraśekhara. Complete.

Beginning:

श्रीगणपतये नमः ॥

श्रीमत्कामेश्वरं देवं देवीं कामेश्वरीं पुनः ।
पितरं शब्दशेषञ्च वाञ्छापूर्त्यै नमाम्यहम् ॥

घनश्यामस्य सुमहाकविशब्दजुषः कृतेः ।
कुर्वे डमरुकस्याहं टिप्पणं चन्द्रशेखरः ॥

जामातृशोधमत्राकुर्वन्ब्रिधातुविस्तराद्यखिलम् ।
डमरुकचित्रावल्यां ज्ञेयं मत्तातपादरचितायाम् ॥ ३ ॥

अथ कविर्ग्रन्थपूर्त्यैं विघ्नघ्नं मङ्गलं करोति। यस्येति। महस अर्धनारीश्वरस्य क्रोडेन आलिङ्गितः निर्वाहकः निर्वहणकारी सूत्रधार इति यावत्।

॥ बुध्येति ॥ अस्मिन्पद्ये वर्तितशैवपक्षेत्यादीनि सम्बोधनानि विरुदप्राप्तानि। भानभूतिः भवभूतिः। आङ्गिरःपुत्रो बृहस्पतिः। गुणाढ्यः। क्षेमेन्द्रः। भर्तृमेण्ठः कालिदासः। दक्षते प्रगल्भते। गवलाः महिषाः। पीयूषोऽभिनवं पयः। ' काव्यालापांश्च " इति श्लोकोऽयं विष्णुपुराणस्थः। देशरूपं समञ्जसम्। दाम्भिकाः पशवः, सदसदज्ञानिन इति यावत्। आकूणनं कुण्ठनम्। पात्रसूचना प्रस्तावनेति व्यज्यते। पितामहः पितृपिता ब्रह्मा च। विधुश्चन्द्रो विष्णुश्च। हरश्चोरो महेश्वरश्च। शतधृतिर्ब्रह्मा। काकोलं काकुम्। विकुण्ठासुतो विष्णुः। अङ्कनं कलङ्कम्। ततं विस्तृतं सुधाचूर्णम्। धातुः रक्तमनःशिला। चन्द्रः कर्पूरम्। स्वभूर्विष्णुः। पृथग्जनैश्चण्डालैः। दासेरो भृत्यः। अगदंकारो वैद्यः। भगन्दरो रोगविशेषः। पत्राण्युपकरणानि। सिद्धार्थः सर्षपाविशेषः। शीतको मन्दः। भोगः सुखं पूणा(?) च। त्रिस्रोताः गङ्गा। ईशः परमेश्वरः। प्राङ्निबन्धेषु प्राचीनप्रबन्धेषु। खिन्ते खिद्यते। कवमानस्य कवयतः। साम्प्रतं युक्तम्। त्रयं पार्वतीपञ्चवक्त्रषण्मुखत्रयम् ॥ १ ॥

End:

शयनतः शेषात्। दृशोश्चन्द्रसूर्ययोः। नाभिसरोजतः ब्रह्मणः। वक्षोमणेः कौस्तुभात्। स्वाख्यादिमार्वं(?)

मङ्गलमित्यर्थः ॥ आर्यावेषः खलु मुनेधिरागच्छति । श-
रणं गृहम् । पशोरुपाकृतिं कृत्वाभिमन्त्र्य हननम् ।
बृहतिका वस्त्रविशेषः । स्वान्ते स्वनाशे । स्वमात्मानम् ।
स्वप्रमदाः धनहर्याः निजाङ्गनाश्च । चक्षूकरिष्यावः
द्रक्ष्यावः । आजवं जव सरस्वती संसारसागरे । प्लीह इति
रोगविशेषः । उशन्ति इच्छन्ति । निजगुणः शब्दः आहितं
रचितम् । वश्यवचाः स्वाधीनसरस्वतीकः इति यावत् ॥

Colophon:

सम्पूर्णमिदं डमरुकव्याख्यानम ।

श्रीसाम्बाय नमः ।

Subject: Ḍamarukavyākhyā. A running commentary on Ḍamaruka which consists of three sections each containing eleven ślokas.

Remarks:—The Ms. is in a fairly good condition. The present work is a commentary on the Ḍamuraka of Ghanaśyāma which work is not available.

॥ डमरुकव्याख्या ॥

3794. ḌAMARUKAVYĀKHYĀ.

J. L. Collectien No. 540. Substance—Paper. Size —7¾ × 5 inches. Sheets —2. Lines—18 to a Page. Script—Devanāgarī. No. of Granthas —65. Author—Candraśekhara. Complete.

Beginning, end, colophon and subject—Same as No. 3793.

Remarks:—The Ms. is in good condition.

॥ डमरुकव्याख्या ॥

3795. DAMARUKAVYĀKHYĀ.

J. L. Collection No. 541. Substance—Paper. Size—7¾ × 5 inches. Sheets—2. Lines—18 to a Page. Script—Devanāgarī. No. of Granthas—65. Author—Candraśekhara. Complete.

Beginning, end, colophon and subject—Same as No. 3793.

Remarks:—The Ms. is in a fairly good condition.

॥ डमरुकव्याख्या ॥

3796. DAMARUKAVYĀKHYĀ.

J. L. Collection No. 542. Substance—Paper. Size—7¾ × 5 inches. Sheets—2. Lines—18 to a Page. Script—Devanāgarī. No. of Granthas—65. Author—Candraśekhara. Complete.

Beginning, end, colophon and subject—Same as No. 3793.

Remarks:—The Ms. is in a fairly good condition.

॥ डमरुकव्याख्या ॥

3797. DAMARUKAVYĀKHYĀ.

J. L. Collection No. 543. Substance—Paper. Size—7¾ × 5 inches. Sheets—4. Lines—7 to 11 to a Page. Script—Devanāgarī. No. of Granthas—65. Author—Candraśekhara. Complete.

Beginning, end, colophon and subject—Same as No. 3793.

Remarks:—The Ms. is in a fairly good condition.

॥ दुष्टदमनकाव्यम् ॥

3798. DUṢṬADAMANAKĀVYAM.

Burnell's Catalogue No. 4793 & 4794. Page 158. Right column. Substance—Paper. Size—$10\frac{7}{8} \times 4\frac{2}{5}$ inches. Sheets—26. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—625. Author—Kṛṣṇabhaṭṭa. Incomplete. 1-3 sargas only.

Beginning:

श्रीगणपतये नमः ॥

योदक्षिणो दक्षिणपाणिपुष्य-
प्रदानतो वाञ्छितमर्थजातम् ।
स सूच्यमिद्धं कृतवानशेषं
तं विघ्नराजं प्रणतोऽस्मि नित्यम् ॥ १ ॥

सभोपयोगिन्यथदेशकाला-
वालोच्य विद्वत्कविकृष्णशर्मा ।
सटीकपद्यान्यपि शिष्टतुष्ट्यै
दण्डाय दुष्टस्य करोत्यजस्रम् ॥ २ ॥

काव्यस्य प्रयोजनमाह—

सेविताः सेवनीया वा तोषणीया नृपादयः ।
येन तेन सुखारूढं काव्यं कार्यं सटिप्पणम् ॥ ३ ॥

'दुष्टाश्चेत्तदा शिक्षणीयाः' इति पाठः पठनीयः ॥

उक्तश्च प्राचीनैः—

"यस्मिन्कस्मिन्नधन-
सनाथे पञ्चपिशाचशतानि ।
यानि पुनर्नरेन्द्रे
तानि केनाकलितव्यानि ॥"

गुणिनां जीवनादेतद्गुणिजीवनमुच्यते ।

दुष्टानां दमनाच्चैतत्प्रोच्यतां दमनं तथा ॥ ४ ॥

ननु,

"येन केनाप्युपायेन यस्य कस्यापि देहिनः ।
सन्तोषं जनयेत्प्राज्ञस्तदेवेश्वरपूजनम्"

इति वचनात्कथं दुष्टदमनं समुचितमत आह—

शुद्धसत्त्वेन चैकेन कार्यं सर्वं न जायते ।
तेनेतरगुणौ शुद्धब्रह्मणाप्यवलम्बितौ ॥ ५ ॥

मया तु तौ कथं नैव धर्तव्यौ कलिचारिणा ।
विशेषाद्भगवद्वाक्यं ये यथा मामिति स्थितम् ॥६॥

अतोपि दुष्टदमनं काव्यं कार्यं सटिप्पणम् ।

काव्यानुक्रमणिकामाह—

क्षोणीभुजां तदीयानामन्येषामपि कृत्स्नशः ।
अनुभूतस्वभावोयं त्रिभिस्सर्गैरिहोच्यते ॥ ७ ॥

प्रतिज्ञाख्ये चतुर्थेऽस्मिन् धर्मचर्चाकृते पुनः ।
नानाविधानि विदुषां कौतुकानि महीभुजाम् ॥ ८ ॥

धर्मघातकदुष्टानां सम्यक्पूजनमुच्यते ।
प्रीयतां भगवानीशः क्षीरनीरविवेचनात् ॥ ९ ॥

नन्वस्तु राजसतामसयोः राजसेवातत्परयोस्त्वत्कृत-काव्यापेक्षा, मम तु शुद्धसात्त्विकस्य केवलं परलोकमात्रं कामयमानस्य नैतत्काव्योपयोग इत्यत आह ॥ पूर्णमिति ॥

पूर्णं पुण्यमवाप्तुमिच्छति सदा शुद्धं पुनस्सर्वतः
संगोप्तुं फलसिद्धये प्रतिसमं जातं च यत्पातकम् ।
तत्स्वप्नेन निहन्तुमाप्तुममलां कीर्तिं च यो वै गुणी
सोऽयं पश्यतु काव्यमेतदखिलं होसीङ्गकृष्णोदितम् ॥१०॥

एतदाशयश्चतुर्थसर्गटीकायामवसेयः ॥

रहस्यानेकशास्त्रार्थरत्नसङ्घविराजिते ।
काव्येऽस्मिन्दुष्टदमने को न रज्जति सज्जनः ॥ ११ ॥

End:

उत्तमनगरी तु श्रीमन्महाबलेश्वरनिकटस्थगुण-गणनिधेश्श्रीमद्दौलतराजस्य राजधानी जाविळीना-मिका । सा तथा ।

तोयं स्वच्छतरं गुणैर्लघुतरं पाकेऽमृतं भोजने
स्वाद्वन्नं रुचिरं बलिष्ठमतुलं द्राक्पाकि पत्रामलम् ।
तद्वत्सर्वजनोपि तादृशगुणो लोकोत्तरो वर्तते
सेयं जावलिदौलतेन्द्रनृपतेः केनाधुना वर्ण्यताम् ॥१०४॥

जातिशुद्धनरैर्युक्ता विख्यातनृपमण्डिता ।
कविभिर्लिखितश्लोका तेन जाविलि कथ्यते ॥ १०५ ॥

जाविलीत्यक्षरत्रयसार्थकीकरणम् ॥

विख्यातनृपो यथा—

यथा ज्ञानात्तथा दाता मानी मानकरस्सताम् ।
दत्वा भुक्त्वा दिवं यातो दौलतेन्द्रो महायशाः ॥१०६॥

Colophon:

ॐ इति श्री होसींगोपनामक रामेश्वरभट्टसूरिसूनुभट्टकृष्ण-
विरचिते दुष्टदमनाख्यकाव्ये दैवज्ञादिस्वरूपकथनन्नाम तृती-
यस्सर्गः ॥ शिवमस्तु ॥

Subject: Dusṭadamanakāvyam. 1-3 sargas only.

Remarks:—The Ms. is old and is in fairly good condition, A paper transcript of this Ms. is also available in this library. No. 4.

The author is called Kṛṣṇabhaṭṭa and is the son of Rāmeśvarabhaṭṭa. He refers to the town of Jāvalī in the district of Daulatabad near Mount Mahābaleśvar and probably that was the native place of the author. He seems to have been the court poet of the king of Daulatabad.

The first canto is styled नृपाभासस्वरूपकथनम्

The second „ „ अनुभूतराजकीयस्वभावकथनम्

The third „ „ दैवज्ञादिस्वरूपकथनम्

These names indicate the subject matter of the work. It deals with the qualifications of the king, the nature of the court and similar topics.

॥ देवावतरणम् ॥

3799. DEVĀVATARAṆAM.

Burnell's Catalogue No. 10259. Page 158. Right column.

Substance—Palm leaf. Size—$15\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—69. Lines—4 to a Page. Script—Telugu. No. of Granthas—850. Author—Śivānanda. Complete.

Beginning:

श्रिया सपायादयुतेन्दुशुभ्रया
बहिस्स्रवन्त्या दययेव यः सताम् ।
जयप्रदाता जगतामधीश्वरः
प्रसन्नवक्त्रो जयति प्रभुः पुमान् ॥

यदुत्तमाङ्गाङ्घ्रिविलोकनोत्सुका
गतात्रविव्योम विधातृमाधवौ ।
विचक्षणा भाग्यवतां सदाशिवः
स मङ्गलं मे कुरुताद्दयानिधिः ॥

क्षणादिदं या सकलं चराचरं
[जगत्]सृजत्यत्त्यन्तयति त्रिभिर्गुणैः ॥
यथा निरङ्गोऽपि शिवोऽङ्गवानभू-
त्करोतु गौरी मम सा शुभं सदा ।

* * *

यदाननाम्भोजभवामधूपमा
सरस्वती पद्यमयी पुरोऽभवत् ।

महाकविस्तस्य विनम्रमौलिना
वहेम वाल्मीकिमुनेःपदद्वयम् ॥

यदास्य चन्द्रच्युतवाक्सुधारसो
बभूव तं सर्वपुराणरूपभृत् ।
विभाति शूद्रोऽपि यदीयकिङ्करो
द्विजार्चितो व्यासमुनिं समाश्रये ॥

कवीन्द्रचूडामणिमार्यसन्नुतं
शिवाक्रपालब्धकवित्वतत्त्वकम् ।
शुभाकृतिं चेतसि कालिदास-
मत्युदारवाचं कलयेऽहमादरात् ॥

पुरातने सत्यपि काव्यसञ्चये
मदीयकाव्ये रमतां सुधीजनः ।
विहाय लोके जरठाङ्गसङ्गतिं
युवा तरुण्यां रमते यथा तथा ॥ १४ ॥

लतावितानावृतकुञ्जराञ्जितं
फलप्रसूनालिशुकालिपादपम् ।
वनं मुनिव्याघ्रसमेतमायतं
विवेश सूतः शुभवारि नैमिशम् ॥ १५ ॥

End:

एवमखिलज्ञे मुनिनाभिहितमुद्भवहरं
घटपुरस्य महिमानमनपायः ।
शिवभववेदचयशास्त्रकवितारस-
यशोधनसतीतनयदेहंदमनर्घ्यम् ॥

निर्गुणनिरञ्जनपरात्परविशुद्ध-
घनवस्तुरतिधायकमतुत्तममनङ्गा।
मौनिवृषभहृदि निशम्य नुतिपुष्प-
निकरैस्तमभिपूज्य मुदमापुरतिभक्त्या ॥ ६२ ॥

Colophon:

इति श्रीशिवानन्दकृतौ देवावतरणे महाकाव्ये नवमः सर्गः ॥

श्रीविशालाक्षीसमेतविश्वनाथाय सन्मङ्गलम् ॥

ब्रह्मैवेदं जगत्सर्वं ब्रह्मणोऽन्यन्न किञ्चन ।
ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका ॥

शिवः सर्वं ब्रह्मैव सत्यम् ॥

Subject: Devāvataraṇa. 1-9 sargas.

Remarks:—The Ms. is in good condition.

The work deals with the Mythological stories relating to Tirukkaḍayūr in the Tanjore District.

॥ नक्षत्रमालिका ॥

3800. NAKṢATRAMĀLIKĀ.

Burnell's Catalogue No. 4866. Page 158. Right column.

Substance—Paper. Size—8×4 inches. Sheets—7 (3-9). Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—55. Author—?. Incomplete; wants beginning.

Beginning:

....

....

......वने वने मृगशिरांस्यालोकयन्राघवः
सोऽहल्यां परिपूय पादरजसा प्रापद्विदेहांस्ततः ॥ ६ ॥

भङ्क्त्वा शैवशरासनं भुजबलाच्चूर्णं मुनेराज्ञया
सीतोद्वाहमहोत्सवे समनुभूयाद्राक्षतारोपणम् ।
वीर्योत्सारितनैकभूपतिकुलं रामं पथि प्राप्य तं
निर्वीर्यं प्रविधाय कौतुकवतीं रामो ययौ स्वां पुरीम् ॥ ७ ॥

यत्पुत्राप्रणयार्चितं रघुवरो राज्यं परित्यज्य तत्
कैकेय्याः प्रियकारणाद्वनमगाद्भार्यानुजाभ्यां सह ।
श्रुत्वैतज्जननीं विनिन्द्य भरतेनैवानुनीतो भृशं
हन्तैच्छैन्न पुनर्गृहं न्यदिशदप्यस्मै निजे पादुके ॥ ८ ॥

End:

नन्दिग्रामगतस्ततोऽनु भरतो रामागमं श्रावितः
सक्षिप्रोष्ठपदाभिराममनिलापत्येन हर्षप्रदम् ।
प्रत्युद्गम्य सहानुजस्तमभिवाद्यालिङ्गितस्तेन च
क्ष्माकन्यामवलम्ब्य(नम्य) लक्ष्मणनुतो रामं पुरीं प्रापयत् ॥२७॥

स्नातो मङ्गलसांविधाभिरतुले भद्रासने स्थापितो
वैदेह्या सह राघवो मुनिवरैर्हर्षाद्वसिष्ठादिभिः ।
कोटीरादिभिरभ्यषिच्यत तदा तीर्थोदकैः पावकैः
वीरवत्यवनीं च यत्र जगतामानन्द एवाभवत् ॥ २८ ॥

नक्षत्रमालिकारामनोज्ञगुणगुम्भिता
अलङ्कारोज्ज्वला भूयाद्विदुषां कण्ठभूषणम् ॥ २९ ॥

श्रीरामार्पणमस्तु ॥

Colophon: Nil.

Subject: Nakṣatramālikā 6-29 ślokas.

Remarks:—The Ms. is in good condition. This Ms. abruptly begins in the middle of the 6th śloka.

This is a work in 29 verses dealing with the story of the Rāmāyaṇa.

॥ नरकासुरविजयः ॥

3801. NARAKĀSURAVIJAYAḤ.

Burnell's Catalogue No. 10190. Page 159. Left column. Substance—Palm leaf. Size—$11\frac{3}{8} \times 1\frac{1}{4}$ inches. Leaves—33 (2-34) Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—650. Author—Mādhavārya. 1—6 sargas. (Wants beginning and end).

Beginning:

कल्याणेन चरित्रेण कवि(पि)गोत्रं पवित्रयन् ।
आबध्नन्नचलां भक्तिमचलेन्द्रसुतापतौ ॥ २४ ॥

श्रुतिस्मृतिपुराणेतिहासज्यौतिषपारगः ।
सव्याकरणमीमांसान्यायमर्मविदां मतः ॥ २५ ॥

गद्यपद्यमयश्राव्यकाव्यनिर्माणकर्मठः ।
ध्वन्यध्वनिमहाध्वन्यो राद्धान्ती रसवर्त्मनि ॥ २६ ॥

पैशाचभाषापभ्रंशप्राकृतादिप्रबन्धकृत् ।
विरूपाक्षकविस्तत्र पुराणमवदत्तदा ॥ २७ ॥

वर्ण्यमाने प्रपञ्चेन पञ्चमेशे प्रशुर्मुदा ।
अशृणोदतुलं शौरे शौर्यं नरकनिग्रहे ॥ २८ ॥

पराक्रमं मुरारातेराकर्ण्य परमं प्रभुः ।
शश्वदश्लाघत प्रीत्या मन्दान्दोलितकुण्डलः ॥ २९ ॥

तथा कृत्वा कथां श्रुत्वा तं भक्तिभरनिर्भरः ।
प्राहस्म श्रीविरूपाक्षः प्रणयी माधवप्रभुम् ॥ ३० ॥

माधवार्य त्वया धीर माधवे भक्तिशालिना ।
काव्यं कविमुदे भौमेर्विजयाख्यं प्रणीयताम् ॥ ३१ ॥

भवदाननपूर्णेन्दु भवेयं भगवत्कथा ।
कौमुदीव चकोराणां कौतुकायास्तु धीमताम् ॥ ३२ ॥

श्रुत्वेति वचनं तस्य श्रीमाधवविभुः सुधीः ।
तत्प्रीतिमनुरुन्धानस्तथेति प्रत्यपद्यत ॥ ३३ ॥

अकार्षीच्च नवं काव्यमव्याजमधुरोज्वलम् ।
स भौमविजयं नाम सतां कण्ठरसायनम् ॥ ३४ ॥

माधवस्य कृतिः सैषा महनीयपरिष्कृतिः ।
माननीयगुणा भाति मानिनीयरसोत्तरा ॥ ३५ ॥

वन्दे वाग्दैवतं धाम मोहान्धतमसापहम् ।
इन्धे यस्य परिस्पन्दो विभिन्दन्नञ्जसा जवात् ॥ ३६ ॥

वन्दे दन्तावलमुखं धाम वन्द्यं सुरासुरैः ।
समीहितार्थप्रत्यूहव्यपोहविहितोद्यमम् ॥ ३७ ॥

वन्दे तं देवकीसूनुं वल्लवीजनवल्लभम् ।
मुदं बृन्दावने धत्ते मुनिबृन्दावनेऽपि यः ॥ ३८ ॥

कुशलानि विधेयान्नः कुहनाशैशवं हरेः ।
मायाशक्तिसमुल्लासनिकासिपदपल्लवम् ॥ ३९ ॥

निर्निद्रयन्तु नः प्रीतिं नरकेसरिणो नखाः ।
हिरण्यान्तःपुरवधूहासस्तबकहारिणः ॥ ४० ॥

श्रियैतदनिदंपूर्वं शिवयोरैक्यमस्तु वः ।
सतां यत्परमां प्रीतिं सूते वागर्थतागतम् ॥ ४१ ॥

सारस्वतं तटं सेव्यं सर्वतोमुखमेधते ।
विदग्धकविसंवेद्यगूढभावमनोहरम् ॥ ४२ ॥

प्रशास्महे नमोवाकं प्राचेतसमहर्षये ।
प्रथमं पप्रथे यत्र तीर्थे सारस्वतामृतम् ॥ ४३ ॥

आप्तगीतामृतस्फूर्तिरनुज्झतभारतान्वया ।
दीव्यति व्यासवाग्गङ्गा देवव्रतगुणोन्मुखी ॥ ४४ ॥

विपश्चितां वृषाणस्ते जयन्ति मुनयस्त्रयः ।
शब्दविद्योपदेशेन कवयो यैः कृतार्थिताः ॥ ४५ ॥

जगादानन्दजननीजगत्यव्याजकोमला ।
कविता कालिदासस्य कालेवाद्य कलानिधेः ॥ ४६ ॥

कथं कविचकोराणामर्पितामृतपारणाम् ।
स्तुमः क्षेमेन्द्रचन्द्रस्य कविताकौमुदीमिमाम् ॥ ४७ ॥

वक्रिमाणमनुज्झन्तो बाणस्य फणितिक्रमाः ।
कस्य न प्रीतये हृद्याः कान्तानाञ्च दृगञ्चलाः ॥ ४८ ॥

श्रीहर्षस्य कवेर्वाचः शीतलामृतसोदराः ।
मज्जयन्ति रसोदन्वत्यपारे रसिकं जनम् ॥ ४९ ॥

मधुव्रत इव श्लाघे मधुनिष्यन्दनिर्भराम् ।
भारवेः सुरभिं सूक्तिं माकन्दस्येव सुन्दरीम् ॥ ५० ॥

अमृतं पातुमभ्यग्रं द्रष्टुमिन्दुकलामिव ।

श्रोतुश्च सरसं काव्यं कस्य नोत्कण्ठते मनः ॥ ५१ ॥

मानयन्तु कवीन् भूपा तेऽपि तन्वन्तु तद्यशः ।

एवमन्योन्यसारस्यादेधन्तामुभयेऽपि ते ॥ ५२ ॥

अस्ति द्वारवतीनाम प्रशस्तविभवा पुरी ।

मध्ये महाम्बुराशेर्या निर्मिता नरकारिणा ॥ ५३ ॥

End:

तरङ्गमालातनयान्निजाम्बां

निश्चित्य कश्चिन्निकटे भवन्ति ।

मुक्तामणीन् मुञ्चति शुक्तिनेनै(?)

रानन्दबाष्पाम्बुकणायमानान् ॥ ५१ ॥

Colophon: (Leaf No. 30.)

कृतौ श्रीमाधवेन्द्रस्य काव्ये भौमजयाह्वये ।

निसर्गेणाञ्चितः सर्गः पञ्चमोऽयं समापितः ॥

Leaf No. 7

इति काश्यपकुलतिलकस्य माधवामात्यस्य कृतौ

नरकासुरविजये प्रथमः सर्गः ॥

Subject: Narakāsuravijaya. 1-6 sargas.

Remarks:—The Ms. is in good condition. This Ms. abruptly ends with the Fifty-first śloka of the 6th sarga.

This work deals with the killing of Narakāsura on the day of the Dīpāvalī by Lord Viṣṇu.

॥ नळोदयकाव्यम् ॥

3802. NAḶODAYAKĀVYAM.

Burnell's Catalogue No. 4747. Page 159. Left column.
Substance—Paper. Size—$7\frac{1}{3} \times 4\frac{3}{8}$ inches. Sheets—12.
Lines—11 or 12 to a Page. Script—Devanāgarī. No. of
Granthas—300. Author—Kālidāsa. Complete.

Beginning:

श्रीगणेशाय नमः ॥

हृदयसदायादवतः
पापाटव्यादुरासदायादवतः ।
अरिसमुदायाद्वतः
त्रिजगन्मागाः स्मरेणदायादवतः ॥ १ ॥

योऽजनि नागोपीतश्चचार यो वल्लवाङ्गनागोपीतः ।
भूर्ये नागोपीतः कंसाद्यो द्वेषमेव नागोपीतः ॥ २ ॥

यदरिषु सन्नामानस्थितयो यन्नुन्नमुदलसन्नामानः ।
यत्र ससन्नामानस्युर्भवभाजश्च पठितसन्नामानः ॥ ३ ॥

अरिसंहतिरस्यवने-
घुशुचां पदमापदमापदमापदमा ।
सुखदञ्च जनाय यथै-
वहरिं यतमायतमायतमायतमा ॥ ४५ ॥

End:

पुनश्च नैषधेन पुर्य-
तायतायतायतायता ।

सदायमुल्लसन्महा
महामहामहास्तसम्पदम् ॥ ४६ ॥

Colophon:

इति श्रीनलोदयाख्ये काव्ये कालिदासकृते चेतुर्थोल्लासः ।
नलोदयाख्यं काव्यं समाप्तम ॥

Subject: Naḷodayakāvyam. 1-4 Ullāsas.

Remarks:—The Ms. is in good condition. This is one of those works that are usually attributed to Kālidāsa. There is very little of poetry in it. It may therefore be presumed that this Kālidāsa is different from the author of the Raghuvamśa, Śākuntala etc.

The work deals with the story of Nala and Damayantī.

॥ नळोदयकाव्यम् ॥

3803. NAḶODAYAKĀVYAM.

Burnell's Catalogue No. 12290. Page 159. Left column. Substance Paper. Size—14×6 inches. Sheets—10. Lines—8 to 10 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Kālidāsa. Complete.

Beginning, end, colophon and subject—Same as No. 3802.

Remarks:—The Ms. is in very good condition.

॥ नळोदयकाव्यम् ॥

3804. NAḶODAYAKĀVYAM.

Burnell's Catalogue No. 10110. Page 159. Left column.

Substance—Palm leaf. Size—$17\frac{3}{8} \times 1\frac{1}{2}$ inches. Leaves—14. Lines—6 to 8 to a Page. Script—Grantha. No. of Granthas—300. Author—Kālidāsa. Complete.

Begininng and subject—Same as No. 3803.

End:

नलेन पुर्यतायतायतायताचिराय च ।

सदायमुन्महामहामहामहास्तसंपदम् ॥ ४७ ॥

Colophon:

इति नलोदयमूलम् । चतुर्थाश्वासः ॥

शुभमस्तु । गुरुभ्यो नमः । ஆக ௩௱ கிரந்தம் (300) ॥

Remarks:—The Ms. is in fairly good condition.

॥ नळोदयकाव्यम् ॥

3805. NAḶODAYAKĀVYAM.

Not noticed by Burnell Ms. No. 15324 c.

Substance—Palm leaf. Size—$13\frac{1}{2} \times 9\frac{9}{10}$ inches. Leaves—20 (121-141, 138th missing). Lines—4 or 5 to a Page. Script—Grantha. No. of Granthas—250. Author—Kālidāsa. Incomplete.

Beginning:

....

.... ।

(वैदर्भीमान्या) या

त्रिजगति कन्या बभूव भीमान्नृपात् ॥ १६ ॥

End—Same as No. 3804.

Colophon:

इति नळोदये चतुर्थ आश्वासः ॥

Subject: Naḷodayakāvyam. 1-4 Āśvāsas.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly begins in the 16th śloka of 1st Āśvāsa.

॥ नळोदयकाव्यम् ॥

3806. NAḶODAYAKĀVYAM.

Not noticed by Burnell, No. 10116 (a). Page 169. Left column. Substance—Palm leaf. Size—$15\frac{4}{8} \times 1\frac{1}{10}$ inches. Leaves—26 (1-26). Lines—5 to a Page. Script—Grantha. No. of Granthas—250. Author—Kālidāsa. Incomplete. 1-3 Āśvāsas only.

Beginning—Same as No. 3802.

End:

अयेनयापदापदापदापदापरिश्रमम् ।

अभूत्सजीवनात्वनावनावनात्वनाथवत् ॥ ५४ ॥

Colophon:

इति नळोदये तृतीय आश्वासः ॥

Subject: Naḷodāyakāvyam. 1-3 Āśvāsas. Complete.

Remarks:—The Ms. is old and in a decaying condition.

The other work contained herein is the Naḷodayavyākhyā—by Kṛṣṇa.

॥ नळोदयकाव्यम् ॥

3807. NAḶODAYAKĀVYAM.

Burnell's Catalogue No. 4750. Page 159. Left column.

Substance—Paper. Size—9 × 4¼ inches. Sheets—10. Lines—7 to 9 to a Page. Script—Devanāgarī. No. of Granthas—170. Author—Kālidāsa. Incomplete. 1, 2, Ullāsas only.

Beginning—Same as No. 3802.

End:

स्वयंवरादनन्तरं महीमहीमहीनधीः ।
ररक्ष नैषधस्तदा रराज राजराजराः ॥ ६४ ॥

Colophon:

इति श्रीकालिदासकृते नळोदयकाव्ये द्वितीयोल्लासः ॥ २ ॥)

Subject: Naḷodayakāvyam. 1, 2, Ullāsa only.

Remarks:—The Ms. is in fairly good condition.

॥ नळोदयकाव्यम् ॥

3808. NAḶODAYAKĀVYAM.

Burnell's Catalogue No. 10113. Page 159. Left column. Substance—Palm leaf Size—$10\frac{7}{10} \times \frac{9}{10}$ inches. Leaves —20 (1-18+2). Lines—4 or 5 to a Page. Script—Grantha. No. of Granthas—200. Author—Kāildāsa. Incomplete. 1, 2, Āśvāsas only.

Beginning—Same as No. 3802.

End—Same as No. 3807.

Colophon:

इति नळोदये द्वितीयाश्वासः ॥
हरिः ॐ । शुभमस्तु ॥

Remarks:—The Ms. is in good condition. Two leaves after the 18th leaf contain the Anukramaṇikā of the ślokas of the above two Āśvāsas. After this, two other leaves contain the Anukramaṇikā of the Meghadūta, Incomplete.

॥ नलोदयकाव्यम् ॥

3809. NALODAYAKĀVYAM.

Burnell's Catalogue No. 10112. Page 159. Left column.
Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{3}{8}$ inches. Leaves—9. Lines—5 to a Page. Script—Telugu. No. of Granthas—115. Author—Kālidāsa. Incomplete.

Beginning—Same as No. 3802.

End:

छदितरवितानेन
प्रापि च कालेन सस्वरवितानेन ।
जितरुचिरवितानेन
व्योम्ना च स्फुरितमुडाभिरावितानेन ॥ ५० ॥

Colophon: (Leaf No. 5)

इति नळोदये प्रथमाश्वासः ॥

Subject: Naḷodayakāvyam 1, 2, Āśvāsas; 1st complete, 2nd 1-50 ślokas only.

Remarks:—The Ms. is in fairly good condition.

॥ नलोदयकाव्यम् ॥

3810. NALODAYAKĀVYAM.

Burnell's Catalogue No. 4751. Page 159. Left column.

Substance—Paper. Size—9×4⅜ inches. Sheets—5. Lines—6 to 8 to a Page. Script—Devanāgarī. No. of Granthas—72. Author—Kālidāsa. Incomplete. 1st Āśvāsa only.

Beginning—Same as No. 3802.

End:

शशिना समहा समहानग-
रेजनतासमहासमहास्तमुदम् ।
अतिभासुरयासुरयाव्यह-
रव्यतनोत्सुरयासुरयागमपि ॥ ५४ ॥

Colophon: Nil.

Subject: Nalodayakāvyam. 1st Āśvāsa only.

Remarks:—The Ms. is in a good condition.

॥ नलोदयकाव्यम् ॥

3811. NAḶODAYAKĀVYAM.

Not noticed by Burnell. 15531.

Substance—Paper. Size—14×6 inches. Sheets—5 (4, 5, 8, 9, 10). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Ravideva. Incomplete.

Beginning:

.... ।
...(प्रा)श्याध्वगपिशितचारुचपलाशस्य ॥ ८ ॥
इह ललना शोकालि-
प्रदेन येनात्ममहविना शोकालि ।
कामेनाशोकालि-
स्वनहुंकृतिभिः सदिक्ष्वनाशोकालि ॥ ९ ॥

End—Same as No. 3802.

Colophon :

इति श्रीकविचक्रचूडामणि भट्टनारायणसुतरविदेवविरचिते नळोदयनाम्नि महाकाव्ये नळराज्यप्राप्तिर्नाम चतुर्थ उल्लासः ॥ ग्रन्थसंख्या ३१० ॥

Subject: Naḷodayakāvyam. 2nd and 4th Ullāsas.

Remarks:—The Ms. is in a very decaying condition. The Ms. abruptly begins in 8th verse of 2nd Ullāsa and several ślokas are missing in the middle.

The author says that he is the son of Bhaṭṭa Nārāyaṇa. It is not known whether this Bhaṭṭanārayaṇa is the same as the author of the Veṇisaṃhāra, or any other Bhaṭṭanārayaṇa. The work under notice is a rare work. The Ms. is in a fragmentary condition and is withering away. The beginning in this Ms. is the same as that attributed to Kālidāsa under No. 3802 but the colophon is different. Several scholars have been doubting Kālidāsa's authorship of the Nalodayakāvya and this colophon strengthens the suspicion. There is very little of poetry in this work.

॥ नलोदयकाव्यपदम् ॥

3812. NAḶODAYAKĀVYAPADAM.

Burnell's Catalogue No. 10118. Page 159. Left column.

Substance—Palm leaf. Size—$15\frac{1}{4} \times 1\frac{1}{3}$ inches. Leaves—28 (126—153). Lines—7 or 8 to a page. Script—Grantha. No. of Granthas—560. Author—?. Complete.

Beginning:

हृदय सदा यादवतः

पापाटव्या दुरासद्याया द्ववतः ।

अरिसमुदायादवतः

त्रिजगन्मागाः स्मरेण दायादवतः ॥ १ ॥

हृदय । सदा । यदावतः । पापाटव्याः । दुरासद्या- याः । द्ववतः । अरिसमुदायात् । अवतः । त्रिजगत् । मागाः । स्मरेण । दायादवतः ॥ १ ।

End:

नलेन पुर्यतायतायता यता पुरेव च ।

तदायमुन्महा महामहामहास्त संपदम् ॥ ४७ ॥

नलेन । पुरि । अतायत । आयता । यता । पुरा । इव । च । तदा । अयम् । उन्महाः । महामहाम् । अहास्त । सम्पदम् ॥ ४७ ॥

Colophon:

इति नलोदये चतुर्थाश्वासस्समाप्तः ॥

अमृतघटेश्वराय नमः ।

यश्शिवो नामरूपाभ्यां या देवी सर्वमङ्गला ।

तयोस्संस्मरणात्पुंसां सर्वतो जयमङ्गलम् ॥

उमामहेश्वराभ्यां नमः ॥

Subject: Naḷodayakāvyapadam with the text 1-4 Aśvāsas.

Remarks:—The Ms. is in fairly good condition.

This work is the same as that of Kālidāsa, though the name does not occur anywhere in the Ms.

From the mention of Amṛtaghaṭeśvara we may infer that

the Ms. should have been copied at Tirukkaḍayūr in the Māyavaram Taluk of the Tanjore District as the name of the deity there is Amṛtaghaṭeśvara.

॥ नलोदयकाव्यपदम् ॥

3813. NAḶODAYAKĀVYAPADAM.

Burnell's Catalogue No. 10111. Page 159. Left column. Substance—Palm leaf. Size—$15\frac{7}{8} \times 1\frac{3}{8}$ inches. Leaves—17. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—350. Author—? Complete.

Beginning—Same as No. 3812.

End:

नळेन । पुरि । अतायत । आयतायता । चिराय । च ।
सदा । अयम् । उन्महाः । महामहाम् । अहास्त ।
संपदम् ॥ ४७ ॥

Colophon:

इति कालिदासस्य कृतौ नलोदये नलस्य कलिमोचनो नाम
चतुर्थ आश्वासः ॥

हरिः ॐ । स्मरहराय नमः ।

बिन्दुदुर्लिपि + समीक्ष्य सज्जनाः ॥

असमद्गुरुभ्यो नमः ॥

Subject: Naḷodayakāvyapadam 1-4 Āśvāsas. Pada only.

Remarks:—The Ms. is in good condition.

॥ नलोदयकाव्यपदम् ॥

3814. NAḶODAYAKĀVYAPADAM.

P. A. collection No. 329. Substance—Paper. Size—11 × 3¾ inches. Sheets—6. Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—85. Author—? Complete. 1st Āśvāsa only.

Beginning:

श्रीगणेशाय नमः ।

हृदय । सदा । यादवतः ॥

Same as No. 3812.

End:

शशिना । समहासमहानगरे । जनता । समहा । समहास्त । मुदम् । अपि । भासुरया । सुरया । व्यहरत् । व्यतनोत् । सुरया । सुरयागम् । अपि ॥ ५३ ॥

Colophon:

इति नळोदये प्रथमाश्वासः ॥

श्रीदत्तात्रेयाय नमः ॥

Subject: Naḷodayakāvyapadam 1st Āśvāsa only.

Remarks:—The Ms. is in good condition.

॥ नलोदयकाव्यपदम् ॥

3815. NAḶODAYAKĀVYAPADAM.

P. A. collection. No. 331. Substance—Paper. Size—10⅞ × 3¼ inches. Sheets—6. Lines—7 to a Page. Script—Devanāgari. No. of Granthas 75. Author—? Complete. 3rd Āśvāsa only.

Beginning:

श्रीगणेशाय नमः ।

अथ । सुरवृषभाः । स्वः । अतः । प्रेक्ष्य । कलिम् । प्रस्थिताः । महात् । भास्वरतः । यः । कृतिषु । शुभासु । अरतः । पप्रच्छुः । तद्गतिम् । घननिभाः । स्वरतः ॥ १ ॥

End:

अयेन । या । आपत् । आपदा । आप । पदा । परिभ्रमम् । अभूत् । सजीवनावना । वनावनौ । अनाथ-वत् ॥ ५४ ॥

Colophon: Nil.

Subject: Naḷodayapadam 3rd Āśvāsa only.

Remarks:—The Ms. is in good condition.

॥ नलोदयव्याख्या ॥

3816. NAḶODAYAVYĀKHYĀ.

Burnell's Catalogue No. 10115. Page 159. Left column. Substance—Palm leaf. Size—15¼×1⅜ inches. Leaves—75 (14th is repeated, 18th is missing). Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—1300. Author—Kṛṣṇa. Complete with the text.

Beginning:

ॐ शुभमस्तु ॥

हृदयसदायादवतः + दायादवतः ॥ १ ॥

मूर्ध्नाभिवन्द्य पवनात्मजबालदण्ड-

क्षिप्तानलक्षपितराक्षसराजगेहम् ।

दुर्बोधभेदयमकस्य नलोदयस्य
व्याख्यां यथाबलमविस्तरतोऽभिधास्ये ॥ १ ॥

हृदयेत्यादि ॥ एवम्भूताद्यादवात् सदा मा गाः । नित्यं यादवमेव चिन्तयेदित्यर्थः । दुरासदायाः दुष्प्रापायाः षापाटव्याः दवतः दवाग्निभूताद्दुष्प्रापपापकान्तारस्य विनाशकात् । दवत इति पञ्चम्यास्तसिल् । अरिसमुदायात् त्रिजगदवतः कंसशिशुपालादिशत्रुसमूहात्त्रैलोक्यं रक्षतः । सरेण दायादवतः दायादः पुत्रसापिण्डपुत्रवतः प्रद्युम्नस्य जनकादित्यर्थः । एवम्भूताद्यादवेन्द्रात् हे हृदय सदा मा गाः, नित्यं तस्मिन्नेव वर्तस्व तमेव चिन्तयेत्यर्थः । ननु काव्यारम्भे आशीर्नमस्क्रियावस्तुनिर्देशेन वा भवितव्यम् । इह न तथा कृतमिति, उच्यते । अयं कविः वाक्यारम्भे सदा वासुदेवस्मृतिं कुर्वन् हृदयानुशासनद्वारेण वा वासुदेवस्मृतिं करोति । देवतानमस्कारः तत्स्मरणमेवेति निरवद्यम् ॥ १ ॥

End:

पुरेव नैषधेन + सम्पदम् ॥ ४७ ॥

पुरेव पूर्वमिव । नैषधेन निषधराजेन । पुरि नगर्याम् । आतायत विस्तारित । आय...गः तस्य भावः आयता । आयता दीर्घा । आयतया आयता आयतायता । सदा सर्वदा । अयं नळः । उन्महाः उत्कृष्टतेजाः । महामहा महः कल्याणम् । महामहो यस्यां तां अहास्त प्राप्तवान् । सम्पदं अभ्युदयम् ॥

नैषधेन स्वपुरी आयतायता सम्पत्पुरेवायत। अयमुन्महा नळः महामहां संपदं सदा अहास्त नळेन यथा पूर्वं नगर्यां धनराशिरितसततो विस्तारितः। तेजस्वी चायं नळः कल्याणं....पदं जगाम चेति ॥ ४७ ॥

Colophon:

इति श्रीकृष्णीये नळोदये समूले विवरणे चतुर्थोच्छ्वासः ॥

हरिः ॐ

बिन्दुदुर्लिपि विसर्गवीथिका

शृङ्गपङ्क्तिपदभेददूषणम्।

हस्तवेगजमबुद्धिपूर्वकं

क्षन्तुमर्हथ समीक्ष्य सज्जनाः ॥

Subject: Naḷodayavyākhyā 1-4 Ucchvāsas, with the text.

Remarks:—The Ms. is in fairly good condition. This work is again by Kālidāsa. Only the commentary is by Kṛṣṇa.

॥ नळोदयव्याख्या ॥

3817. NAḶODAYAVYĀKHYĀ.

P. A. Collection No. 330. Substance—Paper. Size—11×3¾ inches. Sheets—89. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—1400. Author—Kṛṣṇa?. Complete with the text, 1-4 Āśvāsas.

Beginning:

श्रीगणेशाय नमः ॥

हे हृदय दुरासदायाः दुष्प्रापायाः ❀ ❀

तत्स्मरणमेव देवतानमस्कारं चेति निरवद्यम् ॥

Same as No. 3816.

End:

नळेन । पुरी । अतायत । + अहास्त । सम्पदम् ॥ ४७॥

आयतायत अत्यन्तमायता । अथवा आयतो दीर्घः आयो अर्थागमो यस्यास्सा आयतायता तस्य भावः आयतायता यस्याः सा समृद्धार्थागमपुरी नळेन आयत। "तनु विस्तारे विस्तारिता यथापूर्वं नळेन विस्तृतेत्यर्थः । उन्महाः उद्भूतमहः तेजो यस्य सः । अयं नळः महामहाः महांश्चामहश्च महामहः सोऽस्यास्तीति, संपदं अहास्त प्राप्तवान् । अयमर्थः— सा पुरी पूर्वमिव नळेन समृद्धविभवा भूत्वा अयं नळश्च तेजिष्ठो भूत्वा महासंपदं प्राप्तवान् ॥ ४७ ॥

Colophon:

इति नळोदयव्याख्याने चतुर्थाश्वासः ॥

श्रीरामचन्द्रार्पणमस्तु ॥

Subject: Naḷodayavyākhyā 1-4 Āśvāsas complete with the text.

Remarks:—The Ms. is in good condition.

॥ नलोदयव्याख्या ॥

3818. NALODAYAVYĀKHYĀ.

Burnell's Catalogue No. 10114. Page 159. Left column.

Substance—Palm leaf. Size—13×1 inches. Leaves—132. Lines—5 or 6 to a Page. Script—Grantha. No. of Gran-

thas—1700. Author—Kṛṣṇa. Incomplete.

Beginning:

शुभमस्तु । गुरुभ्यो नमः । शुक्लब्रह्मणे नमः ॥

हृदयसदायादवतः + स्मरेण दायादवतः ॥ १ ॥

हृदय । सदा । * * स्मरेण । दायादवतः ॥

हे हृदय सदा यादवतः यदुवंशसमुद्भूतात् । पापाटव्याः पापमेव अटवी तस्याः । दुरासदायाः दुष्प्रधर्षायाः । दवतः वनवह्नेः । अरिसमुदायात् । शत्रुसमूहात् । अवतः रक्षतः । त्रिजगत् त्रिलोकं । मागाः मा गच्छ । मा गा इति "न माङ्योगे" इत्य(डा)गमो भवति । स्मरेण मन्मथेन दायादवतः पुत्रवतः ॥

हे हृदय दुरासदायाः पापाटव्याः अवतो अरिसमुदायाज्जगदवतो स्मरेण दायादवतो यादवतः सदा मागा इत्यन्वयः ॥

समस्तपापनाशकात् स्मरेण पुत्रवतो वासुदेवात् हे हृदय दुरासदाया कदापि मा गच्छेति समुदायार्थः ॥ १ ॥

End:

अथ तुङ्गोपायस्य + जुगोपायस्य ॥ १ ॥

अथ । तुङ्गोपायस्य । श्रवणेन । नळस्य । सानुगः । अपायस्य । वशगा । गोपाः । यस्य । स्वमनः । भीमः । चिरम् । जुगोप । आयस्य ॥

अथ यस्य वशगा गोपा तुङ्गोपायस्य तस्य नळस्य... ...... णेन सानुगः भीमः आयस्य स्वमनश्च.........

तुङ्गोपायस्य उन्नतसामाद्युपायस्य तस्य नळस्य अपा-
यस्य उपद्रवस्य............... ॥

Colophon: (Leaf No. 41)

इति नळोदये कृष्णीये प्रथमोच्छ्वासः ॥

(Leaf No. 85)

इति कालिदासस्य कृतौ सविवरणे नळोदये द्वितीय आश्वासः ॥

(Leaf No. 132)

इति कालिदासस्य कृतौ सविवरणे नळोदये........... ॥

Subject: Naḷodayavyākhyā 1-3 Āśvāsas. 4th only begins.

Remarks:—The Ms. is worm-eaten. This Ms. abruptly breaks off in the 1st śloka of 4th Āśvāsa.

॥ नळोदयव्याख्या ॥

3819. NAḶODAYAVYĀKHYĀ.

Burnell's Catalogue No. 10117. Page 159. Left column.
Substance—Palm leaf. Size—$15\frac{1}{2} \times 1\frac{1}{8}$ inches. Leaves—70 (47th is missing). Lines-5 or 6 to a Page. Script—Grantha. No. of Granthas—900. Author—Kṛṣṇa. Complete. 1-3 Āśvāsas only.

Beginning:

हृदय । सदा । यादवतः । पापाटव्याः । दुरा-
सदायाः । दवतः । अरिसमुदायात् । अवतः । त्रि-
जगत् । मा । गाः । स्मरेण । दायादवतः ॥ १ ॥
इति पदच्छेदः ॥

हृदयेत्यादि ॥ हे हृदय एवम्भूताद्यादवादन्यत्र सदा मागाः ॥

End:

अयेन । यापत् ।... । आपदा । पदा । (अयेन । या । पदा । आपत् । आपदा । अपदा) परिभ्रमम् । अभूत् । सजीवना वना । वनावनौ । अनाथवत् ॥

अयेन दैवेन अपदा स्थानहीना आपदा विपदा हे... । वनावनौ कान्तारभूमौ पदा पदेन परिभ्रमम् आपत् । पादचारेण परिभ्रमणं प्राप्ता सा इदानीमनाथवत् नाथहीनेव सजीवनावनाभूत् जीवनं प्राणरक्षणं तेन सहिता सजीवनावनाभूत् ॥ ५४ ॥

Colophon:

इति नळोदये तृतीयाश्वासः ॥

हरिः ॐ । शुभमस्तु ॥

Subject: Naḷodayavyākhyā, 1-3 Āśvāsas.

Remarks:—The Ms. is in fairly good condition.

The text is not given in this manuscript but it is substituted by the padapāṭha of the text.

॥ नळोदयव्याख्या ॥

3820. NAḶODAYAVYĀKHYĀ.

Burnell's Catalogue No. 10116 (b). Page 159. Left column.

Substance—Palm leaf. Size—$15\frac{4}{8} \times 1\frac{3}{10}$ inches. Leaves—29 (1-3 and 27-52). Lines—5 or 6 to a Page. Script—Gran-

tha. No. of Granthas—420. Author—Kṛṣṇa. Incomplete. 4th Āśvāsa only complete.

Beginning:

अथ तुङ्गोपायस्य
श्रवणेन नळस्य सानुगोपायस्य ।
वशगा गोपायस्य
स्वमनोभीमाश्चिरं जुगोपायस्य ॥ १ ॥

अथ । तुङ्गोपायस्य । श्रवणेन । नळस्य । सानुग । उपायस्य । वशगाः । गोपाः । यस्य । स्वमनः । भीमः । चिरम् । जुगोप । आयस्य । इति पदच्छेदः ॥

अथ तुङ्गेति । अथानन्तरं यस्य नळस्य गोपाः भूपाः वशगाः वशङ्गताः । तुङ्गोपायस्य उन्नतसामाद्युपायस्य नलस्य अपायस्य श्रवणेन अनर्थस्याकर्णनेन सानुगः अनुचरसहितः भीमः विदर्भः आयस्य आयासं कृत्वा स्वमनः आत्मचित्तम् चिरं जुगोप रक्षितवान् । नळस्यानर्थं श्रुत्वा मन्त्रिभिः सहितः भीमः महाराजस्य नळस्य एवं अपायः अस्य कथमभूत्, अतःपरं किं भविष्यति, कथं यथापूर्वं संभाव्यते इति शोकेन बहुधावलीनमपि मनः महता यत्नेन रक्षितवान् ॥ १ ॥

End:

पुरेवेति ॥ नैषधेन नळेन । पुरि नगर्याम् । पुरेव पूर्वमिव यथा । आयतायता आयः स्वभाग्यः तस्य भावः आयता आयता महती दीर्घार्थभावः । अतायता विस्तारिता । उन्महाः उत्कृष्टतेजाः । अयं नळः महामहा महान् महः

कल्याणं यस्याः तां सम्पदं समृद्धिं सदा सर्वदा अहास्त प्राप्तवान् । नळेन पूर्वं धनराशिः इतस्ततः विस्तारितः । तेजस्वी चायं नळः कल्याणवतीं सम्पदं जगाम चेति भावः ॥ ४७ ॥

Colophon:

इति नळोदयव्याख्याने कृष्णीये चतुर्थ आश्वासः ॥

Subject: Naḷodayavyākhyā 4th Āśvāsa only Complete.

Remarks:—The Ms. is in fairly good condition. After the colophon is found.

बिन्दुदुर्लिपि + समीक्ष्य सज्जनाः ॥

कार्कोटकस्य नागस्य दमयन्त्या नलस्य च ।

ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥

The other Ms. contained in this is the text of the Naḷodaya.

॥ नलोदयव्याख्या ॥

3821. NAḶODAYAVYĀKHYĀ.

Burnell's Catalogue No. 4748. Page 159. Left column. Substance—Paper. Size—$8\frac{7}{10} \times 3\frac{9}{10}$ inches. Sheets—18. Lines—10 or 11 to a Page.. Script—Devanāgari. No. of Granthas—400. Author—Ādityasūri. Complete 1, 2, Āśvāsas only.

Beginning:

श्रीगणेशाय नमः । श्रीरामाय नमः ।

श्रीमद्दक्षिणामूर्तिर्जयति ॥

हृदयेति ॥ अनेन श्लोकेन कविरिष्टदेवतां नमस्करोति । हे हृदय यादवतः यदुकुलोद्भवात्पुरुषोत्तमात्सदा

मागाः । तत्रैव रमस्वेत्यर्थः । किंविधात् दुरासदायाः पापाटव्याः दवतः दवाग्नेः । पुनः किं स्मरेण दाया-दवतः "दायादौ पुत्रबान्धवौ" इत्यभिधानप्र-सिद्धिः ॥ १ ॥

End:

इतीति । अमलो जनः पापरहितः सुजन इत्यर्थः । सुरजनः ऊचे । किंविधः इत्यनेन प्रकारेण । तदुक्तः तेन कालिना उक्तः । पुनः किंविधः मायाया त्रिकलः वञ्चनाहीनः किमिति मा यायाः मा गच्छेः । या भैमी उमायाः गौर्याः शुभश्री .... ॥

Colophon :

इत्यादित्यसूरिविरचितायां नलोदयदीपिकायां
द्वितीय आश्वासः ॥

Subject : Naḷodayavyākhyā called Dīpikā. 1, 2, Āśvāsas and 1-3 verses in 3rd Āśvāsa.

Remarks:—The Ms. is in good condition. This Ms. abruptly breaks off in the 3rd Śloka of the 3rd Āśvāsa. The title page contains as follows :—

'शरभजीनायकचुंण्डे नलोदयस्य टीका ।
तुलसीनारायणस्य श्रीरामनारोजीवैद्यस्य ॥

This Naḷodaya, on which Ādityasūri has commented happens to be the same as that of Kālidāsa. The commentator, Ādityasūri is a Jaina writer. The commentary is a rare copy.

॥ नळोदयव्याख्या ॥

3822. NAḶODAYAVYĀKHYA.

Not noticed by Burnell. Ms. No. 15532.

Substance—Paper. Size—14 × 6 inches. Sheets—12 (4 and 6-16). Lines—10 to Page. Script—Devanāgarī. No. of Granthas—420. Author—?. Incomplete.

Beginning:

....

.... ।

स्निग्धजनानावेद्य:

प्रयतेऽस्य सुकाव्यविवरत्वं नानावेद्य: ॥ १ ॥

अहं काळिदास: अद्येदानीं अस्य रामस्य राज्ञ: स्वांहोऽब्धौ स्वापराधसमुद्रेषु(सु)काव्यविरचमा(ना)नावे प्रयते प्रयत्नं करोमि । "यती प्रयत्ने" स्वस्य अंह: स्वांह: स्वांहस: अब्धि: स्वांहोऽब्धि: तस्मिन् स्वांहोऽब्धौ । किं कृत्वा स्निग्धजनान् पण्डितजनान् आवेद्य निवेद्य उक्त्वेत्यर्थ: । अस्य कस्य य: खलसेना: दुष्टजनान् नाशयेत् । पुन: अस्य कस्य च परं यस्य भुवि राज्ञो नानावेद्यो अग्निष्टोमादयो यज्ञा: वर्तन्ते । सुष्ठु काव्यं सुकाव्यम् । तस्य विरचना सुकाव्यविरचना सुकाव्यविरचना एव नौ: सुकाव्यरचनानौ: तस्यै सुकाव्यविरचनानावे सुकाव्यकरणनौकायै ॥ १ ॥

End:

सहकारवृते समये

सहकारहरणस्त्रकेनानुसस्मार पदम् ।

सहकारमुपारकान्तः

सहकारमणी पुरः सकलवर्णमयि ॥ १० ॥

सहकारवृते समये सहकारपुष्पफलैरावृते समये व-
सन्ते कारमणी नायिकाकान्तेः भर्तृभिः सह सं(?) इदं पदं
वाक्यं अनुसस्मार अनुस्मा........ ॥

Colophon : (Sheet No. 14.)

इति नलोदयटीकायां अन्वयदीपिकायां प्रथमोल्लासः ॥

Subject: Naḷodayavyākhyā called Anvayadīpikā, 1, 2, Ullāsas.

Rmarks :—The Ms. is in decaying condition. This Ms. abruptly begins in the 9th śloka of the 1st Ullāsa and ends in the 10th śloka of the 2nd Ullāsa.

॥ नळोदयव्याख्या ॥

3823. NAḶODAYAVYĀKHYĀ.

Burnell's Catalogue No. 4746. Page 159. Left column. Substance—Paper. Size—$11\frac{1}{8}\times 6$ inches. Sheets—19. Lines—6 to 9 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—?. Incomplete. (1st Ullāsa only complete.

Beginning:

श्रीगणेशाय नमः ।

कङ्कणफणिराजमणिं

दीपधिया वदनमारुतैरसकृत ।

निर्वापयति कुमारे

सगिरिसुतो जयति सस्मितश्शम्भुः ॥ १ ॥

हृदयेति । हे हृदय हे चित्त सदा सर्वकालं सर्वाव-स्थायां च दुरासदायाः दुस्सहायाः पापानामटव्याः अरण्यस्य दवतो दवाग्नेः "दवदावौ वनानले" इति हैमः । सार्वविभक्तिकस्तसिः । "अटव्यरण्यं विपिनम्" इत्यमरः । तथा अरीणां शत्रूणां समुदायात् त्रिजगत् त्रैलोक्यं अवतः रक्षकात् । अवतेः शतृप्रत्ययः । दायो विभक्तव्यपितृद्रव्यम् । "दायो दाने यौवतकादिधने(?) सोल्लुण्ठभाषणे । विभक्तव्यपितृद्रव्ये" इति हैमः । तमा-दत्ते गृह्णाति । स दायादः स्मरेण प्रद्युम्नेन दायादवतः सुतवतः । "दायादौ सुतसपिण्डौ" इति हैमः । या-दवतः कृष्णात् भागाः मा गच्छ । तत्रैव निरन्तरं वसे-त्यर्थः ॥ १ ॥

End:

शशिनेति ॥ शशिना चन्द्रेण समहा समहाः हास-श्च महश्च हासमहसी समे हासमहसी हास्य तेजसी यस्याः समहासोत्सवा । "महस्तेजस्युत्सवे च" इति हैमः । सुरया शोभनवेगा जनता जनसमूहः नगरे नळपुरे मुदं हर्षं सहास्त सम्यक्प्राप । जिहातेर्लुङ् । अपि च भासुर-दीप्यमानया सुरया व्यहरत् चिक्रीड । अपि च सुरयागं देवयजनं देवार्चनं वा व्यतनोत् अकरोत् । "अपिः सम्भावनाशङ्कागर्हणासु समुच्चये" इति हैमः । तोटक-

वृत्तमेतत् । "इह तोटकबन्धुधिसैः प्रथितम्" इत्युक्तम् ॥ ५४ ॥

Colophon:

इति नलोदयटीकायां प्रथमोल्लासः ॥

Subject: Naḷodayavyākhyā 1st Ullāsa only, with the text.

Remarks:—The Ms. is in excellent condition.

॥ नळोदयव्याख्या ॥

3824. NAḶODAYAVYĀKHYĀ.

Burnell's Catalogue No. 4749. Page 159. Left column. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{7}{10}$ inches Sheets—5. Lines—11 to a Page. Script—Devanāgarī No. of Granthas—120. Author—?. Incomplete.

Beginning:

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः ।
श्रीरघुवीराय नमः । अविघ्नमस्तु ॥

प्रणम्य विघ्नहन्तारं भारतीं च तथा गुरून् ।
नळोदयाख्यकाव्यस्य क्रियतेऽर्थप्रदीपिका ॥ १ ॥

हृदयसदायादवतः + स्मरेण दायादवतः ॥

* * *

अत्राश्वाससमाप्तेर्व्यपेतयमकपदं सर्वत्र । यमकपदाना....हितत्वात् । तदवान्तरभेदोऽपि चतुष्पदामभिनयकभेदो विज्ञेयः । चतुर्भिः कालापकम् ।

हृदय सदा यदुकुलजन्मनो हरेर्मार्गाः न निवर्तेथाः। याद-
वतः इति पञ्चम्यर्थे तसिल्। तमेव विशेषयति। दुरास-
दायाः दुर्गमायाः पापाटव्याः अंहोवनस्य दवतः दाहका-
ग्नेः अरिसमुदायात् वैरिसंघात् त्रिजगत् त्रिलोकीमवतः
रक्षतः। "अव रक्षणे"। स्मरेण दायादवतः "दायादौ
पुत्रबान्धवौ" इति स्मरणात् ॥ १ ॥

End:

महिततमारम्भाभिः + समारम्भाभिः ॥ १७ ॥

महिततमारम्भाभिः। दमयन्ती। सहक्। उमारम्भा-
भिः। दधती। मारम्। भाभिः। ववृधे। सा। उरुद्वये।
.... ॥

Colophon: Nil.

Subject: Nalodayavyākhyā called Arthapradīpikā, with the text and pada. 1st Āśvāsa Incomplete.

Remarks:—The Ms. is in fairly good condition. This Ms. abruptly breaks off in the 17th śloka of the 1st Āśvāsa.

॥ नळोदयः सव्याख्यः ॥

3825. NALODAYAḤ SAVYĀKHYAḤ.

J. L. Collection No. 544. Substance- Paper. Size—13×6½ inches. Sheets —36. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—1280. Author—Nṛsimhāśramin ?. 1-4 Ullāsas only. Incomplete.

Beginning:

श्रीगणाधिपतये नमः ॥

श्रीशिवाय नमः ॥

नलोदयाख्यकाव्यस्य सागरस्यैव नौरिव ।
श्रीकृष्णसूरिणा व्याख्या नितरां क्रियते मया ॥ १ ॥

वक्ष्ये पदार्थं प्रथमं पदानामन्वयं ततः ।
पश्चादन्विष्य वाक्यार्थमित्यत्र क्रियतां क्रमः ॥ २ ॥

प्रथमं तावत्काव्यमारब्धुकामः कवीनां कविः श्रीकालिदासस्तस्य काव्यस्यानिघ्नपरिसमाप्त्यर्थं स्मृतिमात्रेण सकलदुरितहारिणि भगवति भक्तवत्सले वासुदेवे हृदयं प्रति परमवधारणमाह—

हृदयसदायादवतः + स्मरेणदायादवतः ॥ १५ ॥

हे हृदय सदा यादवतः यदुवंशसम्भूताद्भगवतो वासुदेवात्पापमेवाटवी वनं तस्याः पापाटव्याः दुरासदायाः दुष्प्रधर्षायाः दवः घनवह्निः तस्मादवतः अरिसमुदायात् शत्रुसमूहादवतः रक्षतः त्रिजगत्त्रिलोकं मागाः मागच्छ । मागा इति 'नमाङ्‌ योगे' इत्यडागमो न भवति । स्मरेण मन्मथेन दायादवतः दायादः पुत्रः तद्वतः । हे हृदय दुरासदायाः पापाटव्या दवतः अरिसमुदायात् त्रिजगदवतः स्मरेण दायादवतः यादवतः सदा मागा इत्यन्वयः । समस्तपापनाशकात् स्मरेण पुत्रवतः वासुदेवात् हे हृदय कदापि मा गच्छ । सर्वदा तद्गतं भवेति समुदायार्थः ॥ १ ॥

End:

तं स्वनयानं + अनन्तरंसा ॥ ३० ॥

तस्मिति ॥ असौ नैषधप्रिया दमयन्ती मुदा हर्षेण अन्तः मध्मे अभ्युदयान् श्रेयांसि सुखानि अतित प्रापेत्यर्थः। किमुवाचेत्याह ॥ हे आश्रितवत्सलत्वं कदापि अनाशः न स्याः । आशारहितो न स्याः । निराशो मा भव ॥ ४२ ॥

Colophon:

इति श्रीनृसिंहाश्रमविरचितायां कालिदासकृतनलोदयव्याख्यायां तृतीयोल्लासः ।

विजयसंवत्सरे निजभाद्रपदशुक्लतृतियायां सोमवारेऽयमुल्लासः सम्पूर्णः ॥

श्रीसाम्बसदाशिवार्पणमस्तु ॥

Subject: Naḷodayavyākhyā. 1-4 Ullāsas.

Remarks:—The Ms. is in good condition.

The Ullāsas are paged separately. In the last Ullāsa there is a lacunae between the 30th stanza and the 43rd stanza. Evidently a sheet is lost.

In the opening verses we find the name of Kṛṣṇasūri as the author of the commentary. But the colophon in the third ullāsa attributes the authorship of the commentary to one Nṛsihmāśrama.

॥ पतञ्जलिचरितम् ॥

3826. PATAÑJALICARITAM.

Burnell's Catalogue No. 4748. Page 159. Right column.

Substance—Paper. Size—$10\frac{1}{8} \times 4\frac{7}{8}$ inches. Sheets—30. Lines—10 to a Page. Script—Devanāgarī. No.

of Granthas—800. Author—Rāmabadradīkṣita. Complete.

Beginning:

श्रीगुरुभ्यो नमः ।

रामचन्द्रमखिनो भुवि वाचां
राजशेखरकवेरपि वाचाम् ।
तारतम्यकणिकामपि वक्तुं
नाहमस्मि कुशलो न परो वा ॥ १ ॥

अस्ति श्रियः चन्द्रमसः सुधायां
कल्पद्रुमाणाञ्च पिता पयोधिः ।
रुन्धन् समन्ताद्वलयं धरण्याः
दधाति यः स्वच्छदुकूललीलाम् ॥ २ ॥

तरङ्गिणी वारुणराजधानी
धेनुस्तनप्रस्नुतदुग्धजन्मा ।
बहिः प्रसर्पद्भुजगाधिराज-
भङ्गीमिवाङ्गीकुरुते यदग्रे ॥ ३ ॥

अन्ये गुणाः सन्ति तथापि मन्ये
माधुर्यमन्यादृशमेव यस्य ।
यतो मधुद्वेषकृतेव जातो
निषेवमाणः पुरुषो यदम्भः ॥ ४ ॥

End:

गोविन्ददेशिकमुपास्य चिराय भक्त्या
तस्मिन्स्थिते निजमहिम्नि विदेहमुक्त्या ।

अद्वैतभाष्यमुपकल्प्य दिशो विजित्य
काञ्चीपुरे स्थितिमवाप स शङ्करार्यः ॥ ७१ ॥

गोविन्दस्य व्रतिकुलगुरोः सिद्धिमाकर्ण्य कृत्वा
यत्कर्तव्यं तदपि वररुच्यादयो भ्रातरस्ते ।
स्वे स्वे कर्मण्यवहितधियः विद्यया कीर्तिमन्त-
श्चत्वारोऽपि स्थितिमभिमतामुज्जयिन्यामकुर्वन् ॥ ७२ ॥

Colophon:

इति श्रीयज्ञरामदीक्षितपुत्रस्य रामभद्रयज्वनः कृतौ
पतञ्जलिचरित्रे अष्टमः सर्गः ॥

श्रीसदाशिवार्पणमस्तु

श्रीमद्धोसलकुलभूपच्छायावासिना उटगीत्युपनाम्ना लिखितम् ॥

Subject: Patañjalicarita. 1-8 sargas.

Remarks:—The Ms. is in good condition. The work has been printed in the Kāvyamālā series, published by the Nirṇayasāgar Press, Bombay. The introduction to the Śṛngārabhūṣaṇabhāṇa in the Kāvyamālā edition and the article of Mr. T. S. Kuppusvāmi Śāstri in the Indian Antiquary Vol. XXXIII. give the details relating to the author and some of his contemporaries.

॥ पतञ्जलिचरितव्याख्या ॥

3827. PATAÑJALICARITAVYĀKHYĀ.

Burnell's Catalogue No. 1744. Page 153. Right column. Substance—Paper. Size—$14\frac{1}{4}\times6$ inches. Sheets—14. Lines—5 to 12 to a Page. Script—Devanāgarī. No. of

Granthas—650. Author—Veṅkaṭeśvara. First sarga only.

Beginning:

श्रीगणेशाय नमः ॥

श्री सरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ ॐ

वन्दे पञ्चास्यतनयं कुञ्जरं कञ्चिदद्भुतम् ।
यन्तारो यस्य यन्तारः स्तोत्रं स्तोतृकृतां मनः ॥ १ ॥

जयति किल रामचन्द्रः स्वगुणैरमलैः प्रसाधितदिगन्तः ।
अपि लक्ष्मणानुषक्तः कुवलयलक्ष्मीकरः श्रीमान् ॥ २ ॥

कलये तं महावीरं काङ्क्षितार्थस्य सिद्धये ।
खरदूषणदुष्प्रापः कबन्धं घातुकोऽपि यः ॥ ३ ॥

यं भाष्यं महदध्यजीगपदृषिः श्रीचोक्कनाथाध्वरी
यो रामस्य च नलिकण्ठमखिना बाणस्तवं कारितः ।
व्याचष्टे किल रामभद्रमखिनस्तस्यास्तशिष्यः कृती
भौमीन्द्रं स हि वेङ्कटेश्वरकविः यस्यां निबद्धं यशः ॥ ४ ॥

पदान्वयक्रमेणैव व्याख्यावाक्यं विलिख्यते ।
क्वचित्पदानां निष्पत्तिः क्वचित्कोशोक्तिसम्मतिः ॥ ५ ॥

अपेक्षितपरित्यागेऽप्यनपेक्षितवर्णने ।
इदं सन्तो न निन्दन्तु नृणां धर्मो ननु भ्रमः ॥ ६ ॥

टीकेयं ललिता नाम गिरिजाता कृता मया ।
रमयेदपि सर्वज्ञं विषमेक्षणमप्यहो ॥ ७ ॥

अथैतत्पतञ्जलिचरित्रं नाम काव्यं "काव्यं यशसेऽर्थकृते" इत्याद्यभियुक्तवचनानुरोधेन यशःप्रयोजनकं भगवद्विषयतया "काव्यालापांश्च वर्जयेत्" इति निषेधाविषयं चिकीर्षुः कविरेष प्रथमं निष्प्रत्यूहपरिपूरणाय वस्तुनिर्देशरूपं मङ्गलं निबध्नाति।

अस्तीति॥ यः पयोधिः क्षीरसमुद्रः धरण्या भूमेर्वलयं मण्डलं "मण्डलश्चक्रवालश्च वलयम्" इति शब्दरत्नाकरे। "समन्तात्सर्वतो विष्वक्परितश्च समन्ततः" इति तत्रैव। रुन्धन् आवृण्वन् धरण्या इत्यनुषज्यते। स्वच्छमत्यन्तनिर्मलं यद्दुकूलं क्षौमं तस्य लीलां क्रियां विलासं वा "लीला क्रियाविलासश्च" इति वैजयन्ती। दधाति वहति। श्रियः लक्ष्म्याः। "ङिति ह्रस्वश्च" इति विकल्पान्नदीत्वाभावः। चन्द्रमसश्चन्द्रस्य सुधायाः अमृतस्य कल्पद्रुमाणां पञ्चानां देवतरूणाञ्च। यद्यपि देवतरुविशेषः कल्पद्रुमः तथापि देवतरुमात्रे "कल्पद्रुमाणामिव पारिजातः" इति कालिदासप्रयोगः। "कल्पो न्याये सुरद्रुमे। विकल्पे च" इति वैजयन्ती। पिता उत्पादयिता। पुराणसिद्धोऽयमर्थः स पयोधिरस्ति। सत्तावाचिनः प्रथमं प्रयोगात्, श्रीचन्द्रादिवाचकप्रयोगाच्च मङ्गलं भवति। अस्मिन् सर्गे इन्द्रवज्रोपेन्द्रवज्रामिश्रितोपजातिवृत्तं द्रष्टव्यम्॥ १॥

End:

(इति मुरमथनोक्त्या मोदमानः फणीन्द्रः
त्रिपुरहरनियोगं दीर्घकालादवाप्य ।
तदपि परिदिदृक्षुस्ताण्डवं चन्द्रमौले-
रवतरितुमवन्यामंशतश्चाशशंसे ॥ ६५ ॥

॥ इतीति ॥ इति पूर्वोक्तप्रकारेण । मुरमथनस्य विष्णोरुक्त्या वचनेन मोदमानः प्रहृष्यन् फणिनामिन्द्रः शेषः दीर्घकालाद्बहुकालात्। परशब्दाध्याहारेण दिक्शब्द-योगे पञ्चमी। बहुकालात्परं त्रिपुरहरस्य शिवस्य नि-योगमनुज्ञामवाप्य चन्द्रमौलेरीश्वरस्य तत्ताण्डवं आनन्द-नृत्तमपि परिदिदृक्षुः सन् अंशतः स्वभागतः अवन्यां भूमाववतरितुमवरोढुम् "वृतो वा" इति विकल्पितत्वादि-टोदीर्घाभावः। आशशंसे इयेष। आङः शसि इच्छायां लिट्यात्मनेपदम् । मालिनीवृत्तमेतत् । "ननमयययु-तेयं मालिनी भोगिलोकैः" इति लक्षणात् ॥

इतीति॥इति श्रीयज्ञरामदीक्षितपुत्रस्य रामभद्रयज्वनः। कर्तरि षष्ठी। कृतौ पतञ्जलिचरिते पतञ्जलिचरिताख्य-काव्ये । कृतिशब्दस्य नित्यस्त्रीलिङ्गत्वात् पतञ्जलिच-रितविशेषणत्वेऽपि स्त्रीत्वम् प्रथम आद्यः सर्गः अध्यायः परिच्छेद इत्यर्थः । "सर्गो निश्चयनिर्माणस्वभावाध्या-ययुक्तिषु । उत्साहत्यागयोश्च" इति रत्नमाला । इति समाप्त इत्यर्थः। "इतिः हेतुप्रकरणप्रकारादिसमाप्तिषु" इत्यमरः । एवमुत्तरत्र सर्गेष्वपि व्याख्येयम् ।

Colophon:

इति श्रीकौण्डिन्यकुलतिलकदक्षिणामूर्तिपुत्रवेंकटेश्वरशास्त्रि-
विरचितायां पतञ्जलिचरितव्याख्यायां ललिताख्यायां प्रथमः
सर्गः ॥

Subject: Patañjalicaritavyākhyā otherwise known as Lalitā First sarga only.

Remarks:—The Ms. is in good condition. The author of the commentary was a pupil of Rāmabhadradīkṣita, author of the text. The commentary has not been printed so far.

॥ प्राणाभरणम् ॥

3828. PRĀṆĀBHARAṆAM.

Burnell's Catalogue No. 5016. Page 159. Right column.
Substance—Paper Size—$6\frac{7}{8}\times4\frac{1}{8}$ inches. Sheets—11.
Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—103. Author—Paṇḍitajagannātha. Complete.

Beginning:

श्रीगणेशाय नमः ॥

विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमाः
भूपालाः कमलाविलासमदिरोन्मीलन्मदाकर्णिताः ।
आस्ये धास्यति कस्य लास्यमधुना धन्यस्य कामालस-
स्वर्वामाधरमाधुरीमधरयन्वाचां विलासो मम ॥ १ ॥

End:

तैलङ्गान्वयमङ्गलालयमहालक्ष्मीदयालालितः
श्री(?)मद्रघुनाथभट्टसूनुरनिशं विद्वल्ललाटंतपः ।

सन्तुष्टः कमलाधिपस्य कवितामकर्ण्य तद्वर्णनं
भूयः पण्डितमण्डलाधिप जगन्नाथं व्याधासी(?)रिदम् ॥८३॥

स्वस्तिश्रीमदतिप्रचण्डदोर्दण्डाखण्डकुण्डलीकृतकोदण्ड दण्डोद्यच्चण्डोद्यत्काण्डखण्डिताखण्डलप्रौढविद्वन्मण्डलीमु-ण्डपुण्डरीकसंभृतिभाण्डीकृतप्रकाण्डब्रह्माण्डान्तरेषु अन-वरतघनकनकवितरणविधिविषदविविधपथाविस्तीर्णार्णववा-हिनीविनिःशेषितदारिद्र्यदावदहनसन्तापसदर्थिसार्थसमर्थि-तचञ्चद्यशश्चन्द्रचन्द्रिकाचङ्क्रमसङ्क्रामितचन्द्रचूडमहेन्द्र-महेभमिहिकाद्रिषु अनवद्यगद्यपद्यवाग्वैभवसमुद्भवसम्बो-धितधिषणेषु विद्वद्भ्रमरभूवर्येषु ॥

Colophon:

इति पण्डितरायजगन्नाथेन निर्मितं प्राणाभरणम् ॥

Subject: Prāṇābharaṇa, 1-83 ślokas.

Remarks:—The Ms. is in good condition. The author states that he is an Āndhra and that his father was known as Raghunātha-bhaṭṭa. This work does not seem to have been published so far.

॥ भारतवंशकाव्यव्याख्यानम् ॥

3829. BHĀRATAVAMŚAKĀVYAVYĀKHYĀNAM.

J. L. Collection No. 545. Substance—Paper. Size—$8\frac{1}{2}\times3\frac{3}{4}$ inches. Sheets—5 (1, 2, 9, 10 and 11 only available). Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—50. Author—Kṛṣṇakavi. Incom-plete,

Beginning:

श्रीगणेशाय नमः ॥

ध्यात्वा श्री विठ्ठलं देवं नत्वा गुरुपदाम्बुजम् ।
टीकाभरतवंशस्य क्रियते भावभामिनी ॥ १ ॥

अथ तत्रभवान् कृष्णकविः "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे" इत्यालङ्कारिकवचनात्काव्यस्यानेकश्रेयस्साधनतां पश्यन् "काव्यालापांश्च वर्जयेत्" इत्यस्यासत्काव्यविषयतां पश्यन् "पुण्यश्लोको युधिष्ठिरः" इति "पुण्यश्लोको जनार्दनः" इति वचनानुग्राह्यानुग्राहकयोरपि कीर्तनीयत्वेन जनार्दनानुगृहीत युधिष्ठिरस्य धीरोदात्तस्य प्रधाननायकत्वेन तद्वंशस्य पुण्यप्रदत्वेन तन्नायककं काव्यं चिकीर्षुः "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इत्याशीरादेरन्यतमस्य काव्यमुखत्वेन जगन्नियन्तुः शम्भोरष्टमूर्तीनां मध्ये चन्द्रस्य शान्तत्वादानन्ददत्वात् साक्षात् वर्ण्यमानवंशजनकत्वाच्चतत्प्रणामरूपं मङ्गलं काव्यमुखं निर्विघ्नसमाप्त्यवाप्त्यर्थमातनोति ॥

सोमस्य मूर्तिं सततं नमाम्यहं
यस्योदयाद्वृद्धिमुपैति वारिधिः ।
जीवन्ति यस्यैव कलासुधान्धसः
पीत्वा चकोरा इव चारु चन्द्रिकाम् ॥ १ ॥

॥ सोमस्येति ॥ अहं सोमस्य उमासहितस्य मूर्तिं

चन्द्ररूपां चन्द्रं वा बिम्बरूपां सततं सदा नमामि, यस्य चन्द्रस्य उदयात् वारिधिः वृद्धिमुपैति । सुधान्धसो देवाः यस्य कलामेव चन्द्रिकां चारु सम्यक् पीत्वा चकोरा इव जीवन्ति । अत्र देवानां चकोरसादृश्यवर्णनादुपमालङ्कृतिः। सा चकोराणां उपमानानां देवानामुपमेयानां इवशब्दस्योपमावाचकः स जीवनस्य साधारणधर्मस्येति चतुर्णामुपादानात्पूर्णा । "स्वतस्सिद्धेन भिन्नेन सम्मतेन च धर्मतः। साम्यमन्येन वर्ण्यस्य वाच्यञ्चेदेकदोपमा" इति लक्षणात् । इयञ्चोपमा प्रस्तुतगोचरेति नवीनाः । वर्ण्यमानचन्द्रानुग्राह्यत्वेन चकोराणामिति प्रस्तुतत्वम् । "अवर्ण्यमेवोपमानम्" इति वदतां एतादृशस्थले गम्यमानसादृश्यात्तुल्ययोगितेत्यङ्गीकुर्वतां इवशब्दस्य गम्यमानसाधर्म्यानुवादकत्वं कल्पयतां प्राचां महाप्रयास एवेति समुद्रस्याभिवृद्धत्वेन महतां देवानामपि संरक्षकत्वेन वर्णनात् महदुपसर्जनरूपः कलासमृद्धिमत्वेन समृद्धिरूपश्चेति द्विविधोप्युदात्तालङ्कारः। "उदात्तमृद्धचरितं श्लाघ्यञ्चान्योपलक्षणम्" इति जयदेववचनात् । यस्येति यच्छब्दस्य उत्तरवाक्यगतत्वेन तच्छब्दाभावप्रयुक्तो न न्यूनपदत्वदोषः। अस्मिन् सर्गे प्राय इन्दुवंशवृत्तम् । "स्यादिन्दुवंशा ततजारसंयुता" इति लक्षणात् । तगणस्य निष्फलकत्वेऽपि सोमस्येति देव्या वाचकशब्दस्योपमानान्न दोषः । "देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि च" इति वचनात् । सकारोपरि ॐ-

मिति प्रथमत एव प्रणवस्य उपादानान्मङ्गलतरत्वम् ।
ओँकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा............।"

End:

(मूलम्)

मनोहरा पापहरा चमत्कृतिः
सेव्या पुराणोक्तकथाचमत्कृतिः ।
किंचीवरस्यूतविचित्रकन्थया
नाच्छाद्यते किं न हिमं निवार्यते ॥ १२ ॥

वंशस्थेन रूपणसंगत्या स्वकृतिकाव्यस्य मधुत्वपारोपितं तदवसरात्स्वकृतिग्राह्यमाह ॥ वागिति ॥ पुराणानि वैष्णवादीनि काव्यानि रामयणादीनि ।

* * *

आच्छादनमेव भूषणं हिमं शीतं किं न निवार्यते ।
अंग...... अपनीयत इति भावः । प्राचां

Subject: Bhāratavaṃśavyākhyā, only the beginning portion.

Remarks:—The Ms. is in good condition. This Ms. abruptly ends with the commentary of the twelfth śloka.

This is a commentary on the Bharatavaṃśakāvya of Kṛṣṇa Kavi—whose work however is not available in this library. The original should have dealt with the story of the descendents of Bharata, the ancestor of the Pāṇḍavas.

॥ भिक्षाटनकाव्यम् ॥

3830. BHIKṢĀṬANAKĀVYAM.

Burnell's Catalogue No. 4770. Page 160. Left column.
Substance—Paper. Size—9⅞ × 3⅞ inches. Sheets—11.
Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—240. Author—Utprekṣāvallabha. Incomplete.

Beginning:

श्रीगणेशाय नमः ॥ अविघ्नमस्तु ॥

तव करकमलस्थां स्फाटिकीमक्षमालां
नखकिरणविभिन्नां दाडिमीबीजबुद्ध्या ।
अनुकलमनुकर्षन्येन बीरो निरुद्धः
स भवतु मम भूत्यै वाणि ते मन्दहासः ॥ १ ॥

प्रतिबिम्बं निजं दृष्ट्वा कुचे मातुरिभाननम् ।
स्तन्ये मन्दादरं वीक्ष्य स्मेरं स्मरहरं श्रये ॥ २ ॥

End:

स्पन्दैरमन्दजनितैर्मुहुरेव यस्य
संकुचितं झटिति शर्म भविष्यतीति ।
अन्यं निमील्यनिबिडं मुदितेव काचित्
वामेन तेन नयनेन शिवं ददर्श ॥ १६ ॥

Colophon: (Sheet 3.)

इति दर्शनपद्धतिः ॥

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटने महाकाव्ये काव्यमुखपद्धतिः ।

Subject: Bikṣāṭanakāvya.

1.	मुखपद्धतिः	20	Ślokas
2.	मण्डनपद्धतिः	22	,,
3.	मण्डननिषेधपद्धतिः	17	,,
4.	निर्गमनपद्धतिः	16	,,
5.	निर्गमनोक्तिपद्धतिः	22	,,
6.	लज्जापनयनपद्धतिः	6	,,
7.	दर्शनपद्धतिः	16	,,

Remarks:—The Ms. is in good condition. For detailed Remarks, see Number. 3831.

॥ भिक्षाटनकाव्यम् ॥

3831. BHIKṢĀṬANAKĀVYAM.

Burnell's Catalogue No. 12360. Page 160. Right column. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{8}$ inches. Sheets—20. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—570. Author—Utprekṣāvallabha (Paddhatis 1-20.)

Beginning:—Same as No. 3830.

End:

काचित्प्रक्षण(?)विकर्षनदुर्बलाङ्गी
वीथ्यां निपात्य निजभूषणमेवमेकम् ।
यावद्गृहोपगमना ननु तावदेव
रथ्यैकशेषसकलाभरण...... ॥ १२ ॥

Colophon: (Sheet 2.)

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटने काव्यमुखपद्धतिः

Remarks:—The Ms. is well preserved.

1.	काव्यमुखपद्धतिः	20	ślokas.
2.	मण्डनपद्धतिः	22	”
3.	मण्डनप्रतिषेध...	17	”
4.	निर्गमन...	16	”
5.	निर्गमनोक्ति....	22	”
6.	लज्जापनयन...	7	”
7.	दर्शन...	16	”
8.	अङ्गवर्णन...	16	”
9.	विलासचरित...	14	”
10.	उक्तिप्रत्युक्ति...	18	”
11.	भिक्षाटन....	17	”
12.	भिक्षाप्रदानोक्ति...	21	”
13.	पारवश्य....	17	”
14.	पारवश्यो(क्ति)....	15	”
15.	विश्लेषारम्भ...	15	”
16.	प्रश्नोक्ति....	15	”
17.	अनुगमन...	9	”
18.	शिक्षा....	16	”
19.	वीथीसंचार...	14	”
20.	चरितोपलालन....	12	”
21.	” (incomplete)	12	”

॥ युधिष्ठिरविजयः ॥

3832. YUDHIṢṬHIRAVIJAYAḤ.

Burnell's Catalogue No. 4792. Page 161. Left column.
Substance—Paper. Size—$10\frac{2}{5} \times 4\frac{7}{10}$ inches. Sheets—75.
Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—1078. Author—Vāsudeva. Complete.

Beginning:

श्रीगणेशाय नमः ॥ अविघ्नमस्तु ॥

प्रदिशतु गिरिशस्तिमितां
ज्ञानदृशं वः श्रियश्च गिरिशस्तिमिताम् ।
प्रशमितपरमदमायं
सन्तः सञ्चिन्तयन्ति परमदमायम् ॥ १ ॥

यो वा मन्दरवपुषं
ममर्द मातङ्गवरममन्दरवपुषम् ।
कान्ताञ्चापद्य सद्यः
क्षपितो येनाङ्गजोऽपि चापद्य सद्यः ॥

End:

वसुधान्यवर्तीं वश्य-
न्वसुधां परमं हयमेधमनल्परमम् ।
सहितो यजमानाभिमुखैः
सहितो महितं विततान निकामहितम् ॥ ९९ ॥

सुखेन नागसाह्वये पुरेऽवसत्सभारतः ।
ररक्ष गां पुरूरवाः पुरेवसन्सभारतः ॥ १०० ॥

Colophon:

इति श्रीवासुदेवविरचिते युधिष्ठिरविजये अष्टमाश्वासः ॥

श्रीकृष्णार्पणमस्तु ॥ दक्षिणामूर्तये नमः ॥ रामाय नमः ॥

श्रीगुरुभ्यो नमः ॥ श्रीरामाय नमः ॥

Subject: Yudhiṣṭhiravijaya 1–8 Āśvāsas.

Remarks:—The Ms. is in good condition. The work deals with the story of the Mahābhārata. The author, Vāsudeva, was a native of Malabar.

॥ युधिष्ठिरविजयपदपाठः ॥

3833. YUDHIṢṬHIRAVIJAYAPADA-PĀṬHAḤ.

Burnell's Catalogue No. 10191. Page 161. Left column. Substance—Palm leaf. Size—$15\frac{9}{10} \times 1\frac{3}{10}$ inches. Leaves—24. Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—450. Author—Vāsudeva. 1-4 Āśvasas only. Incomplete.

Beginning:

प्रदिशतु । गिरिशः । स्तिमिताम् ।

ज्ञानदृशम् । वः । श्रियम् । च । गिरि । ग्रसितम् । इताम् ।

प्रशमितपरमदमायम् ।

सन्तः सञ्चिन्तयन्ति । परमदमाः । यम् ॥

End:

लीनमृगीशावदरी-

सङ्घम् । सततोपगतदिगीशा । बदरी ।

यं विविघर्षिंतता । अरं
राजयते । तुङ्गभृङ्गधर्षिंततारम् ॥ ८ ॥

तत्र । शिवे । दमहर्षौ ।
दद्याद्भिः । अभ्यंसमान चेदमहर्षौ ।
मुनिभिः । अमा.......... ॥

Colophon: (Leaf No. 24)

इति वासुदेवस्य कृतौ युधिष्ठिरविजये चतुर्थ आश्वासः ॥

स्मरारातये नमः ॥

Subject: Yudhiṣṭhiravijyavyākhyā 1-5 Āśvāsas.

	आश्वासः	Ślokas	Leaf No.
I.	"	98	6
II.	"	120	13
III.	"	113	19
IV.	"	97	24
V.	"	1-9	24

Remarks:—This Ms. is in good condition. This Ms. abruptly ends with the 9th śloka of the fifth Āśvāsa. Herein the padaccheda of each śloka is given without altering the metrical arrangement of the ślokas.

॥ युधिष्ठिरविजयव्याख्यानम् ॥

3834. YUDHIṢṬHIRAVIJAYAVYĀKHYĀNAM.

Burnell's Catalogue No. 10192. Page 161. Left column. Substance—Palm leaf. Size—$14\frac{9}{10} \times 1\frac{3}{10}$ inches. Leaves —46. Lines—6 or 7 to a Page. Script—Grantha.

No. of Granthas—800. Author—Darmarājadīkṣita.
First two Āśvāsas only. (Incomplete.)

Beginning:

सर्वज्ञानशिरोमणिः परमशिवयोगी श्रीवासुदेव-कविः सकलसुरासुरगर्वापहारकं स्वभक्तजनसर्वमङ्गलप्रदं सकलसुरासुरसर्वैश्वर्यप्रदञ्च चराचरसकलजगद्गुरुं परम-शिवं हृदि निधाय प्रदिशत्वित्यादिश्लोकत्रयेण स्वकर्त-व्यकाव्यस्य निर्विघ्नपरिसमाप्त्यर्थं मङ्गलमाह ॥ प्रदि-शतु गिरिश इति ॥ प्रदिशतु गिरिशः स्तिमितां । ज्ञानदृशः । वः श्रियं । च । गिरिशस्तं । इतां । प्रशमित-परमद्मा । च । सन्तः । सञ्चिन्तयन्ति । परमद्माः । यं । अत्रेत्थं पदयोजना । गिरिशः । ईश्वरः स्तिमितां निश्चलां श्रियञ्च । गिरि वाचि । शस्तिं प्रसिद्धिम् । इतां प्राप्ताम् । ज्ञानदृशं ज्ञानदृष्टिम् । वः युष्माकम् । प्र-दिशतु ददातु । प्रशमितपरमदमायं निगृहीतशत्रुगर्वकैत वम् । यमीश्वरं । परमदमाः अत्यन्तजितेन्द्रियाः । तपनव्यासमार्कण्डेयशुकोपमन्युसनकादयः सन्तः सञ्चि-न्तयन्ति ध्यायन्ति । गिरिशः प्रदिशत्विति पूर्वेणान्वयः । चिन्तयति चिन्तयतः चिन्तयन्ति लट् परस्मैपदम् ॥ १ ॥

End:

अधरितसारवतालं । रेणे वलयेन । रत्नसारवता अलम् । सार्धं । रोमावलीभिः । स्त्रीणां प्रणनर्त । कुचभरः । अमावली-भिः ॥ नर्मणि रत्नसारवता वलयेन रत्नखचितवलयेन । अधरितसारवतालं अधरीकृतसशब्दतालं यथा भवति तथा

रेणे शब्दितम् । स्त्रीणां कुचभरः । स्तनभरः । रोमावलिभिः रोमराजिभिः सार्धं । वलिभिः । त्रीवालिभिः । अपा सह अलं प्रणनर्त नर्तनं कृतवान् । "रण वण शब्दे" नृत्तं आन तेने(?) ॥ ११२ ॥

च्युतपरमाकल्पानां

(नतिरभसात्सुभ्रुवां रमाकल्पानाम् ॥

रुचिमयि कामं गलता

निन्ये स्वेदाम्भसानि काममङ्गलता ॥)

Colophon: (Leaf No. 19. (घ))

इति सर्वज्ञशिरोमणि परमशिवयोगि वासुदेवकविप्रणीत युधिष्ठिरविजयकाव्यप्रकाशिकायां श्रीमत्परमकारुणिकपरमशिवपादारविन्दपूजानिरतश्रीवत्सान्वयविश्वाधिकाशिवतनयकाव्यार्थधर्मराजशिवदीक्षितान्तर्यामिसदाशिवविरचितायां सदाशिवटीकायां प्रथमाश्वासः समाप्तः ॥

Subject: Yudhiṣṭhiravijayavyākhyā First and Second Āśvāsas only.

Remarks:—The Ms. is in good condition. The Ms. abruptly ends with the commentary of the 112th śloka of the Second Āśvāsa.

The author of the commentary, Dharmarāja belongs to the community of temple priests, called Gurukkal. The commentary is evidently intended to be used by even youngsters. The work is not available in print.

॥ राक्षसकाव्यम् ॥

3835. RĀKṢASAKĀVYAM.

J. L. Collection No. 546. Substance—Paper. Size 8×4 inches. Sheets—7. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—42. Author—Kālidāsa?. Complete.

Beginning, end, colophon and subject—Same as No. 3836.

Remarks :—The Ms. is in decaying condition.

After the colophon is found.

विरमति कथनं विना (न) खेदः

सति कथने समुपैति कात्र लज्जा ।

इति कलहमधोमुखी सखीभ्यो

लपितुमनालपितुं समाचकाङ्क्ष ॥ १ ॥

श्रीकृष्णार्पणमस्तु । श्रीविश्वेश्वराय नमः ॥

॥ राक्षसकाव्यम् ॥

3836. RĀKṢASAKĀVYAM.

Burnell's Catalogue No. 4781 b. Page 161. Left column. Substance—Paper. Size—14[illegible] × [illegible]$\frac{2}{5}$ inches. Sheet—1. Lines—32 to a Page. Script—Devanāgarī. No. of Granthas—34. Author—Kālidāsa. Complete.

Beginning :

कश्चिद्वनं बहुवनं विचरन्वयस्थो

वश्यां वनात्पवदनां वनितां वनाद्रीम् ।

तर्वर्यरिप्रदमुदीक्ष्य समुच्छ्रितं खे
नागामिमां मदकलः सकलां बभाषे ॥ १ ॥

End:

एतावदुत्तमवचाः सुमनाः सदुक्त्वा
रन्त्वा दिनं सहतया प्रियया ह्यदीनः ।
युक्तं चतुर्भिरनडुद्भिरदीनवाद्भि-
रारुह्य यानमथ संप्रययौ स्वगेहम् ॥ २ ॥

Colophon:

इति श्रीकविचक्रवर्तिश्रीकालिदासकृतौ राक्षसकाव्यं
समाप्तम् ॥

Subject: Rākṣasakāvya 1-10 ślokas.

Remarks:—The Ms. is in good condition. After the colophon is given a śloka:—

विरमति कथनं विना न खेदः
सति कथने समुपैति कात्रलज्जा ।
इति कलहमधोमुखी सखीभ्यो
लपितुमनालपितुं समाचकांक्षे ॥ १ ॥

॥ राक्षसकाव्यं सटीकम् ॥

3837. RĀKṢASAKĀVYAM SAṬĪKAM.

Burnell's Catalogue No. 4780. Page 161. Left column. Substance—Paper. Size—14×6 inches. Sheets—11. Lines—5 to 8 to Page. Script—Devanāgarī. No. of Granthas—180. Author—Kālidāsa. Complete.

Beginning:

कश्चिद्वनं बहुवनं विचरन्वयस्थो
वश्यां वनात्मवदनां वनितां वनार्द्राम् ।
तर्वर्यरिप्रदमुदीक्ष्य समुत्थितं खे
नागामिमां मदकलः सकलां बभाषे ॥ १ ॥

श्रीगणेशाय नमः ॥

कश्चिदनिर्दिष्टनामा ना पुरुषः इमां प्रत्यक्षां सकलां समस्तां गां वाचं वनितां स्त्रियं प्रति बभाषे अब्रवीत् । किं कुर्वन् वनं काननं विचरन् भ्रमन् । किम्भूतं वनं? बहुवनं बहूदकं । "वने सलिलकानने" इत्यमरः । किम्भूतो ना? वयस्थः । वयसि तिष्ठतीति वयस्थः युवेत्यर्थः । पुनः किंविधः? मदकलः हर्षयुक्तः । अथवा मदेन मद्येनाश्राव्यवाक् । अथवा मदस्य मदनस्य कला विद्यते यस्मिन्निति । किं कृत्वा? तरवो वृक्षास्तेषां अरिः अग्निः तस्यारिः उदकं तत्प्रदादीति असौ मेघः तं खे आकाशे । समुत्थित समुत्पन्नम् । उद्वीक्ष्य दृष्ट्वा । किम्भूतां वनिताम्? वश्यां स्वाधीनाम् । पुनः किम्विधाम्? वनं उदकं तत् आत्मा यस्यासौ चन्द्रः । उदधिमथनोत्पन्नेः । तद्वदनं यस्यास्ताम् । पुनः किम्विधाम्? वनं उदकं तेनार्द्रे आर्द्रीकृताम् ॥ १ ॥

End:

एतावदुत्तमवचः सुमनाः स उक्त्वा
रन्त्वा दिनं सहतया प्रियया सदीनः ।

युक्तं चतुर्भिरनड्डुद्भिरदीनवद्भि-
राुह्यमानमथ स प्रययौ स्वगेहम् ॥ २० ॥

(व्याख्या ॥)

अथ अनन्तरं स पुरुषः अदीनवद्भिः सन्तुष्टैः अनड्डुद्भिः वृषभैश्चतुर्भिर्युक्तं यानं आरुह्य स्वगेहं प्रययौ । कथम्भूतः ? अदीनः अतिसंतुष्टः । किं कृत्वा ? एतावदुत्तमं वचः उक्त्वा । पुनः किं कृत्वा ? तया सह दिनं रन्त्वा क्रीडयित्वा । कथंभूतः ? सुमनाः सुष्ठु मनो यस्यासौ ॥ २० ॥

Colophon:

इति श्रीकालिदासकृतौ राक्षसकाव्यं सव्याख्यानं सम्पूर्णम् ॥

श्रीशिवाय नमः ॥

Subject: Rākṣasakāvyam with commentary. 1-20 ślokas.

Remarks:—The Ms. is in good condition. The work is available in print. Evidently this is a pseudo Kālidāsa.

॥ राक्षसकाव्यं सटीकम् ॥

3838. RĀKṢASAKĀVYAM SAṬĪKAM.

Burnell's Catalogue No. 4781. Page 161. Left column. Substance—Paper. Size—$8\frac{1}{8} \times 4\frac{1}{2}$ inches. Sheets—8. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—180. Author—Kālidāsa. Complete.

Beginning, end, colophon and subject—Same as No. 3837.

Remarks:—The Ms. is in good condition.

॥ राधाविनोदकाव्यम् ॥

3839. RĀDHĀVINODAKĀVYAM.

J. L. Collection No. 547. Substance—Paper. Size—8×4 inches. Sheets—3. Lines—8 to a Page. Script—Devanāgarī. No of Granthas—30. Author—Rāmacandrakavi. Complete.

Beginning:

श्रीगणेशाय नमः ॥ श्रीः ॥

मालीनो घनमाली मालीनो वलगाली ।
मालीनो वनमाली मालीनोऽवतु माली ॥ १ ॥

विधुसुहृद्विरहानलपीडिता विधुसुहृच्चरलाननपीडिता ।
विधुसुहृद्वदनानलपीडिता विधुसुहृत्सुगिरोकिरदीडिता ॥२॥

उदयते दयते दयते शशी
सखिकरैरकरैस्तिमिराकरैः ।
दिशमिमां चरमां चरमारमं
कमलकोमललोलविलोचने ॥ ३ ॥

कुमुदबन्धुरबन्धुरबन्धुरः
सतनुते तनुते तनुते ततः ।
हिमकरो हिमतां हिमतां न तां
किमनुमां सदृशं सदृशं विधाः ॥ ४ ॥

कमलिनी मलिना मलिनालिना
विचलिता सुलता सुलता शुभाम् ।

विधुत तां विधुतां विधुभानुभि-
र्नयनयोरनयोर्नयसीनयोः ॥ ५ ॥

End:

समुदिते मुदिते नुदिते क्षणे
हिमकरे मकरे नकरे श्रुती ।
पिकरवे वरवे वरवेति सा
हरिणलाञ्छन लाञ्छन लाञ्छना ॥ १६ ॥

नसहते सहते सहते सखी
तव वियोग वियोगमयोगहृत् ।
सपदि तां तरुणीं सरणिं मणिं
किरतु नाम नवं नव नीविजम् ॥ १७ ॥

अथ तथाकलया कलया शुभां
नवजदामजदामजदीप्तिमान् ।
हरिरगाचमगाचमगाच्च सा
मुदमतीवमतीव दृशौ स्थितम् ॥ १८ ॥

रामचन्द्रकविनाकविनादः
पुरुषोत्तमसुतेनसुतेन ।
राधिकाहृदयशोकदमासी-
द्राधिकाहृदयशोकदमारात् ॥ १९ ॥

ब्रह्मादिभिः सुरवरैः परिपीयमानं
संगीयमानमनिशं श्रुतिभिर्मुरारिम् ।
गोपाङ्गनानयनविभ्रमलास्य······
सच्चित्स्वरूपमनघं हृदि भावयामि ॥ २० ॥

Colophon:

इति श्रीराधाविनोदकाव्यं सम्पूर्णम् ॥

Subject: Rādhāvinodakāvya. 1-20 ślokas.

Remarks:—The Ms. is in good condition. For information regarding the author, see Number 3841.

The work deals with the story of the Bhāgavata.

॥ राधाविनोदकाव्यम् ॥

3840. RĀDHĀVINODAKĀVYAM.

P. A. Collection No. 328. Substance—Paper. Size—9⅞ × 4½ inches. Sheets—2. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—20. Author—?. Incomplete.

Beginning—Same as No. 3839.

End:

The Ms. breaks off in the 19th stanza रामचन्द्र etc.

Colophon:

इति श्रीराधाविनोदकाव्यं समाप्तम्

Subject: Same as No. 3839.

Remarks:—The Ms. is in a decaying condition.

॥ राधाविनोदकाव्यं सव्याख्यम् ॥

3841. RĀDHĀVINODAKĀVYAM SAVYĀKHYAM.

J. L. Collection No. 518. Substance—Paper. Size—9 × 4½ inches. Sheets—14. Lines—9 to a Page. Script—Deva-

nāgarī. No. of Granthas—250. Author—Rāmacandra. Complete.

Beginning:

मालीनोद्यतमाली मालीनो बलमाली।
मालीनो वनमाली मालीनोऽवतु माली ॥ १ ॥

श्रीगणेशाय नमः। दक्षिणाकालिकायै नमः॥

श्रीराधामाधवो जयतु।

कुशेशयदलाकारशयशायिनि मौक्तिके।
मुहुर्मुहुरुदासीनामासीनामाश्रये श्रियम् ॥ १ ॥

राधाविनोदकाव्यस्य प्रकाशः : परितन्यते।
सुधिया रामचन्द्रेण भास्वतेव सरोरुहः ॥ २ ॥

प्रारीप्सितस्यैव निष्प्रत्यूहसमाप्तिकामनया कृतं स्वेष्ट-देवताकीर्तनात्मकं मङ्गलं शिष्यशिक्षायै निबध्नन् काव्य-लक्षणीभूतामाशिषं प्रतिजानीते। "आशीर्नमस्क्रिया" इति स्मरणात्, ननु "सर्गबन्धो महाकाव्यम्" इत्याद्य-धिकृत्याशीर्नमस्क्रियेत्याद्युक्तमिति कथमस्याः काव्यलक्ष-णत्वमिति चेत्, न। एतदेवाधिकृत्य "न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति" इत्युक्तेः। किञ्च "सर्ग-बन्धो महाकाव्यम्" इत्यनेन सर्गं विना कृतस्य काव्य-त्वमक्षतमेव। विशेषं विना कृतस्य सामान्यत्वात्। वस्तु-तः काव्यमन्यदेव यत्र रसादिचिन्तेति विस्तृतमन्यत्र। वनमाली हरिर्नोऽस्मानवत्वित्यन्वयः॥

End:

रामचन्द्रकविना कविनादः पुरुषोत्तमसुतेनसुतेन ।
राधिकाहृदयशोकदमासीद्राधिकाहृदयशोकदमारात् ॥ १९ ॥

श्रीराधाविनोदकाव्यं सम्पूर्णं शुभमस्तु ॥

कविः स्वकीर्त्यनुवृत्तये स्वनाम ग्रन्थनाम निबध्नाति ।

रामचन्द्रेति ॥ रामचन्द्रकविना अदः राधिकाहृदयशोकदं राधिकाया हृदयशोकस्तं द्यति तद्राधिकाहृदयशोकदं नाम काव्यं आसीत् तेन विरचितमित्यर्थः । कीदृशेन कविना । को ब्रह्मा इः शम्भुः अः विष्णुस्ततो द्वन्द्वस्तेन कवास्ते विद्यन्ते यस्मिन् स्वाभिनस्तेन । पुनः पुरुषोत्तमसुतनेसुतेन । पुरुषोत्तमसुतो जनार्दनस्तस्य इनसुतः ज्येष्ठसुतः तेन । किंविशमदः काव्यमाराचूरमाजन्म इति यावत् । राधिकाहृदयशोकदं राधिकायां हृदयं यस्य स हरिस्तस्य शोकस्तं द्यति तत् तद्भक्तिकरमित्यर्थः ॥ १९ ॥

ब्रह्मादिभिः सुरवरैः परिगीयमानं
सङ्गीयमानमनिशं श्रुतिभिर्मुरारिम् ।
गोपाङ्गनानयनविभ्रमलास्यमानं
सच्चित्स्वरूपमनघं हृदि भावयामि ॥

आसीदागमपारगो रविसुतप्रौढप्रकाशो बुधः
श्रीमान श्रीपुरुषोत्तमः सुरगुरुप्रख्यः सतां संमतः ।
भ्रान्त्वा भूवलयं रसातलतलं यत्कीर्तिनारीश्रमं
स्वर्गङ्गाजलगाहनादपनयत्येषा हृ द रपार्द्धिनी॥

भो भो कुशाग्रमतयः परकार्यदक्षा
बालोऽहमञ्जलिमतः करवै भवत्सु ।
यच्छोलुपेन गदितं......मयेदं
चित्ते निधाय कलयन्तु कृपासमुद्राः ॥

उत्सूनुर्विबुधो जनार्दन इति ख्यातस्त्रिलोकीतले
यद्वाक्यामृतसिक्तमन्त्रनिचयः साक्षात्पुरः स्फूर्तिदः ।
तत्सूनुप्रवरेण शङ्करपुरिश्रीरामचन्द्रेण स-
त्काव्यस्यास्य विनिर्गतस्य सुधिया भावप्रकाशः कृतः ॥

सज्जनास्तोषमायान्ति यदि चेत्किं खलेन नः ।
दिवाकरहितानाञ्च शशिना किं सरोरुहाम् ॥

Colophon:

इति श्रीराधाविनोदकाव्यटीका सम्पूर्णा ।

Subject: A commentary of Rādhāvinodakāvya 1-19 ślokas.

Remarks:—The Ms. is in good condition.

The author of the work is one Rāmacandra. It may be presumed that he has commented upon the text himself His pedigree is given as follows:—

Purusottama
|
Janārdana
|
Rāmacandra — ?

The author's own commentary is very usful in making out the full meaning as intended by the author.

॥ राधाविनोदकाव्यव्याख्या ॥

3842. RĀDHĀVINODAKĀVYA-VYĀKHYĀ.

Burnell's Catalogue No. 4797. Page 161. Left column.
Substance—Paper. Size—10×4 inches. Sheets- 9 (7-15). Lines—8 to a Page. Script Devanāgarī. No. of Granthas—144. Author—?. Incomplete.

Beginning:

... इति वा यद्वा कुमुदानां बन्धुरः "बन्धुरो बन्धुरो रम्यः" इति विश्वः। पुनः कीदृशः अपां जलानाममृतरूपाणां अन्धुः कूपः "पुंस्येवान्धुः प्रहीकूपः" इत्यमरः। तरोति भावप्रधानत्वं राति प्राप्नोतीत्यर्थः। इदं विधोश्चन्द्रस्य किं सदृशं उचितं। यद्वा कीदृशीं मां सदृशं प्रियसमागमे तद्विरहेण च तुल्यरूपा दृग्यस्यास्तां तथा। यद्वा। दृशा ज्ञानेन सहिता सदृक्तां मा तथा "दृग्ज्ञाने ज्ञातरि त्रिषु" इत्यमरः। यद्वा। ततो विसृतः। तत् किं विधोः सदृशम्॥

End:

रामचन्द्रेति। राधिकाहृदये द्यति तत्तादृशमदः काव्यकविना पण्डितेन रामचन्द्रकविना आसीत्। ...मित्यर्थः। कीदृशेन? पुरुषस्य सुतो जनार्दनः। तस्य इनः ज्येष्ठः। स तु तेन ज्येष्ठ(सुतेन)त्यर्थः। आरात्समीपे श्रुतमात्रमिति भावः। राधिकाहृदये यस्य स तथा श्रीकृष्ण इति यावत्। तस्य यः शोकः तदप्राप्तिनिबन्धनं दुःखं तत् ख-

ण्डयति तादृशम् ॥ १९ ॥

Colophon:

इति श्रीराधाविनोदकाव्यटीका समाप्ता ॥ श्रीः ॥

Subject: Rādhāvinodākāvyaṭīkā.

Remarks:—The Ms. is in good condition. This Ms abruptly begins with the commentary on the fourth śloka.

॥ रामकृष्णविलोमकाव्यम् ॥

3843. RĀMAKṚṢṆAVILOMAKĀVYAM.

Burnell's Catalogue No. 4767. Page 161. Left column. Substance—Paper. Size—10×4 inches. Sheets—4. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—85. Author—Daivajñasūri Complete.

Beginning, end, colophon and subject—Same as No. 3845.

Remarks:—The Ms. is in good condition. This contains only the text. Plese see further remarks under No. 3845.

॥ रामकृष्णविलोमकाव्यम् ॥

3844. RĀMAKṚṢṆAVILOMAKĀVYAM.

Burnell's Catalogue No. 5356 (b). Page 53. Left column. Substance—Paper. Size—7¾×4⅜ inches. Sheets—2 (98 and 99). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—50. Author—Daivajñasūri. Complete.

Beginning, end, colophon and subject—Same as No. 3843.

Remarks:—The Ms. is in good condition. Burnell has not

noticed this work in his catalogue.

॥ रामकृष्णविलोमकाव्यं सटीकम् ॥

3845. RĀMAKṚṢṆAVILOMAKĀVYAM SAṬĪKAM.

J. L. Collection No. 549. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—6. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—85. Author—Daivajñapaṇḍitasūri. Complete.

Beginning:

श्रीगणेशाय नमः ॥

श्रीमन्मङ्गलमूर्तिमार्तिशमनं नत्वा विदित्वा ततः
शब्दब्रह्ममनोरमं गुणगणज्ञानाधिराजात्मकः ।
यद्ग्रन्थाध्ययनैर्विनेयनिवहोप्याचार्यचर्यामगा-
त्सोऽयं(हं) सूर्यकविर्विलोमरचनाकाव्यं करोम्यद्भुतम् ॥ १ ॥

छन्दःपूरणव्युत्क्रमक्रमविधौ साकाङ्क्षता तत्पदे-
ष्वारम्भाचरितक्रमोऽप्युपचयोप्येतत्रयं दुर्गमम् ।
एवं सत्यपि मन्मतिः कियदपि प्रागल्भ्यमालम्बते
तत्सर्वं गुणिनः क्षमन्तु यदहो यूयं समज्ञाः स्वयम् ॥ २ ॥

कदाचिदपि सन्तरेत्कृतिपरो नरो नीरधिं
कथञ्चिदपि धावति प्रखरधामधाराध्वनीम् ।
क्षतेऽप्यतिविशारदाः प्रचुरशारदानुग्रहं
विलोमकविताकृतौ सुकविधीरधीरा भवेत् ॥ ३ ॥

* * *

(मूलम्)

तं भूसुता मुक्तिमुदारहासं
वन्दे यतो लव्यभवं दयाश्रीः ।
श्रीयादवं भव्यभतोयदेवं
संहारदामुक्तिमुतासुभूतम् ॥

तं भूसुतामुक्तिं वन्दे भूसुतायाः मुक्तिर्यस्मात्तं तथा । रावणरक्षितायाः सीतायाः मुक्तिर्मोक्षणं यस्मात्तं राघवं वन्दे नमस्करोमीत्यर्थः । किम्भूतम्? उदारहासम् । उदारः गम्भीरो हासो यस्यासौ । तथा उद्वेगनिमित्तेषु सर्वानर्थेषु प्राप्तेष्वनुद्विग्नमित्यर्थः । पुनः किंभूतं? लव्यभवम् । लव्यः पवित्रो भवो पातारो यस्य स तथा । अथ तं कं यतो दयाश्रीश्च बभूव । दयाभूतरूपा श्रीः शोभा तयोर्निदानमित्यर्थः । अथ कृष्णपक्षे तु श्रीयादवं वन्दे । किम्भूतं भव्यभतोयदेवम् । भव्या उत्तमा भा दीप्तिर्यस्यासौ सूर्यः । तथा तोयशब्देन चन्द्र । जलात्मकत्वात्तयोर्द्योतनाद्देवः सूर्यचन्द्रयोरपि प्रकाशक इत्यर्थः । तदुक्तम् । "यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि" इत्यादि । अथ किम्भूतं यादवम् । संहारदामुक्तिम् । संहारं ददातीति संहारदा संहारोऽनर्थः । तं ददातीति तथाविधा पूतना तस्याः मुक्तिर्मोक्षो यस्मात्स तथा । पुनः किम्भूतम् । उत प्रत्युत । असुभूतम् सर्वत्र प्राणरूपेणावस्थितमित्यर्थः । अथवा प्राणनं जीवनं तद्रूपं चैतन्यस्वरूपम् तदुक्तम् "अहमात्मा गुडाकाश सर्वभूता-

श्रयस्थितः" इत्यादि । पूतनायै मुक्तिं दातुमन्तर्यामि-
त्वेन स्वयमेव तत्प्रेरकोऽभूदित्युक्तम् । ननु देहवतोऽपि
रामादेः कथमन्तर्यामित्वमित्याशङ्क्य तुल्याक्षरयेन्द्रवज्र-
याह ॥ १ ॥

End:

(मूलम्)

तारकेरिपुरापश्रीरुचादास सुतान्वितः ।
तन्विताम्सु सदाचारु श्रीपरापुरिकेरता ॥ ३५ ॥

लङ्कारङ्कागाराध्यासं यानैमेयाकाराव्यासे ।
सेव्याराकायामेनेया सन्ध्यारागाकारं कालम् ॥३६॥

गोदावरी ब्रह्मगिरेः सकाशात्
संप्रापिता प्रागुदधिं प्रयत्नात् ।
येनार्पिणा सोपि पुनः प्रतीप-
मानेतुमद्रिं प्रभवेत्किमेताम् ॥ १ ॥

एवं विलोमाक्षरकाव्यकर्तु-
र्भूयासमायासमवेक्ष्य तज्ज्ञाः ।
जानन्त्विमां चित्रकवित्वसीमां
दैवज्ञसूर्याभिधमस्प्रदिष्टाम् ॥ २ ॥

Colophon:

इति श्रीमद्दैवज्ञपण्डितसूर्यविरचितं रामकृष्ण(विलोम)काव्यं
सम्पूर्णम् ॥ श्रीः ॥

Subject: Rāmakṛṣṇavilomakāvyam 1-36 ślokas.

Remarks:—The Ms. is in good condition. This Ms. contains commentary only for the first śloka. On the title page is given :

अवदेवभट्टस्य इदं पुस्तकम्

The text and the comentary are by the same author. Every stanza is capable of a double interpretati. n-- one as applicable to Rāma and the other, as applicable to Kṛṣṇa.

The work has been printed in the Kāvyamālā Guccha XI in the Nirṇayasāgara Press, Bombay.

॥ रामकृष्णविलोमकाव्यम् ॥

3846. RĀMAKṚṢṆAVILOMAKĀVYAM.

Burnell's Catalogue No. 4766. Page 161. Left column. Substance—Paper. Size—$9\frac{3}{8} \times 5\frac{1}{10}$ inches. Sheets—17. Lines—9 to 15 to a Page. Script—Devanāgarī. No. of Granthas—394. Author—Daivajñasūryapaṇḍita. Complete.

Beginning, end, colophon and subject—Same as No. 3845.

Remarks :—The Ms. is in good condition.

॥ रामचन्द्रकाव्यम् ॥

3847. RĀMACANDRAKĀVYAM.

Burnell's Catalogue No. 4757. Page 161. Left column. Substance—Paper. Size—$10 \times 8\frac{9}{10}$ inches. Sheets—26 (11th and 12th missing). Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—336. Author—Śambhu-Kāidāsa. Complete.

Beginning:

श्रीगणेशाय नमः ॥

सानन्दं परिपूरिताखिलजगत्कामाय नीलोत्पल-
श्यामाय प्रभवे प्रकीर्तितगुणग्रामाय रामायणे ।
आरामाय सतां मनो मधुलिहां कामाभिरामाय च
प्रोद्दामाय पराक्रमैरनुदिनं रामाय तस्मै नमः ॥ १ ॥

अन्ये पूर्वमपूर्वकर्मकुशलायन्येऽवताराः परे
वीरास्तेऽद्भुतकर्मणा सह तदैवास्तं समस्तागताः ।
अद्याप्यस्ति नवैव यत्कृतरहो(?)मूर्तेव कीर्तिर्विभो
लङ्कारोरघुराजसेतुरचलालङ्काचलङ्कापतेः ॥ २ ॥

End:

दुःस्वप्नमिवातिभीषणममुं दृष्ट्वागतं भार्गवं
भूयोऽभूत्प्रकृतिस्थितो दशरथो जाग्रन्निवाव्यग्रधीः ।
सानन्दश्च सविस्मयं सपुलकं रामं समालिंग्य तं
सर्वैर्मन्त्रिसुहृद्वरैः सह वसिष्ठाद्यैरयोध्यां ययौ ॥ ६४ ॥

Colophon:

इति शम्भुकालिदासविरचिते रामचन्द्रकाव्ये चतुर्थः सर्गः ॥

Subject: Rāmacandrakāvya. 1-4 sargas.

Sarga.	Śloka.	Sheet.
I.	26	5
II.	30	10
III.	62	19
IV.	64	26
	180	

Remarks: —The Ms. is in good condition.

The author of this is one Śambhu Kālidāsa.

॥ रामायणसंग्रहः ॥

3848. RĀMĀYAṆASAṄGRAHAḤ.

P. A. Collection No. 345. Substance—Paper. Size—6×5 inches. Sheets—4. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—40. Author—?. Incomplete.

Beginning:

सीतारामपदाब्जान्यभिवाद्य तनोम्यहम् ।
सुखबोधाय बालानां श्रीरामायणसङ्ग्रहम् ॥

आसीदयोध्यानगरी देशे कोसलनामनि ।
तस्यां श्लाघ्यगुणः श्रीमान्राजा दशरथोऽवसत् ॥

End:

ततस्स पादपतनं भरतेनार्थितोऽपि सः ।
न जगाम पुरं रामः तातादेशमनुस्मरन् ॥ १० ॥

Colophon: Nil.

Subject: Story of the Rāmāyaṇa.

Remarks: —The Ms. is old. The author is unknown.

॥ रामायणार्या ॥

3849. RĀMĀYAṆĀRYĀ.

T. S. Collection No. 877. Substance—Paper. Size—8×6 inches, Sheets—4. Lines—17-19 to a Page. Script—

Devanāgarī. No. of Granthas—75. Author—Kṛṣṇarāja Incomplete.

Beginning:

रामायणार्या बालकाण्डप्रारम्भः

कल्याणकल्पवल्लीं कामपि कल्याणविग्रहां कलये ।
चामुण्डिकाभिधानां चेतसि चातुर्यशालिनीं देवीम् ॥

वचनधृतामृतसख्यं वदने तत्किमपि शशधरप्रख्यम् ।
चामुण्डिकासमाख्यं चक्षुःफलमस्तु वस्तु मे मुख्यम् ॥

End:

सरसिरुहावलिसरसामयमनुमेने सदालिसंसेव्याम् ।
वरणस्रजमिव वीक्षणमालां नरपालबालिकाकलिताम् ॥ ५४ ॥

इक्षुलतामिव मधुरां इन्दीवरबृन्दसुन्दरालोकाम् ।
कन्दस्रजमिव................................... ॥

Colophon: Nil.

Snbject: Story of the Rāmāyaṇa.

Remarks:—The Ms. is in good condition.

॥ शब्दार्थचिन्तामणिः सव्याख्यः ॥

3850. ŚABDĀRTHACINTĀMAṆIḤ.

SAVYĀKHYAḤ.

Burnell's Catalogue No. 5082. Page 58. Left column. Substance—Paper. Size—$9\frac{7}{10} \times 3\frac{4}{8}$ inches. Sheets—126. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Cidambarakavi. Complete.

Beginning:

श्रीगणेशाय नमः ॥

कल्याणं वः कलयतु महापद्मवक्षा मुकुन्दः
पद्मी शङ्खी समकरकरः कच्छपश्रीः पदेभान् ।
दभ्रान्यश्रीपृथुलवरदोर्दन्तकुन्दाभिरामो
नीलाब्जाभो निभृतकृपया सन्निधी(?)क्ष्यस्वरूपः ॥ १ ॥

श्रयति यदि शरीरी मद्वदेतद्वहेत
श्रियमिति सरुतालिश्रीलमालक्ष्यमाणम् ।
वददिवशयपद्मे वल्गुपद्मं दधानः
पदयतु हृदयं नः पद्मनाभो दयालुः ॥ २ ॥

काव्यं क्रमव्युत्क्रमकक्ष्ययादः
श्रीरामरामानुजशीलशंसि ।
शब्दार्थचिन्तामणिनाम शस्यं
चिदम्बरः स्वं विवृणोति चित्रम् ॥

अत्यर्थस्फुरणोपपादिसुतरामाबिभ्रतोऽनर्घता-
मोजस्फूर्त्युपकल्पनातिसरलादुच्चेजनाशिल्पतः ।
चित्रं सारमिदं चिदम्बरकवेः शब्दार्थचिन्तामणे-
र्व्याख्यानं निकषोपलाख्यमनघं विद्वन्मुदे कल्पताम् ॥

यद्येकदा वीक्षितुमात्तयत्ना
रामायणं भागवतं च रम्यम् ।
चित्रं बुधा यान्तु चिदम्बरीयं
शब्दार्थचिन्तामणिमाप्तशक्तिम् ॥

सुमनोहारिणी सूक्तिः पूर्णैः पुष्पमयैर्गुणैः ।
वृताऽर्यास्रग्विणीवृत्तैः रसावामोदकृत्सताम् ॥

इह खलु "काव्यं यशसेऽर्थकृते + युजे" इत्याद्यालं-
कारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयःसाधनत्वाभिधा-
नात् "काव्यालापांश्च वर्जयेत्" इति निषेधस्यापि अस-
त्काव्यविषयत्वात्सत्कथाश्रवणादेरावश्यकतया प्रतिपादि-
तत्वाच्च भगवत्कथाप्रशंसकं किञ्चन काव्यं करिष्यमाणः
कविरादौ तावत् "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि
तन्मुखम्" इति वचनादाशीर्वचनमाचरति ॥ कल्याणा-
नीति ॥

कल्याणानि करोतु वः सकरुणाकल्लोलितापाङ्गभा-
वल्ल्यासौरभिदानवारिसरसो वक्रेतरे ह्यद्यति ।
पुन्नागो वदने वपुष्यपि पुरः पञ्चाननं रञ्जयन्
कुम्भे भाति कुचे वशां परिमृशन्नुत्फुल्लगां वल्लभाम् ॥

End:

गवा । स्वर्गेण । अमा । सह । हरेः । इन्द्रस्य गिरा ।
वाचा । वायुदोराप्रमासारिहारः । वायोः दोष्णः सका-
शात् । आप्तः लब्धः । मासारिमाया श्रिया । सारी सार-
वान् । हारः मुक्तालता कल्पो यस्य स तथोक्तः । ऊरुकः
उवत् रुद्रवत् । उरुकः उरुसखः । यद्वा उरुकः उन्नतमूर्धा ।
उरुवाक् वा "उपमानानि सामान्यवचनैः" इति समा-
सः । अराः । अस्य विष्णोः । रा इव राः श्रीः यस्य सः
अराः । भारभूमारर्धाः भारेण अतिशयेन भूमायां भुवः

मायां सम्पदिं सीतायां अरा: अंगौरवं रातीत्यराधी: यस्य स तथोक्त: । रामराज: रामचन्द्र: । गवा अमा सहनया-मानवा नयेन आमानवा: । आ समग्रा मानवा: मनुवंशभवा: याभि: तास्तथोक्ता: । वादया: यान् परिमलमश्नुवान: । अथ: शुभावहं विधि: याभि: तास्तथोक्ता: । राज्यं रा-तीति राज्यरा: । मा: श्रिय: । यान् गच्छन् अश्नुवान: सन् । रान् रक्षन् अभात् । अवरोहपाठे ।

वागजोरामराधीरमाभूर
भाद्यानरायादवावानमायानमा ।
मानया राज्यरारागिराकोर
रूरे ह्ररोह्यारिसामाप्तरादो युवा ॥

वागज: वाचा अज: ब्रह्मा अज इव वागीश्वर इत्यर्थ: । रामरा: । रामस्य रा: संपत् । अमा साकल्येन को: भुव: रा: गति: । एरणे हर: ईश्वरतुल्य इत्यर्थ: । ह्रारिसामा । ह्रारि मनोज्ञं सामापायो यस्य स तथोक्त: । सामपदग्रहणं दानादीनामप्युपलक्षणम्; सामाद्युपायसंपन्न इत्यर्थ: । गिरा आप्तराद: । आप्तेषु रान् अ: गौरवं यस्य स तथो-क्त: । रातेः शत्रन्त: । युवा तरुण: नित्यनूतन इत्यर्थ: । धीरमाभू: धीर: माभू: माया रुक्मिण्या: भवतीति माभू: । प्रद्युम्न: यस्य स: कृष्ण: । यद्वा अमा । गिरा रामराधी । रामं बलभद्रं राधयतीति रामराधी । ताच्छील्ये णिनि: ।

इरमाभूः । इः कामः प्रद्युम्नः रमाभूः रमायाः श्रियः रु-
क्मिण्याः भवतीति रमाभूः येन स इरमाभूः कृष्णः । नया-
राज्यराः नयेन आराज्यराः आसमग्राः राज्यरायः
राज्यश्रियः यस्य स तथोक्तः सन् । भानराः भया दीप्त्या
आनराः आसमन्तात्पूर्णाः नराः याभिः ताः तथोक्ताः ।
यादवावानमाः । वने वसन्तीति वानाः दुर्गाधिपतयः ।
" सोऽस्य निवासः " इत्यण्प्रत्ययः यादवैः आवानमाः
असामन्तात् वानानामासंपत्समृद्धिः यासु तास्तथोक्ताः ।
यद्वा । यादवाः । आवाननमाः याभिः ताः तथोक्ताः ।
उरूः गुर्वीः । " वोतो गुणवचनात् " इति विकल्पात्
ङीषोऽभावः । माः सम्पदः यान् गच्छन् अंगीकुर्वन् सन् ।
अभात् । "अकारो ब्रह्मविष्ण्वीशकमठेष्वङ्कणे रणे । यौरवेंतः-
पुरे हेतौ लज्जायां भूषणेज्ययोः ॥ रात्रियां हेम्नि शाला-
यामाशंसायां गतावपि " इति विश्वः ॥ उपमालङ्कारस्य
वर्णानुप्रासेन शब्दालङ्कारेण सह तिलतण्डुलवत् संसृष्टिः ॥
अस्य सङ्गीतश्लोकस्य द्विगुणात्मकस्य आद्यन्तयोरमृतबी-
जस्य वकारस्य प्रयोगचमत्कारात् । तुङ्गलाभरसीमङ्ग-
लाभ्युच्चयो महीयानवगन्तव्यः श्लेषप्रसादसौकुमार्यमाधु-
र्यादयो गुणा रसर(?)माधुर्याः स्पष्टतराः ।

हारिश्लेषगुणोपमा रसनिधावारोहरामायणे
धीरोहादवरोहभागवतके धीरोहसम्पादने ।

काव्ये श्राव्यपदे चिदम्बरकवेः शब्दार्थचिन्तामणौ
सर्गः सौधरसादनर्गलरसः सारो द्वितीयोऽजनि ॥ ॥

अपि च ॥

यज्वा कौशिकगोत्रभूषणमणिः यः सूर्यनारायण-
स्तस्याभूत्तनयात्सुतनयात् योऽनन्तनारायणात् ।
चित्रे तस्य कृतौ चिदम्बरकवेः शब्दार्थचिन्तामणौ
सर्गो भिक्षुकलोलदिक्षुकरसः सारो द्वितीयोऽजनि ॥
स्पष्टोऽर्थः ॥

Colophon:

इति पदवाक्यप्रमाणपारावारपारीणेन श्रीमत्कौशिकगोत्रभूषणस्य श्री-
मत्सूर्यनारायणदीक्षितस्य सूनोः अनन्तनारायण-
सुमतेः पुत्रेण श्रीनिवासविद्वन्मणेरनुजेन चिदम्बर-
कविना विरचितायां शब्दार्थचिन्तामणिव्याख्यायां निकषोप-
लाख्यायां द्वितीयः सर्गः ।

इति शब्दार्थचिन्तामणिव्याख्या समाप्ता ॥

साक्षाद्राघवरामसोदरकथासारप्रशंसारता
साक्षात्सेचनकं न कस्य विदुषः प्रेक्षीसमुल्लासिनी ।
द्राक्षोरक्षुरसालवारघसिता रम्भा पयोडम्बरा
द्राक्षापाकरसातिभारहृदसौ चैदम्बरी भारती ॥

लसद्रसाडम्बरलब्धवर्णा
कदम्बकामोदविकासकल्पा ।
अब्दालिरुत्कर्षकहर्षदानैः
शब्दार्थचिन्तामणिशारदेयम् ॥

॥ श्रीः ॥ श्रीकृष्णार्पणमस्तु ॥ श्रीरस्तु ॥

Subject : Śabdārthacintāmaṇivyākhyā. 1-2 sargas.

Remarks :—The Ms. is in good condition. Regarding Cidambarakavi see Remarks under No. 3749.

॥ शब्दार्थचिन्तामणिः सव्याख्यः ॥

3851. ŚABDĀRTHACINTĀMAṆIḤ SAVYĀKHYAḤ.

Burnell's Catalogue No. 10325. Page 162. Right column. Substance—Palm leaf. Size—$19 \times 1\frac{1}{8}$ inches. Leaves—57. Lines—6 or 8 to a Page. Script—Grantha. No. of Granthas—1500. Author—Cidambarakavi. Complete.

Beginning, end, colophon and subject—Same as No. 3850.

Remarks:—The Ms. is in good condition.

॥ शान्तिविलासः ॥

3852. ŚĀNTIVILĀSAḤ.

Burnell's Catalogue No. 5040 a. Page 157. Left column. Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{1}{4}$ inches. Sheets—5. (1-5). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—90. Author—Nīlakaṇṭhadīkṣita. Complete.

Beginning :

वंशे कस्मिन्नजिनिषि कयोः पुत्रतामग्रहीषं

कत्यश्रौषं तदपि कतिधा तच्च सभ्यः कतिभ्यः ।

किं नाद्राक्षं व्यसनमपि वा किं सुखं नान्वभूवं
नोपारंसीत्तदपि हृदयं कीदृशो मे विपाकः ॥ १ ॥
पादौ मे स्तः परपचतुरौ कीकटानेव गन्तुं
वागप्यास्ते निभृतमनृतान्येव वक्तुं वचांसि ।
दीदांसन्ते मम च मतयो दोषदृष्टौ परेषां
पङ्गुर्मूकः पशुरपि भवाम्यात्मनीने तु कृत्ये ॥ २ ॥

End :

दण्डं धत्ते सकलजगतां दक्षिणो यः कृतान्तः
नामाप्यस्य प्रतिभयतनो नोपगृह्णीमहेति ।
प्राप्ताः स्मस्तं निगमवचसामुत्तरो यः कृतान्तः
यद्वा तद्वा भवतु न पुनस्तस्य पश्येम वक्त्रम् ॥

Colophon :

इति शान्तिविलासः समाप्तः ॥

Remarks:—The Ms. is in good condition. For the other works contained herein see Remarks under No. 3888. This work does not seem to have been separately noticed by Dr. Burnell. This is printed at the Sri Vani Vilas Press, Srirangam.

॥ शान्तिविलासः ॥

3853. ŚĀNTIVILĀSAḤ.

Burnell's Catalogue No. 4993. Page 162. Right column. Substance- Paper. Size—8 × 3½ inches. Sheets—10. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—90. Author—Nīlakaṇṭhadīkṣita. Complete.

Beginning, end and subject—Same as No. 3852.

Colophon :

इति श्रीनलिकण्ठदीक्षितसूरिणा विरचितः
शान्तिविलासः सम्पूर्णः ॥

॥ शान्तिविलासः ॥

3854. ŚĀNTIVILĀSAḤ.

J. L. Collection No. 550. Substance—Paper. Size—9½×4¼ inches. Sheets—8. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—90. Author—Nīlakaṇṭhadīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 3852.

Remarks :—The Ms. is in a fairly good condition.

॥ श्लेषचिन्तामणिः ॥

3855. ŚLEṢACINTĀMAṆIḤ.

Burnell's Catalogue No. 10267. Page 164. Right column. Substance—Palm leaf. Size—18⅞×1¼ inches. Leaves—30. Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—850. Author—Cidambarakavi. Complete with commentary.

Beginning :

स वः श्रेयो विश्वुस्तन्यात्सुवयःपुङ्गवध्वजः ।
करीन्द्रवदनोल्लासी कटकीकृतपन्नगः ॥

श्लेषचिन्तामणिं काव्यं तोषसन्तानदं सताम् ।
इदं व्याकुर्महे काव्यं चिदम्बरकवेर्वयम् ॥

इह खलु "काव्यं यशसेऽर्थकृते" इत्याद्यालङ्कारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयःसाधनत्वेन प्रतिपादितत्वात्काव्यमारभमाणः कविः "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इति च वचनादाशीरचनामारचयति । वैनायक्य इति ।

वैनायक्याश्रयेक्ष्याङ्कावासितागधृती रसात् ।
भवतां भद्रमाधत्तां पार्वतीपरमेश्वरौ ॥

वैनायक्या विनायकस्य गणपतेः सम्बन्धिन्या श्रिया शोभया ईक्ष्याङ्का दर्शनीयोत्सङ्गा वासितागधृतिः वासिता परिचिता अगस्य पर्वतस्य हिमवतः धृतिः प्रीतिः यथा सा तथोक्ता । "धृतिर्योगान्तरे धैर्ये धारणे प्रीतिसौख्ययोः" इति नानार्थरत्नमाला । औ रुद्रे रसाद्रागात् । ल्यब्लोपे पञ्चमी । रसं प्राप्येत्यर्थः । ईश्वरा । "स्थेशभास" इत्यादिना वरच् प्रत्ययः । पार्वती पर्वतराजपुत्री गौरी । भवतां भद्रमाधत्ताम् कुरुताम्.... "डुधाञ् धारणपोषणयोः" इति धातोर्लोटि आत्मनेपदैकवचनम् । "शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः" "उकारश्शम्भुः" इत्यमरः इत्येकाक्षरकोशः ...द्विवचनप्रतिपादनेऽर्थे । वैनायक्याः श्रिया ईक्ष्याङ्कौ प्रेक्ष्योत्सङ्गौ रसादासितागधृतिः आसिता आबद्धा अगदयोः हिमवन्मेर्वोर्धृतिः......तौ तथोक्तौ । पार्वतीपरमेश्वरौ भद्रमाधत्तां कुर्वातामिति लोटि परस्मैपदद्विवचनम् ।

End:

श्लेषचिन्तामणिः श्रीमानेष वैदुष्यशालिनाम् ।
भूषणं कर्णयोः पुंसां तोषमेष विशेषयेत् ॥

स्पष्टोर्थः ॥

सदम्बरसरिद्वेणीमदं विरसयन्त्यसौ ।
मुदंवरधियां धत्तां चिदम्बरसरस्वती ॥

स्वापसारस्वताश्लेषे श्लेषचिन्तामणौ स्थिते ।
विस्तरेणालमलसैर्दुस्तरेण गिरां सताम् ॥

सारस्वतोदैक... मञ्जसखं पदं वा
चक्षूरविस्फुरितचक्रमुदेव यस्य ।
हृत्सम्मदावहविचित्र तनुः शिवो वा
श्रीसारगुप्तमवतारसवहन्तुरो वा ॥

वक्तुं समर्थतामर्थं वहतां सुधियामिह ।
पश्चे कर्तृपदज्ञाने वैधात्रमवधिर्वयः ॥

सीतारामाभ्यां नमः ॥ हरये नमः ॥

Colophon:

श्लेषचिन्तामणिव्याख्या समाप्ता ॥

After the colophon is found:

कपिस्थलसदाभाभूक्षिपेद्वल्मीकभूदिता ।
प्रसह्याङ्गभवाघालीरामायणकथोज्ज्वला ॥

कपिस्थलसदा.. ...स्थानां वानरस्थितानां सतीनां आभानां कान्तीनां भूः स्थानम् । कपिप्रसङ्गसङ्गतप्रासिद्धिरित्यर्थः । वल्मीकभूदिता वल्मीकभुवा वाल्मीकिना उदिता उक्ता......

....प्रसह्य बलात्.. ...

❀ ❀ ❀

वागीशो वा गीतवागीश्वरो वा

वा.............................भाव: ।

चैदम्बर्या नेतरे चित्रसूक्तेः

स्वादंवर्या जानते सूरिधूर्या: ॥

कविगुरुबुधशेषा: काम्यविद्याविशेषा:

न विदुरतनुवाचां नर्म चैदम्बरीयम् ।

.........तिकुर्वद्वर्वधामापगाया:

शिवशिरसि नटन्त्या: का कथा शेषवादे ॥

शेषे वादे वदानां विदुषां समूहे । अन्यत्र स..........

Subject: Śleṣacintāmaṇi with commentary 1-110 ślokas.

Remarks:—The Ms. is in good condition. In the beginning there are 2 leaves which probably should find a place in the middle of the Ms. The leaf No. is broken. The Ms. is in a most decaying condition. For other information regarding the author see remarks under No. 3749.

॥ सुमनोरञ्जनम् ॥

3856. SUMANORAÑJANAM.

J. L. Collection No. 551. Substance—paper. Size—7¾ × 3½ inches. Sheets – 25. Lines—9 to a page. Script—Devanāgarī. No. of Granthas—250. Author—Śrīnivāsa. Complete.

Beginning:

श्रीहयग्रीवाय नमः ॥ श्रीवेङ्कटेशो जयति ॥

सुमनोरञ्जनं लिख्यते ॥

श्रीमान्वेङ्कटनाथो विभुर्विजयते निरङ्कुशचरित्रः ।
येन यशोदानन्दावाभीरकुले प्रतिष्ठितौ पितरौ ॥ १ ॥

विबुधाराध्या सुरभिर्यदि वा गोष्ठान्तरूपगता सुकृतैः ।
आत्मा तोष्यः सुधिया परसुखजनकैश्च सरससाहित्यैः ॥

अमितास्त्वया बहुमताः कविता वनिताश्च गोपवेषेण ।
कुब्जावदियं कुब्जा हृदयाब्जालिङ्गनं करोतु हरे ॥ ३ ॥

ननु किमिति याचितव्यो ग्रन्थालोकं प्रसह्य बुधवर्गः ।
यस्य च मतिप्रदस्त्वं हृत्स्थो मे ग्रथितवान्हरेर्ग्रन्थम् ॥ ४ ॥

End:

रासक्रीडाक्लान्तं विश्रान्तं जनयितुं श्रियः कान्तम् ।
शयनीयं कमनीयं तेनुर्वनदेवतास्तदा कुसुमैः ॥ १३ ॥

काचन तिलकमकार्षीच्चर्चयते कापि चन्दनं हृदये ।
काप्यधुनोत्पटवासं ताम्बूलं कापि विधिवदर्पयति ॥ १४ ॥

काचन सुमनोहारं निदधे सुमनोहरं हरेः कण्ठे ।
तस्यै सन्तुष्टोऽयं हृत्स्थं नवरत्नहारमेव ददौ ॥ १५ ॥

Colophon:

इति श्रीनिवासरचिते सुमनोरञ्जननाम्नि हरिचरित्रे
रासक्रीडावर्णनं अष्टमः सर्गः ॥ ८ ॥

इदं वाजसनो विप्रो लक्ष्मीवेङ्कटयोः सुतः ।

श्रीनिवासो हरेः प्रीत्यै सुमनोरञ्जनं जगौ ॥ १ ॥

मूढो दरिद्रो रुग्णो वाप्यनपत्यः प्रवासवान् ।
पठित्वेदं प्रतिदिनं स्वस्वकामानवाप्नुयुः ॥ २ ॥

सकृत्पठनमेवापि कार्यसिद्धिं विधास्यति ।
भूयः पाठैस्तु वर्धेत भूयसी श्रीपतेः कृपा ॥ ३ ॥

सम्पूर्णम् । श्रीकृष्णः प्रीयताम् ।

सुमनोरञ्जनं नाम काव्यं सम्पूर्णम् ॥ सर्गः ८ ॥

श्रीवेङ्कटेशो जयति ॥

Subject: Sumanorañjanam. 1-8 sargas. This Ms. deals with the following subjects.

1 सर्गः बाललीलावर्णनम्

2 ,, मुरलीवर्णनम्

3 ,, गोपसल्लापः

4 ,, गोपीसंवादः

5 ,, यशोदान्वितगोपिकाविवादवर्णनम्

6 ,, पटहरणविनोदः

7 ,, गोपीसङ्केतः

8 ,, रासक्रीडा

Remarks:—The Ms. is in good condition.

The author of the work is known as Śrīnivāsa and he is the son of Venkaṭeśa and Lakṣmī. He belonged to the Vājasaneyaśākhā of Śuklayajurveda. The work deals with story of Śrī Kṛṣṇa and his Rāsakrīḍā.

॥ हरिविलासः ॥

3857. HARIVILĀSAḤ.

Burnell's Catalogue No. 4996. Page 163. Left column.

Substance—Paper. Size—9½ × 4 inches. Sheets—24. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—540. Author—Lolimbarāja. Complete.

Beginning:

श्रीगणेशाय नमः ॥ श्रीकृष्णाय नमः ॥

रचयति सहसा यश्चित्रमेतं प्रपञ्चं
प्रशमयति च तद्वत्केनचित्कौतुकेन ।
अविदितममरैस्तच्चण्डमुण्डादिनाना
दनुजदलनदक्षं शर्वसर्वस्वमव्यात् ॥ १ ॥

यदपि मत्कविता गुणवर्जिता
तदपि साधुसुखाय भविष्यति ।
इह निमित्तमिदं यदुदीर्यते
हरिकथा कलिकल्मषनाशिनी ॥ २ ॥

End:

अपि सचिवसहस्रसंयुतोऽसौ
स्वयमकरोद्व्यवहारमेकविद्वान् ।
क्षणमपि खलसंगतिं न चक्रे
सुकविसभासु सभासु नित्यमासीत् ॥ ५ ॥

सदा सादरं सुन्दरीगीयमानं
पुरग्रामकान्तारकुञ्जोदरेषु ।

असौ माधवो दुःखवृक्षावलीनां
लवित्रं पवित्रं चरित्रं चकार ॥ ६ ॥

नानागुणै० ॥ ७ ॥

Colophon:

इति श्रीमत्सूर्यत्पण्डितकुलालङ्कारश्रीहरिहरमहाराजाधि-
राजोद्योतितकुलालङ्कारलोलिम्बराजविरचिते हरिविलासे
कंसवधो नाम पञ्चमः सर्गः ॥ ५ ॥
श्रीकृष्णार्पणमस्तु ॥

Subject: Harivilāsa. 1-5 sargas.

Sarga.		Ślokas.	Sheets.
I.		34	3
II.	Rāsakrīḍavarṇana.	36	6
III.	Govardhanavarṇana.	69	12
IV.	Bhagavadvarṇana.	72	18
V.	Kamsavadha.	87	24

Remarks:—The Ms. is in good condition.

Dr. Keith gaves the date of this work as 1050 A. D. The work is available in print, having been published by the Nirṇayasāgara Press.

॥ हरिविलासः ॥

3858. HARIVILĀSAḤ.

Burnell's Catalogue No. 4997. Page 163. Left column. Substance—Paper. Size—$9\frac{1}{3} \times 3\frac{2}{8}$ inches. Sheets—19. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—540. Author—Lolimbarāja. Complete.

Beginning and subject—Same as No. 3857.

End:

श्रीमान्हामरसोऽभवद्द्विजकुलालङ्कारचूडामणिः
गङ्गानिर्मलमौनिभार्गवकुले तस्मिन्वसेत्पण्डितः ।
आसीत्तस्य सुतः सुरस्त सुकृतीयह्वाम्बिकायां चिरात्
लेभे श्रीहरिनामरत्नमवनीमध्ये तदास्तां चिरम् ॥

Colophon:

इति श्रीहरिविलासे महाकाव्ये कंसवधो नाम पञ्चमः सर्गः
समाप्तः ॥

Remarks:—This Ms. contains verses more in certain cases and less in certain others than the previous Ms. The No. of verses for each canto in this Ms may be given thus:—

I.	Canto.	31.	III.	Canto.	38.
II.	"	42.	IV.	"	37.
	V.	Canto.	36.		

॥ हरिविलासः ॥

3859. HARIVILĀSAḤ.

Burnell's Catalogue No. 4998. Page 168. Left column. Substance—Paper. Size—$6\frac{1}{8} \times 4\frac{1}{10}$ inches. Sheets—69 (3-71). Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—530. Author—Lolimbarāja. (wants beginning). Incomplete.

Beginning:

(मुहुरिति विलपन्ती कुत्र पुत्रः प्रयातो)
द्रुतगतिबहिरन्तःपर्यटन्ती समन्तात् ।

मरकतमणिमह्यां नाविदन्नन्दपत्नी
स्फुटमपि घनकृष्णं बालकृष्णं कदाचित् ॥ १ ॥

End:

यस्त्रातुं व्रजमुज्जहार सहसा गोवर्धनक्ष्माधरं
यस्त्रैलोक्यमदर्शयन्निजमुखाम्भोजं यशोदाकृते ।
यः पुत्रं स्वगुरोर्यमालयगतं शक्त्या निनाय क्षणात्
यो भूभारमपाचकार सकलं तस्मै नमः शार्ङ्गिणे ॥ ९६ ॥
नानागुणैः + नायकेन

Colophon:

इति श्रीमत्सूर्यपण्डितकुलालङ्कारश्रीहरिहरमहाराजराज्योद्योतित
लोलिम्बराजाविरचिते महाकाव्ये
कंसवधो नाम पञ्चमः सर्गः ॥
इति हरिविलासग्रन्थं समाप्तम् ॥

Remarks:—The Ms. is in good condition.

The No. of verses in this Ms. per canto are

I.	Canto.	32.	III.	Canto.	?
II.	"	32.	IV.	"	142
V.	Canto.	96.			

The readings in this Ms. too differ from both the previous Mss.

॥ हरिविलासः ॥

3860. HARIVILĀSAḤ.

Burnell's Catalogue No. 4999. Page 163. Left column.
Substance—Paper. Size—$8\frac{4}{5} \times 4$ inches. Sheets—35 (of which 2nd, 6th and 10th-12th are missing). Lines—7

or 8 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Lolimbarāja. Incomplete.

Beginning—Same as No. 3857.

End:

नानागुणैरवनिमण्डनमण्डनस्य
श्रीसूर्यसूनुहरिभूमिपभुजा.........

Subject: Harivilāsa 1-5 sargas.

Remarks:—The Ms. is in good condition. This Ms. abruptly ends with the 59th śloka of the first sarga.

The No. of verse in each of the canto of this Ms. are

I. Canto. 31. III. Canto. 33.
II. ,, ? (1-31 only, rest missing). IV. Canto. 52.
V. Canto. 59.

॥ हरिविलासः ॥

3861. HARIVILĀSAḤ.

Burnell's Catalogue No. 5000. Page 163. Left column. Substance—Paper. Size—$8\frac{3}{10} \times 3\frac{3}{5}$ inches. Sheets—28 (3-30; 15th missing). Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—504. Author—Lolimbarāja. Incomplete.

Beginning:

....
गीतं कुरुतः स कामकमनीयशरीरो ।
सततं सहैव वसुदेवकिशोरौ
वपुरेव भिन्नमुभयोर्ननु चेतः ॥ १७ ॥

End:

यावदार्य बतजीवितया .... ।

.... ॥ ७४ ॥

Subject: Harivilāsa 1–5 sargas.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly begins with the 17th śloka of the first sarga and ends with the 74th śloka of the fifth sarga.

The No. of verses in this Ms. are as follows:—

I.	Canto.	32	III.	Canto.	69 (incomplete.
II.	„	32	IV.	„	6–76
			V.	78 incomplete.	

The following publications are available for sale from the Hony. Secretary, Tanjore Mahārāja Serfoji's Sarasvatī Mahal Library, Tanjore.

1. A Descriptive Catalogue of the Sanskrit Manuscripts in the Tanjore Mahārāja Serfoji's Sarasvatī Mahāl Library, Tanjore.

Vol.	I.	Vedas.	Price. Rs.	2—0—0
Vol.	II.	Vedas (Contd.)	„ Rs.	2—0—0
Vol.	III.	Vedas (Contd.) Vedāṅgas.	„ Rs.	2—0—0
Vol.	IV.	Vedāṅgas (Contd.) Kalpa—Śrauta.	„ Rs.	2—0—0
Vol.	V.	Do. (Concluded)	„ Rs.	2—0—0
Vol.	VI.	Kāvyas	„ Rs	2—0—0

2. A Descriptive Catalogue of Tamil Manuscripts of the above Library.

Vol.	I.	Price. Rs.	2—0—0
Vol.	II.	„ Rs.	1—8—0
Vol.	III.	„ Rs.	1—8—0

3. A Descriptive Catalogue of Marathi Manuscripts and Books of the above Library.

Vol. I. Vedānta, Purāṇa and Rāmāyaṇa. Price. Re. 1—0—0

4. A Catalogue of French, Latin, Italian, and Greek Books of the above Library. Price. Re. 0—4—0